कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

M-1947

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 1947 विषय धर्मशास्त्र
नाव. आह्निकम् (विधानपारिजाते)
लेखक/लिपीकार शिवरभट्ट मोरे (लिपिक)
पृष्ठ 166 काळ प्रमोद संवत्सर [✓ पूर्ण]/~~अपूर्ण~~

Checked 2012

M-1947

M-1947

॥इति ऽस्लीकप्रारंभः॥

॥नीलोत्पलदलश्यामंरामंकामंरमासमं॥वेदगीतंपरंनत्वालिख्यतेचाह्निकंमुदा॥१॥

॥श्रीगणाधिपतयेनमः॥गुरुभ्योनमः॥ ॥अथाह्निकंलिख्यते॥त
थामाधवीयेकूर्मपुराणेब्राह्मेमुहूर्त्तेचोत्थायधर्ममर्थंचचिंतयेत्।
कायक्लेशांस्तदुद्भूतंध्यायीतपरमेश्वरमिति सूर्योदयात्प्रागर्धप्रहरे
द्वौमुहूर्तौतत्राद्योब्राह्मःद्वितीयोरौद्रः तदुक्तंविष्णुपुराणे रात्रेःपश्चि
मयामस्यमुहूर्त्तोयस्तृतीयकः सब्राह्मइतिविज्ञेयोविहितस्स
प्रबोधनेइति॥ तत्रस्वापेप्रायश्चित्तमुक्तंस्मृतिचंद्रिकायां ब्राह्मेमु
हूर्त्तेयानिद्रासापुण्यक्षयकारिणीतांकरोतितुयामोहात्पादकृच्छ्रे
णशुध्यतइति तत्रचिंतनीयमर्थविशेषंदर्शयति विष्णुः उत्था
योत्थायबोद्धव्यंकिमद्यसुकृतंकृतं दत्तंवादापितंवापिवाक्सत्यावा
पिभाषिता उत्थायोत्थायबोद्धव्यंमहद्भयमुपस्थितं मरणव्याधि
शोकानांकिमद्यनिपतिष्यति ततोविष्णुंस्मरेत् शयनादुत्थितो
यस्तुकीर्त्तयेन्मधुसूदनं॥कीर्त्तनात्तस्यपापानिनाशमायांत्य

ता

१

शेषतइतिस्कंदोक्तेः ततोयथागजेंद्रमोक्षादिस्मरेत्॥अथभूप्रार्थ
ना समुद्रवसनेदेविपर्वतस्तनमंडले विष्णुपत्निनमस्तुभ्यंपाद
स्पर्शंक्षमस्वमेइति ततःश्रोत्रियादिकमवलोकयेत् नतुदुष्टादि
कं तथाहकात्यायनः श्रोत्रियंसुभगंगांगामग्निमग्निचितंतथा
प्रातरुत्थाययःपश्येदापद्भ्यःसप्रमुच्यते पापिष्ठंदुर्भगंचांधंन
ग्नमुत्कृत्तनासिकं प्रातरुत्थाययःपश्येत्तत्कलेरुपलक्षणमिति॥
ततोमूत्रपुरीषोत्सर्गंकुर्यात् तदाहांगिराः॥उत्थायपश्चि
मेयामेरात्रेरावश्यकचोदकं अंतर्द्धायतृणैर्भूमिंशिरःप्राव
त्यवाससा वाचंनियम्ययत्नेननिष्ठीवोच्छ्वासवर्जितः कुर्या
न्मूत्रपुरीषेतुशुचौदेशेसमाहितइति तत्रतृणानिविशि
नष्टियमः अयज्ञियैरनार्द्रैश्चतृणैःसंछाद्यमेदिनीमिति
तृणग्रहणंचकाष्ठादेरप्युपलक्षणं तथाचस्मृतिचंद्रिकायां॥

पाति

गां च अ

यमः तिरस्कृत्साचरेत्काष्ठपत्रंलोष्टंतृणेनवा नियम्यप्रय
तोवाचंसंवीतांगोवगुंठितइति तिरस्करणमंतर्द्धानं संवी
तांगोवेष्टितदेहः अवगुंठितः प्रावृत्तशिराः तत्रकालभे
देननियममाहयाज्ञवल्क्यः दिवासंध्यासुकर्णस्थब्रह्मसू
त्र उदङ्मुखः कुर्यान्मूत्रपुरीषेतुरात्रौचेद्दक्षिणामुखः इति
कर्णश्चदक्षिणः पवित्रंदक्षिणेकर्णेकृत्वाविण्मूत्रंविसर्जयेत्
इतिस्मृत्यंतरे पवित्रस्यदक्षिणकर्णस्थानाभिधानाद्यज्ञो
पवीतस्यापितदेवन्याय्यमितिमाधवादयः स्थानांतरमप्या
हांगिराः कृत्वायज्ञोपवीतंतुपृष्ठतःकंठलंबितं विण्मूत्रंतु
गृहीकुर्याद्यद्वाकर्णेसमाहितइति तत्रकर्णेविधानमेकव
स्त्रविषयं तदाहसौख्यायनः यद्येकवस्त्रोयज्ञोपवीतंकर्णे

कृत्वामूत्रपुरीषोत्सर्गंकुर्यात्इति प्रमादेप्रायश्चित्तमाहभरद्वा
जः मलमूत्रंत्यजेद्विप्रोविस्मृत्यैवोपवीतधृक् उपवीतंतदुत्सृ
ज्यदध्यादन्यन्नवंतदेति यत्तुदेवलवचनं सदैवोदङ्मुखः
प्रातःसायाह्ने दक्षिणामुखइति तत्रप्रातःसायाह्नशब्दौदि
वारात्रिविषयाविति माधवपारिजातकारादयः यदपियम
वचनं प्रत्यङ्मुखस्तुपूर्वाह्णेपराह्णेप्राङ्मुखस्तथा उदङ्मुख
स्तुमध्याह्नेनिशायांदक्षिणामुखइति तत्रप्राङ्मुखत्वप्रत्यङ्मु
खत्वोक्तिः सूर्याभिमुखत्वनिषेधपरेतिमाधवादयः उक्तंच
महाभारते प्रत्यादित्यंप्रत्यनलंप्रतिगांचप्रतिद्विजं मेहंति
येचपथिषु तेभवंतिगतायुष इति केचित्तुयमोक्तंप्राक्
प्रत्यङ्मुखत्वाभ्यांसहयाज्ञवल्क्याद्युक्तस्योदङ्मुखत्वस्य

अन्हीकः।

।।३।।

विकल्पइत्यसत्कुतस्तन्न सामान्यविशेषशास्त्रयोर्विकल्प
योगात् दिवसह्नस्तेपिउदङ्मुखताविधायकेहियाज्ञव
ल्कीयंसामान्यशास्त्रस्य यमवचनविशेषशास्त्रे उदङ्मुखत्व
स्यमध्याह्नविषयत्वेनसंकोचप्रतीतेः नचास्मिन्विशेषेसा
मान्योपसंहारस्तर्हिस्यादितिवाच्यं देवलेनसंदेवेतिवि
न शेषितत्वात् नहिस्पष्टस्यविधेरुपसंहारः। सामान्यविधिर
स्पष्टः संक्षिप्येतविशेषतः स्पष्टस्यतुविधिर्नान्यैरुपसंहा
रसंभवइतिमहाचार्योक्तेरितिदिक् यत्तुदेवलेनोक्तं वि
ण्मूत्रमाचरेन्नित्यंसंध्यासुपरिवर्जयेदिति तन्निरूढतर
विषयम् नवेगंधारयेन्नोपरुद्धः क्रियांकुर्यादितिस्मरणा ३
त् यत्तुयमेनोक्तं छायायामंधकारेवारात्रावहनिवाद्विजः

यथासुखमुखः कुर्यात्प्राणबाधभयेषुचेति।। तन्नीहारांधका
रादिजनितदिङ्मोहनविषयम् देशनियमोविष्णुपुराणेभि
हितः नैरृत्यामिषुविक्षेपमतीत्याधिकंभुवः दूरादावसथा
न्मूत्रंपुरीषंचसमाचरेदिति आपस्तंबोपि आरादावसथा
न्मूत्रपुरीषेकुर्याद्दक्षिणांदिशंदक्षिणापरांवेति दक्षिणस्या
अपरस्याश्चांतरालंदक्षिणपरा तांगत्वेतिविशेषः एतच्च
अहर्विषयं तथाचापस्तंबः आस्तमितेबहिर्ग्रामादारादा
वसथाद्वामूत्रपुरीषयोः कर्मवर्जयेदिति वर्जदेशास्तुम
नूक्ताः नमूत्रंपथिकुर्यादित्यादिनास्नातकप्रकरणेउक्ताः आ
पस्तंबः नचसोपानकोमूत्रपुरीषेकुर्यादिति सायणीये ग
हीत्वाजलपात्रंतुविण्मूत्रेकुरुतेयदि तज्जलंमूत्रसदृशंपीत्वा

अन्ही॰कृ॰१

॥७॥ चांद्रायणंचरेदिति ततोलोष्ठादिनापरिमृष्टगुदमेहनोगृहीत
शिश्नश्चोत्तिष्ठेत् तथाचभरद्वाजः अथापकृष्य विण्मूत्रंलोष्ठ
काष्ठतृणादिना उदस्तवासाउत्तिष्ठेद्दृढंविधृतमेहन इतिउ
दस्तवासाउच्छ्रितवासाः अत्रविशेषमाहहारीतः लोष्ठेन
परियुंजीतशुष्ककाष्ठेनवागुदं यत्तुगौतमोक्तं नपर्णलोष्ठा
श्मभिर्मूत्रपुरीषापकर्षणंकुर्यादितितदश्वत्थादियज्ञियकाष्ठा
दिविषयमितिपारिजातकारः इतिविण्मूत्रोत्सर्जनविधिः
अथशौचविधिः तत्रदक्षः तीर्थशौचविधिः तत्रदक्षः तीर्थे
शौकुर्वी शौचंनकुर्वीतोद्धृतवारिणेति अभ्युद्धरणासंभवेतु विशेषमा
हविवस्वान् रत्निमात्राज्जलस्यान्तः कुर्याच्छौचमनुद्धृते पश्चा २४॥
त्तच्छोधयेत्तीर्थमन्यथाह्यशुचिर्भवेदिति बद्धमुष्टिर्हस्तोरत्निः

न

तदुक्तममरसिंहे हस्तोमुष्ट्यातुबद्धया सरत्निस्यादरत्निस्तुनिः
कनिष्ठेनमुष्टिनेति सइतिछेदः शौचयोग्यांमृत्तिकामाहयमः
आहरेन्मृत्तिकांविप्रः कूलात्ससिकतांतथेति मरीचिः विप्रेस्तुकू
लमृच्छौचेरक्ताक्षत्रेविधीयतेति विष्णुपुराणेवर्ज्यामृदूक्ताशौचाद
शिष्टाः वल्मीकमूषकोत्खातांमृदमंतर्जलात्तथा शौचावशि
ष्टांगेहाच्चनादद्याल्लेपसंभवां अंतःप्राण्यवपन्नांचलोहोत्खातां
नकर्दमादिति अंतर्जलामृत्तिकाप्रतिषेधस्तुवापीकूपादिव्य
तिरिक्तविषयः अतएवयमः वापीकूपतडागेषुनाहरेद्बाह्य
तोमृदं आहरेज्जलमध्यात्तुपरतोमणिबंधनात् आरण्यकेषु
सर्वस्यांग्राम्येष्वाहरणंविदुरितिदेवलः आहमन्यत्रेणार्थमा ना
ददीतनमृत्तिकामिति हस्तनियममाहदेवलः धर्मविद्दक्षिणं
हस्तमधःशौचेनयोजयेत् तथाचवामहस्तोननाभेरूर्ध्वंनशो
धेतुमनुः यस्मिन्देशेचयत्तोयंयाचयत्रैवमृत्तिका सैवतत्रप्रश

स्तास्यात्तया शौचं विधियते

[illegible]

अन्हीक।।

।।५।।

धयेदिति ब्रह्मांडपुराणे द्विद्विगुणमोभिहितः उद्धृतोदकमादाय
मृत्तिकां चैव वाग्यतः उदङ्मुखो दिवा कुर्याद्रात्रौ चेद्दक्षिणामु
ख इति मृत्संख्यामाह शातातपः एका लिंगे करे सव्ये तिस्रो द्वि
हस्तयोर्द्वयोः मूत्रशौचं समाख्यातं शुक्रेतु त्रिगुणं भवेदिति
मूले एका लिंगे करे तिस्र उभयोर्मृद्द्वयं स्मृतं पंचापाने दशैक
स्मिन्नुभयोः सप्त मृत्तिका इति अत्र पूर्वार्द्धं मूत्रशौचविषयं
उत्तरार्द्धं तु पुरीषशौचविषयकं बोध्यं उदाहृतशातातपवच
नाद्यनुरोधात् माधवीये तु एका लिंगे गुदे तिस्रस्तथैकत्र करे
दश उभयोस्सप्त दातव्या मृदः शुद्धिमभीप्सतेति एवं च संख्या ।।५।।
विशेषे अधिकसंख्या मुख्यकल्पः अल्पसंख्या त्वनुकल्प
इति विवेक्तव्यं मूले अत्र विशिष्टशौचपि लिंगशौचं प्रा

तृ।

कार्यं अक्रमानुरोधात्सन्निधानाल्लिंगशौचं पुरा कार्यं गुदशौ
चं ततः स्मृतमिति आश्वलायनवचनाच्चेति बोध्यं मूले एतच्छौ
चं गृहस्थस्य द्विगुणं ब्रह्मचारिणः वानप्रस्थस्य त्रिगुणं यतीनां
च चतुर्गुणं पक्षिवा विहितं शौचं तदर्द्धं निशि कीर्तितं तदर्द्धमा
तुरे प्रोक्तमातुरस्यार्द्धमध्वनि आदित्यपुराणे स्त्रीशूद्रयोरर्द्ध
मानं प्रोक्तं शौचं मनीषिभिः द्विजशौचस्य निरूपर्द्धं पथि पादं वि
धीयते आर्त्तः कुर्याद्यथाशक्ति शक्तः कुर्याद्यथोचितं स्त्रीशूद्रा
णामशक्तानां बालानां चोपनीतितः गंधलेपक्षयकरं शौचं कु
र्यान्न संख्ययेति एकैकया मृदा पादौ हस्तौ प्रक्षालयेत्तत इति द
क्षः न शौचं वर्षधाराभिराचमेत्तु कदाचनेति मरीचिः तिस्रभि
श्चातलात्पादौ शोध्यौ गुल्फात्तथैव च हस्तौ तु आमणिबंधाच्च ले

आह्निक॥

॥६॥
पगंधापनुत्तये इति ऋष्यशृंगः धाराशौचं न कर्त्तव्यं शौचसि
द्धिमभीप्सिता चुलुकैरेव कर्त्तव्यं हस्तशुद्धिविधानत इति य
त्तु दक्षवचनं न्यूनाधिकं न कर्त्तव्यं शौचं शुद्धिमभीप्सतेति त
त्तु उक्तसंख्यायाश्चार्वाक्कृतसमासौ गंधाद्युपगमनिश्चये चे
दितव्यं तत्राप्यर्वाग्गंधाद्युपगमे संख्यानियमो दृष्टार्थः यत्र
क्र तु संख्यापूरणेपि गंधो लेपश्च नापैति तत्राह देवलः यावत्तु शु
द्धिं मन्येत तावच्छौचं विधीयते प्रमाणं शौचसंख्यायां न शिष्टैरु
पदिश्यत इति मनुरपि यावन्नापैत्यमेध्याक्तो गंधो लेपश्च
तत्कृतः तावन्मृद्वारि देयं स्यात्सर्वासु द्रव्यशुद्धिष्विति परकी
यामेध्यस्पर्शे तु विशेषमाह यमः परस्य शोणितस्पर्शे रेतो ॥६॥
विण्मूत्रजे तथा चतुर्णामपि वर्णानां द्वात्रिंशन्मृत्तिकाः स्मृता

द्र इति मृत्तिकापरिमाणमाह शातातपः आर्द्रामलकमात्रास्तु ग्रा
सादुद्धृतैस्थिताः तथैवाहुतयः सर्वाः शौचे देयाश्च मृत्ति शौ कः
चमूत्रे शौचे इति पारिजातः स्मृत्यर्थसारे आर्द्रामलकमात्रां मू नी
त्रशौचे तु मृत्तिका मूत्रात्तु द्विगुणा शुक्रे मैथुने त्रिगुणा स्मृतमिति
गुदशौचे परिमाणांतरमाह दक्षः प्रथमा प्रसृतिर्ज्ञेया द्वितीया
तु तदर्द्धका तृतीया मृत्तिका ज्ञेया त्रिभागकरपूरणीति विष्णुस्तु
अर्द्धप्रसृतिमात्रा तु प्रथमा मृत्तिका स्मृता द्वितीया च तृती
या च तदर्धार्धप्रकीर्तितेति शौचानंतरं कर्त्तव्यमाह विवस्वान्
क्षेत्रांतरगतो विप्रः क्षालयेत्तच्च भूतलं शौचं चेषां मृदं तोयैर्न
हि प्रक्षालयेद्यदि अनाशास्तस्य पितरस्तामश्नंति न संशयः
प्र क्षेत्रांतरगतः क्षेत्रांतरस्थः सन् शौचं विलंबे तु सचैलस्नानं कु

॥आन्हीक॥

॥७॥

र्यात् तदाह संवर्त्तः कृत्वा मूत्रपुरीषं वा यदा नैवोदकं भवेत्
स्नात्वा लब्धोदकः पश्चात्सचैलस्तु विशुध्यतीति अथ पाद
प्रक्षालनं स्मृतिदीपिकायां प्रथमं प्राङ्मुखः स्थित्वा पादौ
प्रक्षालयेच्छनैः ततः संनेव सजल्यं नात्मानमवलोकय श्व
न् इत्येवमद्भिराजानु प्रक्षाल्य चरणौ पृथक् हस्तावाम
णिबंधाच्च कुर्यादाचमनं तत इति आपस्तंबस्तु प्रत्यक्पादा
वनेजनमिसाह आचमनप्राक्कालीनगंडूषानाह आचार्यः
कुर्याद्द्वादशगंडूषान्पुरीषोत्सर्जने द्विजः मूत्रे चत्वार एव स्यु
र्भोजनांते तु षोडशेति मूले मदाद्रवेण शुद्धिः स्याच्छौचेन ॥७॥
वनचान्यथा यस्य शौचेपि शैथिल्यं वृत्तं तस्य परीक्षितं शौ
चेयातः सदा कार्यः शौचमूलो द्विजः स्मृतः शौचाचारवि

हीनस्य समस्ता निष्फलाः क्रियाः इति सर्वेषामेव धर्माणां शौ
चपूर्वं विधीयत इति च उक्तनियमातिक्रमे प्रायश्चित्तमुक्तं स्मृ
२ तिरत्नावल्यां गायत्र्यष्टशतं चैव प्राणायामत्रयं तथा प्रायश्चि
त्तमिदं प्रोक्तं नियमातिक्रमे सतीति व्यासस्तु अपवित्रः प
वित्रो वा सर्वावस्थां गतोपि वा यः स्मरेत्पुंडरीकाक्षं स बाह्याभ्यं
तरः शुचिः इति शौच अथाचमनविधिः याज्ञवल्क्यः अं
तर्जानु शुचौ देशे उपविष्ट उदङ्मुखः प्राग्वा ब्राह्मेण तीर्थेन
द्विजो नित्यमुपस्पृशेदिति अंतर्जान्वोर्मध्ये करं कृत्वेति शे गौनु
षः ब्राह्मतीर्थं लक्षयति स एवाह कनिष्ठादेशिन्यंगुष्ठमूलान्य
ग्रं करस्य च प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् इति
करमध्ये सौम्यमग्नितीर्थं तत्र सौम्येन [illegible] स्थाना

अन्हीक॥

॥८॥

न

दिः आग्नेयमश्रुति ग्रहं कुर्यात् आचमनीयमुदकं वि
शिनष्टिन्नंखः अद्भिः समुद्धृताभिस्तु हीनाभिः फेन
बुद्बुदैः वह्निना चासंतप्ताभिरक्षाराभिरुपस्पृशेदिति यमो
पि अपः करनखस्पृष्टाय आचमति वै द्विजः सुरापि
बति स व्यक्तं यमस्य वचनं यथेति मनुः हृद्गाभिः पूयते
विप्रः कंठगाभिस्तु भूमिपः वैश्योऽद्भिः प्राशिताभिस्तु शू
द्रः स्पृष्टाभिरन्ततइति प्रचेता अपि अनुष्णाभिरफेनाभिः
पूताभिर्वस्त्रचक्षुषा हृद्गताभिरशब्दाभिस्त्रिश्चतुर्वाद्भि
राचमेदिति त्रिश्चतुर्वेत्यैच्छिको विकल्पः इति माधवः य
त्र समंत्रकमाचमनं विहितं तत्र तेन सह चतुः अन्यत्र त्रि
रिति व्यवस्थेति हरदत्तः यमः रात्रौ चावीक्षितेनापि शुद्धि

॥ वस्त्रेनं चक्षुषा पेयथः ॥ त्रिः पि
बेतोदकं बुविक्षितमिति दक्षोक्तेः ॥

रुक्तामनीषिणां उदकेनातुराणां च तथोष्णेनोष्मपायिनामिति
भरद्वाजः आपूतं सर्वतः कृत्वा गोकर्णाकृतिवत्करं संहृतांगु
लिना तोयं गृहीत्वा पाणिना द्विजः मुक्तांगुष्ठकनिष्ठेन तु शेषेणा
चमनं चरेत् माषमज्जनमात्रास्तु संगृह्य त्रिः पिबेदपः आ
चमनं च चतुर्भिः श्लोकैराकुमलकारः प्रक्षाल्य पादौ हस्तौ च
त्रिः पिबेदम्बु वीक्षितं संमृज्यांगुष्ठमूलेन द्विः प्रमृज्यात्ततो मु
खं संहृताभिः स्त्रिभिः पूर्वं आस्यमेवमुपस्पृशेत् अंगुष्ठे
न प्रदेशिन्या घ्राणं स्पृष्ट्वा त्वनंतरं अंगुष्ठानामिकाभ्यां तु चक्षुः
श्रोत्रे ततः परं कनिष्ठांगुष्ठयोर्नाभिं हृदयं तु तलेन वै सर्वा
भिश्च शिरः पश्चाद्बाहू चाग्रेण संस्पृशेत् अनेनैव विधाने
न आचांतः शुचितामियादिति अस्यार्थः त्रिः पीत्वा ततः

छा

अन्हीक०।
॥९॥

संमज्यहस्तौप्रक्षाल्यांगुष्ठमूलेनालोमकेनमुखंद्विःप्रमज्या
त् एवमितिपुनर्हस्तौप्रक्षाल्येत्यर्थः संहताभिस्त्रिभिर्वक्ष्य
माणात्पूर्वंमुखंसकृदवमृज्यात् एवंसर्वत्रमध्येहस्ताभ्या
मपुपस्पृशेत् बाहूचेति बाहुमूलेसर्वांगुल्यग्रैःस्पृशे
दित्यर्थः स्फुटंचैतत्स्मृत्यर्थसारे अत्रोक्तौतु त्रिःपीत्वाहस्तौ
प्रक्षाल्यश्रोत्रंस्पृशेदितिपक्षांतरं तत्रैवोक्तः प्रयागपारिजा
तेव्याघ्रपादः केशवादित्रिभिःपीत्वाचतुर्थेनमृजेत्करपं
चमेनचषष्ठेनद्विरोष्ठौतुन्मृजेत्क्रमात् ततोसप्तमेनाभिमृ
जेदेकवारंतुमंत्रवित् अष्टमेनतुमंत्रेणाभिमंत्र्यजलंशु ॥९॥
चि वामंसंप्रोक्षयेत्पाणिं मननानवमेनच दक्षिणंदशमे
नांघ्रिंवाममेकादशेनैवमूर्धानंद्वादशेनाथस्पृशेदूर्ध्वौ

ष्ठमष्टमं संकर्षणायनमइत्यनेनांगुलिमूर्धभिः अंगुष्ठत
र्जन्यग्राभ्यांसन्निष्ठाभ्यांजलैःसह नासारंध्रेवासुदेवप्रद्यु
म्नाभ्यांस्पृशेदुभे अंगुष्ठानामिकाभ्यांतुसंश्लिष्टाभ्यांज
लैःसह अनिरुद्धायनमइतिसंस्पृशेदक्षिदक्षिणं।पुरुषो
त्तममंत्रेणताभ्यांवामंस्पृशेद्दृशंतथांगुष्ठकनिष्ठाभ्यांश्लि
ष्टाभ्यांजलैःसह अधोक्षजनृसिंहाभ्यांश्रोत्रेद्वेसंस्पृशे
त्क्रमात् नाभिमच्युतमंत्रेणताभ्यामेवस्पृशेद्बुधः श्रीज
नार्दनमंत्रेणतलेनहृदयंस्पृशेत् उपेंद्रायेतिमूर्धानंस्पृशे
त्सजलपाणिना सर्वांगुल्यग्रभागेस्तुसमाश्लिष्टैर्जलैःस
ह भुजौतुहरिकृष्णाभ्यांसंस्पृशेद्दक्षिणोत्तरौ आचामन्निस
मेवंयोभगवन्नामभिःक्रमात् सद्यःपूतःसविहितकृत्तरे

ष्वधिकारवान्‌इति एवंस्मृत्यंतरेषुप्रकारांतराण्युक्तानितेषांय
थाचारंव्यवस्थेतिमाधवः आपस्तंबः स्वप्नेक्षवथौसिंघा
णिकालंभेलोहितस्यकेशानामग्नेर्गवांब्राह्मणस्य स्त्रियाश्चस
र्शेमाहापथंगत्वामेध्यंचोपस्पृश्याप्रयतंमनुष्यंनीवींचपरि न
धायउपस्पृशेदार्द्रंवाशकृदोषधीर्भुमिंचेति वृहथुः स्मृतंसिं
घाणिकानासामलंकेशानांभूमिगतानांअमेध्यगोव्यतिरि
क्तानांअग्निप्रभृतीनांचतुर्णांस्पर्शेयदाचमनंतन्निमित्तमं
है तरेणस्पर्शे[illegible]यमितिपृथ्वीचंद्रोदयेमूलं अकृत्वापादशौ
चंतुतिष्ठन्मुक्तशिखोपिवा विनायज्ञोपवीतेन आचांतोप्यशु ॥१०॥
चिर्द्विजः आचांता अपीमेचत्वारोऽशुचयः अकृतपादशौ
चः तथातिष्ठन्मुक्तशिखः यज्ञोपवीतहीनश्चेत्यर्थः आच

मननिमित्तान्याहयमः उत्तीर्योदकमाचामेदवतीर्यतथैवचे
रिति वृहस्पतिः अधोवायुसमुत्सर्गे आक्रंदेक्रोधसंभवे मा
र्जारमूषकस्पर्शेप्रहासेनृतभाषणे निमित्तेष्वेषुसर्वेषुक
र्मकुर्वन्नुपस्पृशेदितियाज्ञवल्क्योपिस्नात्वापीत्वाक्षुतेसु
प्तेभुक्त्वारथ्यापसर्पणे आचांतःपुनराचामेद्वासोविपरिधा
यचेति विप्राविप्रेणसंस्पृष्टःउच्छिष्टेन आचम्यैवतुशुद्धःस्या कथंचन
दापस्तंबोब्रवीन्मुनिरिति आचमनासंभवेतुकुर्वीतालंभ
नंवापिदक्षिणश्रवणस्येतिमार्कंडेयोक्तेर्बोध्यं।नीवीवि
परिधायोपस्पृशेदार्द्रंतृणंगोमयंवासंस्पृशेदितिबौधाय भुमिं
नोक्तंवाद्रष्टव्यं देवलः भोजनेदंतलग्नानिनिर्हृत्याचम
नंचरेद्दंतलग्नमसंहार्यंलेपंमन्येतदंतवत् नतत्रब

अन्हीक।।

।।११।।

हस्ताः कुर्याद्यलमुद्धरणे पुनः भवेच्चान्तोचमत्यर्थं तत्पृणवेधा
दंतलग्ने दंतवदिति रसानुपलब्धिविषयं बोध्यम् त
दाह शंखः दंतवद्दंतलग्नेषु रसवर्जमन्यं जिह्वाभिमर्शना
त्फलादौ विप्रोष्माहुः शातातपः दंतवद्दंतलग्ने फले मूले
भुक्तेस्नेहावसिष्टके तांबूले चेक्षुदंडे च नोच्छिष्टो भवति द्वि
जः इति गौतमः न मुख्या विप्रुष उच्छिष्टं कुर्वंति चेदंगे नि
पतंतीति मनुः स्पृशंति बिंदवः पादौ य आचामयतः प
रान् भौमिकैस्ते समाज्ञेया न तैरप्रयतो भवेदिति पाद
ग्रहणमविवक्षितं तथा च यमः अपांत्याचामतो याश्च
शरीरे विप्रुषा नरस्य उच्छिष्टदोषो नास्त्यत्र भूमितुल्या
स्तु ता इति आपस्तंबः न श्मश्रुभिरुच्छिष्टो भवत्यंतरा
श्रन्ताः

त्रै

त

।।११।।

स्यसद्भिर्यावन्न हस्तेनोपस्पृशतीति वसिष्ठः वेदाभ्यासे मु
खाज्जाताः शुद्धा एव तु विप्रुषः न श्मश्रु चास्यगतं शुद्धं यद्यंगे
न तु संस्पृशेदिति गौतमः न तिष्ठन्नुद्धृतोदकेनाचामेदिति
इदं च स्थलविषयं जले तु तिष्ठन्नप्याचामेत तदाह विष्णुः
जान्वोरूर्ध्वं जले तिष्ठन्नाचांतः शुचितामियात् अधस्ता
च्छतकृत्वोपि समाचांतो न शुध्यातीति हारीतः आर्द्रवासा
जले कुर्यात्तर्पणाचमनं जपं शुष्कवासाः स्थले कुर्यात्तर्पणा
चमनं जपमिति कौशिकः अपवित्रकरः कश्चिद्ब्राह्मणो य
दू उपस्पृशेत् अकृतं तस्य तत्सर्वं भवत्याचमनं तथा वामहस्ते
स्थिते दर्भे दक्षिणेनाचमेद्यदि रक्तं तु तद्भवेत्तोयं पीत्वा चांद्रा
यणं चरेत् इति हस्तद्वये पवित्रं अत्रास्ति गोभिलः उभय

अन्हीक ।।

।।१२।।

ह्न

ने

त्रस्थितैर्दर्भैः समाचामतियोद्विजः सोमपानफलंतस्यभुक्त्वा
येफलंलभेदिति स्नानानंतरंभाविन्याचमेविशेषमाहदक्षः
स्नात्वाचामेत्स[illegible] विप्रः पादौकृत्वाजलेस्थले उभयोरप्य
सौशुद्धस्ततः सोमोभवेदिति इममेवार्थमाहुर्मूले जलेजल
स्थोनाचामेज्जलाचांतः स्थलेशुचिः पादौस्थाप्योभयत्रैवआ
चांतः शुचितामियात् जलाचांतोयस्मात्स्थलेशुचिर्नभव
तितस्माज्जले आचमनंनकुर्यादित्यर्थः स्थाप्येति आर्षोल्य
प् उभयत्रजलस्थलयोरित्यर्थः अत्रैवविशेषपारिजातेवि
न्यस्यदक्षिणंपादंजलेवामपदंबहिः उपवीतीसमाचामेद्वि
धिरेषसनातनइतिमाधवीये अलाबुताम्रपात्रंचकरकं ।।१२।।
चकमंडलं गृहीत्वास्वयमाचामेत्तेनाप्रयतोभवेदिति प्र

योगपारिजातेतुविशेषः स्मर्यते करकालाबुपात्रेणताम्रच
र्मपुटेनच गृहीत्वास्वयमाचामेत्तद्भूमिलग्नेनतान्यथेति तथा
तत्रैवाश्रद्धाहृतैस्तनाचामेत् एकपाण्याहृतैस्तथा नचैवा
श्रुतहस्तेननापरिज्ञातहस्तेनइति अत्रसोनुपनीतः इत्या
चमनप्रकरणं अथदंतधावनंविष्णुः कंटकिक्षीरवृक्षोत्थं क्षो
द्वादशांगुलमव्रणं कनिष्ठांगुलवत्स्थूलंपर्वार्द्धकृतकूर्च लि
कं दंतधावनमुद्दिष्टं जिह्वोल्लेखनिकातथेति व्यासः
सुसूक्ष्मसूक्ष्मंदंतस्यसमंदंतस्यमध्यमं स्थूलंविषम
दंतस्यत्रिविधंदंतधावनमिति आश्वलायनः [illegible] ए
वमाचम्यदंतानांकाष्ठेनविमर्जनंमलं प्राग्वादङ्मुखश्चासी

अन्हीक॥

॥१३॥

नेः आयुर्दअुखएववा वितस्तिमात्रमुद्दिष्टं दंतकाष्टं द्विजन्मनां
स्त्री शूद्रयोस्तदर्धंस्यान्नातिशुष्कंनजंतुमत् कनिष्ठांगुलिवत्स्थू
लंतदग्रलतकूर्चकमिति अंगीरः प्रक्षाल्यभक्षयेत्काष्टंप्रक्षाल्ये
वतुसंसृजेत् आयुरित्यादिमंत्रोयमुक्तःशाखाभिमंत्रणे वि
नाभिमंत्रणंतूष्णींवृथास्याद्दंतधावनंइति आयुरितिमंत्रस्य
प्रजापतिऋषिः वनस्पतिर्देवता अनुष्टुप्छंदः काष्ठाभिमंत्र
णेविनियोगः आयुर्बलंयशोवर्चः प्रजाः पशुवसूनिच ब्र
ह्मप्रज्ञांचमेधांचत्वंनोदेहिवनस्पते इत्यभिमंत्र्यउपरिदंता
नारभ्यनिर्मृजेत् ततऊर्ध्वंक्रमेणैवधावये[illegible]खयातश्चे
यंगिरःस्मरणात् ततःकाष्ठंप्रक्षाल्यनैरृत्यांत्यजेत् राक्ष
स्यामुत्सृजेत्काष्टमिति आश्वलायनस्मरणात् काष्टविनि १२

पा आश्वलायनेनोक्तः सर्वेकंठकिनःपुण्याः क्षीरिणश्चयश
स्विनः उदुंबरेणवाक्सिद्धिर्बलमे[illegible]सिनवैधनं अर्कजेनवि
रोगत्वंवटेनमहतीश्रियम् आपामार्गेसर्वसिद्धिःस्त्रीवश्यंच
प्रियंगुभिः इत्यादि पारिजातादौविस्तारोबोध्यः अथदंत
धावनवर्ज्यतिथ्यः आचार्यः अष्टम्योश्चचतुर्दश्योपंचदश्यो।
स्त्रिजन्मसु व्यतीपातेचसंक्रांत्यांदंतकाष्टंनभक्षयेत् ना
द्यादजीर्णवमथुश्वासकासज्वरार्दितः पुरोदयात्तुरस्वधा
नोदितेस्तमितेरवौ दीक्षितोब्रह्मचारीचयतिश्चविधवांग ब्र
ना नियमघाद्दंतकाष्ठममायांतुविवर्जयेत् इति विष्णुः प्र
तिपद्दर्शषष्ठीषुचतुर्दश्यष्टमीषुच द्वादश्यांचनवम्यांचवर्ज
येद्दंतधावनं यमः श्राद्धेजन्मदिनेचैवविवाहेजीर्णदोषके

अन्हीक॰।
॥१७॥

व्रतेष्वैवोपवासेषु वर्जयेद्दंतधावनं व्यासः अलाभे दंतकाष्ठा
नां निषिद्धायां तिथौ तथा अपां द्वादशगंडूषैर्विदध्याद्दंतधा
वनं स्मृत्यर्थसारे तु तृणपर्णैर्मध्यमानामिकांगुष्ठैर्वा निषि
द्धाहेपि कुर्युरिति स्थितं इति दंतधावनं अथ पवित्रं व्या
सः कुशैः पूतं भवेत्स्नानं कुशेनोपस्पृशेद्द्विजः कुशेन चो
द्धृतं तोयं सोमपानेन संमितं शंखः कुशाभावे द्विजश्रेष्ठः
काशैः कुर्वीत तत्त्ववित् इति यमः कुशाः काशास्तथा दू
र्वा यवाव्रीहय एव च बल्वजाः पुंडरीकाणि सप्तधा बर्हिरि
ष्यते इति पारिजाते मासि मास्याहृता दर्भास्तत्तन्मासे
वचोदिता इति हारीतकात्यायनौ मासे नभस्यमावास्यात ॥१७॥
स्यां दर्भोच्चयो मतः अयातयामास्ते दर्भा विनियोज्याः पुनः

पुनरिति कात्यायनः अनंतर्गर्भिणं साग्रं कौशं द्विदलमेव च
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्र चित् कुशानां स्त्रीपुंनपु
सकत्वविवेकस्त[illegible]युक्तविनियोगविशेषश्च पारिजातादौ त्रि
बोध्यः मार्कंडेयः चतुर्भिर्दर्भपिंजूलैर्ब्राह्मणस्य पवित्रकं
एकैकन्यूनमुद्दिष्टं वर्णे वर्णे यथा क्रमं त्रिभिर्दर्भैः शांतिक
र्म पंचभिः पौष्टिकं तथा चतुर्भिरभिचारांस्तु कुर्वन्कु
र्यात्पवित्रकं इति अत्रिः ब्रह्मयज्ञे जपे चैव ब्रह्मग्रंथिर्विधी
यते भोजने वर्तुलः प्रोक्त एवं धर्मो न हीयते पारिजाते हे
मेन सर्वदा सर्वान्कुर्यादविचारयन् रौप्यं हेमप्रदेशिन्यां
बिभृयाद्दीक्षितो द्विज इति दक्षा दक्षिणा तत्रैव उत्तरी

[illegible]
[illegible]

अन्हीका
॥१५॥

यंयोगपट्टंतर्जन्यांरजतंतथा नजीवत्पितृकैर्धार्यंज्येष्ठोवाविध
वेयदीति मार्कंडेयः को[illegible]न्हिकः शुचौदेशेशुचिर्भूत्वास्थित्वा
पूर्वोत्तरामुखः ॐकारेणैवमंत्रेणकुशान्स्पृष्ट्वाद्विजोत्तमः
विरिंचिनासहोत्पन्नपरमेष्ठिनिसर्गज नुदपापानिसर्वा
णिदर्भस्वस्तिकरोमम इमंमंत्रसमुच्चार्यततःपूर्वोत्तरामु
खः हुंफट्कारेणदर्भांस्तुसंछित्वासमुद्धरेदिति हेमाद्रौ
अन्यान्यपिपवित्राणिकुशदूर्वामयानिच हेमात्मकपवित्रस्य
कलांनार्हंतिषोडशीं इतिपवित्रविधिः अथस्नानं मूलं
उषःकालेतुसंप्राप्तेशौचंकृत्वायथार्थवत् ततःस्नानंप्र ॥१५॥
कुर्वीतदंतधावनपूर्वकम् इति अर्थःप्रयोजनं तद्योग्यं

यथार्थं सफलंकर्म तदर्हं यथार्थवत् अर्हार्थेवतिः सांगमिति
फलितोर्थः उषस्युषसियत्स्नानंसंध्यायामुदितेपिवा प्राजापत्ये
नतत्तुल्यंसर्वपापप्रणाशनमिति उदितेत्वस्यनुकल्पः तत्रप्रसं
संध्याप्युत्कृष्यते अतएवमुख्यकल्पेत्वान्कंभेतितंनिषेधतियो
गयाज्ञवल्क्यः संध्योसंध्यामुपासीतनास्तंगतेनोदितेरवाविति
अस्नात्वानाचरेत्कर्मजपहोमादिकिंचन लालास्वेदसमाकी
र्णःशयनादुत्थितःपुमान् स्रवंतिहिसुषुप्तस्यइंद्रियाणिस्र
वंतिच अंगानिसमतांयांतिचोत्तमान्यधमैःसह अस्नानमलि
नःकायोनवछिद्रसमन्वितः स्रवत्येवदिवारात्रौप्रातःस्नानंवि
शोधनं प्रातस्नानंप्रशंसंतिदृष्टादृष्टफलंहितत् सर्वमर्हतिशु
द्धात्माप्रातस्नायीजपादिकं गुणादशास्नानपरस्यसाधोरूपं

सं

।।अन्हीक।।

।।१६।।

प
चतेजश्चबलंचशौचं आयुष्यमारोग्यमलोलुत्वंदुःस्वप्नना
यशश्च शश्चैमेधा स्नानंनदीदेवखातह्रदेषुचसरस्सुपंचपिंडाननु च
द्धृत्यनस्नायात्सारवारिणीति अत्रतृतीयचरणस्यासपूर्वो
त्तरपदाभ्यांसंबंधोबोध्यः मूलकोषस्कस्पष्टार्थः स्नानप्रका
रमाकूर्मूले स्नानमव्देवतैर्मंत्रैर्वारुणैश्चमहासह कुर्याद्वाह
तिभिर्वाथिय त्किंचेदम्भवापिवा योगयाज्ञवल्क्यः तत्वायामी
तिमंत्रेणवारुणेनतटेस्थितः उदुत्तममितिस्मृत्वाघवतीर्य
जलान्तराये आवाह्यवारुणंस्नानमाचरेद्विधिपूर्वकमिति
गंगावाक्यं नंदिनीनलिनीसीतामालतीचमहापगा वि
ष्णुपादाब्जसंभूतागंगात्रिपथगामिनि भागीरथीभोगवती ।।१६।।
जान्हवीत्रिजरेश्वरी द्वादशैतानिनामानियत्रयत्रजलाशये

स्ना

स्नानोद्यतस्मरेन्नित्यंतत्रतत्रवसाम्यहमिति देवलः एकांनदीसमा
साद्यनान्यांस्नानेनदीस्मरेत् आपो अस्मानिति स्मृत्वाभास्करा
भिमुखस्थितः इदं विष्णुर्जपित्वातुप्रतिस्रोतोनिमज्जतीति अ
प्रवाहोदकेस्नानंविप्रपादाभिषेचनं आदित्याभिमुखःकुर्यात्संध्या
वंदनमेवचेति याज्ञवल्क्यः भूमिष्ठमुद्धृतात्पुण्यंततःप्रस्रव
णोदकं ततोपिसारस्वंपुण्यंतस्मान्नादेयमुच्यते तीर्थतोयंत
तःपुण्यंततोगांगंतुसर्वतः मरीचिः भूमिष्ठमुद्धृतंवापिन्नी
तमुष्णमथापिवा गांगंपयःपुनात्याशुपापमामरणांतिकं
इतिशौनकः स्नात्वाचांतोवारिमध्येत्रिःपठेदघमर्षणमिति
अनुकल्पमाहयोगयाज्ञवल्क्यः यएषविस्तृतःप्रोक्तःस्नान
स्यविधिरुत्तमः असामर्थ्यान्नकुर्याश्चेत्तत्रायंविधिरुच्यते

४ये

स्नानमंतर्जले चैव मार्जनाचमने तथा जलाभिमंत्रणं चैव तीर्थ
स्य परिकल्पनं अघमर्षणसूक्तेन त्रिरावृत्तेन नित्यशः स्नाना
चरणमित्येतदुपदिष्टं महात्मभिरिति मूलं स्नानानंतरं ताव द्द
ये त्तर्पयेत्सित्तदेवताः उत्तीर्यपीडयेद्वस्त्रं संध्याकर्मततः परमिति
पित्तदेवता इति ऋषीणामप्युपलक्षणं कर्मश्चाविवक्षितः ते
नदेवान्षीन्पितंश्चेत्यर्थः देवर्षींस्तर्पयेदप्सु पितॄंश्चैव समा
हितइति स्मृतेः एतच्च माधवाद्युदाहृतपाठमनुसंव्याख्या स्य
ते मूले तु पाठांतरं देवानृषीन्पितंश्चैव जलमध्ये तु तर्पयेत् उत
रार्धे तु उत्तीर्येत्यादि प्राग्वत् तत्र यथाकृतं सुष्ठुतर्पणं चाह प्रकारं
शाताः द्वौ हस्तौ युग्मतः कृत्वा पूरयेदुदकांजलिं गोशृंगमात्र ॥१७॥
मुद्धृत्य जलमध्ये जलं क्षिपेत् व्यासः यज्ञोपवीतिदेवानां नि

वीती ऋषितर्पणे प्राचीनावीति पित्र्ये तु स्वेन तीर्थेन भावितः सुमंतुः
आकाशे निक्षिपेद्वारि जलस्थो दक्षिणामुखः पित्तणां स्थानमाकाशं
दक्षिणादिक्तथैव च त्रीन्त्रीन्जलांजलीन्दद्यादुच्चैरुत्तरं बुधः का
र्ष्णाजिनिः देवतानां पित्तृणां च जले दद्याज्जलांजलीन् असंस्कृत
प्रमीतानां स्थले दद्याज्जलं पुनः बौधायनः जलांजलित्रयं दद्याद्ये
चान्ये संस्कृता भुवि असंस्कृतप्रमीतानामेकमेव तटे क्षिपेत् तत्र
मंत्रः अग्निदग्धाश्च ये जीवा ये प्यदग्धाः कुले मम भूमौ दत्तेन तोयेन
तृप्तायांतु परां गतिमिति ततो जलाद्बहिर्वामपादं निधायाचम्य य
क्ष्माणं तर्पयेत् तद्विधिमाह भगवान् स्नानांगतर्पणं कृत्वा यक्ष्म
णे जलमाहरेत् तन्मंत्रस्तु यन्मया दूषितं तोयं शारीरमलसंभ
वात् ॥ तद्दोषपरिहारार्थं यक्ष्माणं तर्पयाम्यहं ततो नदीप्रार्थना

आन्हीक॰।

॥१८॥

॥ कूर्म्मपुराणे ज्ञानतोज्ञानतोवापियन्मेदुश्चरितंकृतं तत्क्षमस्वा
खिलंदेविजगन्मातर्नमोस्तुते अथस्नानदर्भमोचनं तथाच
स्मृतिः विकिरेपिंडदानेचतर्पणेस्नानकर्म्मणि आचांतःसन्
कुर्वीतदर्भसंत्यजनंबुधः इतिविष्णुः स्नातःशिरोनावधूनेन्ना
गेभ्यस्तोयमुद्धरेत् नचपूर्वधृतंवासोनचतैलमुपस्पृशेत्
स्नात्वानधावयेद्वस्त्रंनमृज्याद्वाससामुखं मार्कंडेयपुराणे
अवमृज्याच्चस्नातोगात्राण्यंबरपाणिभिः नचनिर्द्धुनुयात्के
शान्वासश्चैवननिर्धुनेदिति अत्रकारणमाहुर्गोभिलः पिबंति
शिरसोदेवाःपिबंतिपितरोमुखात् मध्यतःसर्वगंधर्वा अध
स्तात्सर्वजंतवइति शातातपोपि तिस्रःकोट्योर्द्धकोटीचया
वद्रोमाणिमानवे स्रवंतिसर्वतीर्थानितस्मान्नपरिमार्जयेत् ॥१८॥

परिमार्जयेद्गोदोहमात्रंतिष्ठेत्तथैवशिखाचारइतिपारिजातादयः
गात्र अयंचमार्जननिषेधःशिरोव्यतिरिक्तपरः तथाचविष्णुःस्ना
तश्चशिरोनावधुनेन्नांगेभ्यःस्तोयमुद्धरेदित्युक्त्वासोहतोधौ
तवाससीबिभृयादित्याह अत्रउष्णीषधारणंजलापनयना
र्थंनतुकर्म्मांगं तथाचमहाभारते आप्लुतःसोधिवासेनजलेन
चसुगंधिनाराजहंसनिभंप्राप्यउष्णीषंशिथिलार्पितं जलक्ष
यनिमित्तंवैवेष्टयामासमूर्द्धनीति गात्रमार्जनंनवस्त्रमात्रेण
निषिद्धंकिंतुस्नानवस्त्रेणतथाचविष्णुपुराणेस्नातोनांगानि
संमृज्यात्स्नानशाटेनपाणिनेतितथाचमार्कंडेयवचनेपिअंब
रपदंस्नानवस्त्रपरमेवएवंचनस्नातोगात्रमवमृज्यादित्यादि
सादिहरितादिवचनान्यपिस्नानशाटादिविषयाण्येवसाक्षुःअ च

वरपाणिनस्त्वर्थः परिधेयवस्त्रविशेषमाह देवलः स्वयंधौते
नकर्त्तव्याः क्रिया धर्म्या विपश्चिता नतु नेजकधौतेन नाहतेन न च
क्वचिदिति नेजकोरजकः नाहतेनेति समस्तं पदं अहतलक्षणं
च प्रागेवोक्तं प्रतिवर्णवस्त्रवर्णानाह भृगुः ब्राह्मणस्यासितं वस्त्रं
नृपतेरक्तमुल्बणं पीतं तु वैश्यशूद्रस्य नीलं मलवदिष्यते विक
च्छानुत्तरीयश्च नग्नश्चावस्त्र एव श्रौतं स्मार्त्तं त न नग्नश्चिंतये थाकर्म
दपि नग्नस्यान्मलवद्वासा नग्नः कौशेयकेवलः नग्नो द्विगुणवस्त्रः
स्यान्नग्नो दग्धपटस्तथा नग्नश्च स्यूतवस्त्रः स्यान्नग्नो ग्रथितव
ख्व स्त्रकः नग्नं बद्धवस्त्रस्यान्नग्नः कौपीनकेवलः कषायवस्त्रः स
शाश्च दशनग्नाः प्रकीर्तिताः परिधानप्रकारमाह जातूकर्ण्यः १९
परिधानाद्बहिः कक्षा निबद्धा सुरी मता धर्म्मणि विद्व[illegible]र्व
ह्या कर्म्म

के
र्जनीया प्रयत्नतः योगयाज्ञवल्क्यः जानुमूलं तु वस्त्रं स्यात्त्रिक धं
धारयेद्द्विजः तन्न्यूनमधिकं चैव कर्म्म[illegible]सो भवेद्द्विजः त्रिकच्छस्वरूप
माह मनुः नाभौ च वामकुक्षौ पृष्ठे चैव यथा क्रमं वस्त्रप्रावरणं य से
त्स्यात्तत्त्रीकच्छमुदाहृतमिति आर्द्रवस्त्रोत्तारणे विशेषः स्म
र्यते स्नानं कृत्वार्द्र वस्त्रं तु ऊर्ध्वमुत्तारयेद्द्विजः आर्द्रवस्त्रम
धस्ताच्चेत्पुनः स्नानेन शुध्यति जाबालिः निष्पीडितं धौतवस्त्रं
ति यदा स्कंधे निक्षिपेत् तदासुरं भवेत्कर्म्म पुनः स्नानं विशोधनं
वस्त्रं चतुर्गुणीकृत्वा निष्पीडयेद्दशां तथा वामप्रकोष्ठे निक्षि
प्य स्थलस्थश्च द्विराचमेत् वस्त्रं त्रिगुणितं यस्तु निष्पीडयति
मंदधीः वृथा स्नानं भवेत्तस्य स्नातस्यार्द्रशामंबुनि विष्णुपुरा
णे होमदेवार्चनाद्यासु क्रियासु पठने तथा नैकवस्त्रः प्रवर्तेत

४स

२नकुर्यासित्कर्मोधीदानहोमजपादिकं२

नद्विजोनाचमनेजपे गोभिलः एकवस्त्रोन भुंजीतनकुर्याद्देवता
र्चनं शातातपः सव्यादंसात्परिभ्रष्टंनाभिदेशोव्यवस्थितं एक
वस्त्रंतुतंविद्याद्दैवेपित्र्येचकर्मणि एतच्च उत्तरीये॰ नजीवत्पि
तृभिर्धार्यंज्येष्टोवा विधतेयदि अनुकल्पमाहयोगयाज्ञवल्क्यः
अलाभेधौतवस्त्रस्यशाणक्षौमाविकानिच कुतपंयोगपट्टंच
द्विवासास्तेनवैभवेत् स्मृत्यंतरे यज्ञोपवीतेद्वे धार्येश्रौतेस्मा
र्त्तेचकर्मणि तृतीयमुत्तरीयार्थेवस्त्राभावेतदिष्यते इति पारस्क
रस्त्वाह एकंचेद्वासोभवतितस्यैवोत्तरवर्गेणप्रछादयीत यत्तुजा
बालिः स्नात्वानिर्वस्यवस्त्रंचजंघेशोध्येमृदंभसा अपवित्री
कृतेतेतुकौपीनस्त्रानवारिणेति तद्यतिविषयंकृमनुः
निष्पीड्यस्नानवस्त्रंतुपश्चात्संध्यांसमाचरेत् अन्यथाकुरु

जीवत्पितृकैर्नधार्यमितिस्मर्यते।पारिजाते।
उत्तरीयंयोगपट्टंतज्जेन्यारजनंतथा ।।

तेयस्तस्नानंतस्याफलंभवेत् गृह्यपरिशिष्टे अथतीरमेसदक्षि
णामुखः प्राचीनावीति येकेचास्मत्कुलेजाता अपुत्रागोत्रिणोमृ
ताः तेगृह्णंतुमयादत्तंवस्त्रनिष्पीडनोदकमिति वस्त्रंनिष्पीड्यो
पस्पृश्यपरिधानीयमभ्युक्ष्यपरिधायान्यच्चोत्तरीयमभ्युक्षि
तंप्रावृत्यद्विराचामेदिति मनुस्तु मनुष्यतर्पणेचैवस्नानव
स्त्रनिपीडने निवीतीचभवेद्विप्रस्तथामूत्रपुरीषयोरिति तद
तदाश्वलायनभिन्नविषयम् आश्वलायनानांतुप्राचीनावीति
नैववस्त्रनिष्पीडनं गृह्यपरिशिष्टवचसः प्राबल्यादितिपारिजा
ते अथस्नानभेदाः शंखः स्नानंतुद्विविधंप्रोक्तंगौणमुख्य
प्रभेदतः तयोस्तुवारुणंमुख्यंतत्पुनःषड्विधंभवेत् तेचषट्प्रका
राः आग्नेयपुराणेदर्शिताः नित्यंनैमित्तिककाम्यंक्रियांगंमलक

आह्नीक॥
॥२१॥

ण

र्षणं क्रियास्नानंतथाषष्ठंषोढास्नानंप्रकीर्तितं एषांलक्ष्ममाहशं
खः अस्नातस्तुपुमान्नार्होजप्याग्निहवनादिषु प्रातस्नानंतदर्थं
तुनित्यस्नानंप्रकीर्तितं चंडालशवयूपादिस्पृष्ट्वास्नातांरजस्व
लां स्नानार्हस्तुयदास्नातिस्नानंनैमित्तिकंहितत् पुष्पस्नाना
दिकंयत्तुदैवज्ञविधिचोदितं तद्धिकाम्यंसमुद्दिष्टंनाकामस्तत्प्र
योजयेत् जप्तुकामः पवित्राणि अर्चिष्यन्देवताःपितॄन् स्नान
समाचरेद्यत्तुक्रियागंतत्प्रकीर्तितं मलापकर्षणंनामस्नानम
भ्यंगपूर्वकं मलापकर्षणार्थायप्रवृत्तिस्तस्यनान्यथा सरस्सु
देवखातेषुतीर्थेषुचनदीषुच क्रियास्नानंसमुद्दिष्टंस्नानंतत्र
मताक्रिया इतिवारुणस्यषड्भेदानिरूपिताः तत्राश्रमभेदेन
व्यवस्थामाहदक्षः प्रातर्मध्यान्हयोःस्नानंवानप्रस्थगृहस्थयोः

॥२१॥

यतेस्त्रिषवणंप्रोक्तंसकृत्तुब्रह्मचारिणः इति विष्णुः ब्रह्मक्षत्रविशां
चैवमंत्रवत्स्नानमिष्यते तूष्णीमेवहि शूद्रस्यस्त्रीणांचकुरुनंदन
तिव्यासः मंत्रपूतंजलेस्नानंप्राहुःस्नानफलप्रदं नचयावारिम
ग्नानांयादसामिवतत्फलं कात्यायनः अल्पत्वाद्धोमकालस्यब
हुत्वात्स्नानकर्मणः प्रातःसंक्षेपतःस्नानंहोमलोपोविगर्हित
इति संक्षेपतस्नानप्रकारश्चयोगयाज्ञवल्क्याद्युक्तः प्रागे
वाभिहितोनुकल्पस्तत्रामुख्यकल्पस्तत्त्वाते गृह्यपरिशिष्टे
अथस्नानविधिः तत्रप्रातर्मध्यान्हेचगृहस्थःकुर्यादेकतरत्त्वा
प्रातरेवब्रह्मचारी यतिस्त्रिसवनेक्षुद्धिस्त्रिर्वानप्रस्थः तत्र
प्रातःसहगोमयेनकुर्यान्मृदामध्यंदिने सायंशुद्धाभिरद्भिः
नप्रातस्नानाद्याप्राक्संध्यामुपासीत प्रातरुत्सृष्टंगोमयंत्वंतरि

क्षस्थंसंगृह्यमृन्मिष्टंचोपर्य्यघ्नश्चसंत्यज्यतीर्थमेत्यधौतपादपा
णिमुखमाचम्यसंध्योक्तवदात्ममभ्युक्षणादि चकृत्वाद्विराच
म्यसंयतप्राणःकर्मसंकल्प्य गोमयंवीक्षितमादायसव्यपा
णौकृत्वाव्याहृतिभिस्त्रिधाविभज्यदक्षिणंभागंप्रणवेनदि
क्षुविक्षिप्यान्तरंतीर्थेक्षिप्त्वामध्यमंमानस्तोकइत्यृचामभि
मंत्र्यगंधद्वारामित्यृचामूर्ध्वादिसर्वांगमालिप्यप्रांजलिःहि
रण्यशृंगंवरुणंप्रपद्येतीर्थमेदेहियाचितः यन्मयाभुक्तम
साधूनांपापेभ्यश्चप्रतिग्रहः यन्मेमनसावाचाकर्मणादु
ष्कृतंकृतं तन्नइंद्रोवरुणोबृहस्पतिः सविताचपुनंतुपुन
इतिद्वाभ्यां पुनः॰ अवतेहेळइतिद्वाभ्यांचसंम्राजेबृहदर्वेतिसूक्तेन
प्रार्थ्ययाःप्रवतोनिवतउद्वतउदन्वतीरित्येतत्तयातीर्थमभि

मंत्र्यावगाह्यस्नातोद्विराचम्यमार्जयेदंबयोयंत्यध्वभिरित्यष्टा
भिरापोहिष्ठेतिनवभिरथतीर्थमंगुष्ठेनेमंमेगंगेइत्यृचात्रिः
प्रदक्षिणमालोड्यप्राकारापृष्ठमग्नोघमर्षणसूक्तंत्रिरावर्त्य
निमज्योन्मज्यादित्यमवलोक्यद्वादशकृत्वाआप्लुत्यपाणिभ्यां
शंखमुद्रयायानिमुद्रयाचोदकमादायमूर्ध्निमुखबाहूरसि मूमो
चात्मानंगायत्र्याभिषिच्य तन्नोअग्नेवरुणस्यविद्वानितिद्वाभ्यां
तरत्समंदीधावतीतिसूक्तेनपुनस्नायात् मूर्ध्नि वाभिषिंचे
त् तद्विष्णोःपरमंपदमग्नेरहोमि अहंसोयत्किंचेदंवरुण
दैव्येजनइत्येतांजपेत् स्नातोभिमुखःसरित्सुस्नायादन्यत्रा
दित्याभिमुखः अथसोसृताभिरद्भिः प्राङ्मुखउपवीतिदेवति
र्थेनव्याहृतिभिर्व्यस्तसमस्ताभिर्ब्रह्मादीन्वामेकंतर्पयित्वा

थेद[illegible]मुखो[illegible]वीती [illegible]मावी[illegible] ज्ञायसेजनतीर्थो[illegible]
[illegible]द्वैपायनादीन् नन्ताभिर्व्याहृतिभिर्द्विस्तर्पयित्वाथद
क्षिणामुखः प्राचीनावीती पितृतीर्थेन सतिलाभिरद्भिर्व्या
हृतिभिर्वसोमः पितृमान्यमो अंगिरस्वानग्निः कव्यवाहन
इत्यादीन् स्त्रीस्त्रीस्तर्पयेद् ततः स्नानांगतर्पणमिति अथतीर
मेसहिरावामेदिसंत[illegible]छप: प्रागुदाहृतः शौनकस्तु प्रसं
ग्राजेवहस्तक्रमहर्वेवार[illegible]जपेत् समुद्रादूर्मिरिसपां
स्तस्तकमेकादशार्चकं आपो अस्मान्मातरइसचेच प्रजन्न
रः अवगाह्य निमज्ज्याथ हिराचम्याभिषेचयेत् अंबयाय
स्त्वो ह्येव आपोहिष्ठादयानव अद्भिः स्नातोदके मग्नतास्त्रि
पेदघमर्षणं कुर्यादादशभिस्नानंनामभिः केशवादिभिः

अनेन विधिनास्नानं सर्वपापप्रणाशनं धन्यं यशस्यमायुष्यं आरो
ग्यं पुष्टिवर्द्धनं इति नित्यस्नानं अथ नैमित्तिकस्नानं मनुः दि
वाकीर्त्तिमुदक्यां च पतितं सूतिकां तथा शवं तत्स्पृष्टिनं चैव स्प
ष्ट्वा स्नानेन शुध्यतीति दिवाकीर्त्तिश्चंडालस्तंडालादिस्पृष्टिनमा
रभ्य तृतीयस्य सचैलस्नानं चतुर्थस्य त्वाचमनमात्रेण शुद्धिः
तथा च मरीचिः देवल: श्वपाकं पतितं व्यंगमुन्मत्तं शवदाहकं सू
तिकां साविकांनारीरजसा च परिप्लुतां श्वकुक्कुटवराहांश्च ग्रा
म्यान् संस्पृश्य मानवः सचैलं सशिराः स्नानं कृत्वा विप्रो विशु
ध्यति साधिकाप्रसवस्य कारयित्री व्यासः भासवानरमार्जा
र खरोष्ट्र श्वशूकरान् अमेध्यानि च संस्पृश्य सचैलो जा
लमाविशेत् अत्र मार्जारस्पर्शनिमित्तं स्नानं भोजनकर्म्मा

आन्हीक।

॥२४॥

लयोस्तत्सुष्टस्यस्पर्शविषयं तथा च स्मृतिरत्नावल्यां । बिडालमु
षकं संस्पृष्ट्वा स्नात्वा विप्रो विशुध्यति भोजने कर्मकाले च विधिरे
षउदाहृत इति अन्यदाशुचिरेव मार्जारमारुतश्चैव सदाशुचि दर्वियैव
मरीचिः रितिमानवात् भारताच्च उपस्पर्शश्चतुर्थस्तु तदूर्ध्वं प्रोक्षणं स्मृ
तमिति यत्तु संवर्त्ते नद्वयोरेव स्नानमुक्तं तत्स्पृष्टिनं स्पृशेद्यस्तु
स्नानं तस्य विधीयते ऊर्ध्वमाचमनं प्रोक्तं द्रव्याणां प्रोक्षणं तथे
तितदबुद्धिपूर्वस्पर्शविषयमिति माधवः तथा च संग्रहे अ
बुद्धिपूर्वकस्पर्शो द्वयोस्नानं विधीयते इति यत्तु कूर्मपुराणे
चंडालसूतकिन्नावैः संस्पृष्टं संस्पृशेद्यदि प्रमादात्तत आ
चम्य जपं कुर्यात्समाहितः तत्स्पृष्टिस्पृष्टिनं स्पृष्ट्वा बुद्धिपूर्वं ॥२४॥
द्विजोत्तमः आचमेत्तु विशुद्ध्यर्थं प्राह देवः पितामह इति ते

द्वाद्यंतरस्पर्शविषयम् वस्त्रांतरितस्पर्शेतु विशेषमाह प्रचे
ताः वस्त्रांतरितसंस्पर्शः साक्षात्स्पर्शोभिधीयते साक्षात्स्प
र्शेतु यत्प्रोक्तं तद्वस्त्रांतरितेपि चेति स्नानस्य निमित्तांतरमा
ह: मूले चितिं च चितिकाष्ठं च यूपं चंडालमेव च स्पृष्ट्वा देवल
कं चैव सचैलो जलमाविशेत् बौद्धान्पाशुपतान्जैनान्लोका
यतिककापिलान् विकर्मस्थान्द्विजान्स्पृष्ट्वा सचैलो जलमावि
शेत् कपालिकांस्तु संस्पृश्य प्राणायामोधिको मत इति देव
लकलक्षणं स्मर्यते देवार्चनपरो विप्रो वित्तार्थी वत्सरत्रयं स
वै देवलको नाम हव्यकव्येषु गर्हित इति स्मृतिरत्नावल्यां शि
वं सूर्यं तथा चंद्रं दुर्गा[illegible]न देवताः योर्चयेत्पणपूर्वं तु स घः
पतेतिमानवः देवलस्पर्शो देवस्थानादन्यत्र यूपस्पर्शश्च पशु

अन्हीक॥
॥२५॥

बंधादन्यत्र न कर्त्तव्य इति विशेषो बोध्यः तदुक्तं संग्रहे नस्नाया
द्देवलं यूपं देवस्थाने च बंधने अन्यथा तावुभौ स्पृष्ट्वा सचैलो ज
लमाविशेत् इति लोकायतिक कापिलानिति कर्म्मधारयः गो
बलीवर्द्द न्यायमाश्रियद्वंद्वो वा उभयथापि लोकायतिकेक दे
शिन एव कापिलाइह गृह्यंते न तु सांख्याः स्पृष्टं चेद् श्राद्ध कांड
हेमाद्रिग्रंथे नग्नादि निरूपणप्रघट्टके। स्त्रीणां विशेषः स्मर्य्य
य ते स्मृत्यर्थसारे अत्र पुंसः सचैलस्नात्स्नानं तत्र सुवासिनी कु
र्वीत वा सिरस्नानं सिरोरोगी जटी तथेति नैमित्तिकस्नानं रा
त्रावपि कर्त्तव्यम् तदाह व्यासः महानिशा तु विज्ञेया मध्ययाम
द्वयं निशि तस्यां स्नानं न कुर्वीत काम्यनैमित्तिकादृत इति रा ॥२५॥
त्रिस्नाने विशेषमाह अग्निः रात्रौ स्नानं यदि भवेत्सन्नयन्नग्निस

माचरेत् स्वर्णगु[illegible]करो विप्रो वह्निना वा विना चरेत् इति इदं च
मध्यमयामद्वयविषयम् तथा व्यासः प्रदोषपश्चिमौ यामौ दिनव
त्स्नानमाचरेत् इति वारुणस्नानं पराशरः अस्पृश्यस्पर्शने जा
ते अश्रुपाते क्षुरे भगे स्नानं नैमित्तिकं कार्यं देवपित्र्यविवर्जितमि
ति देवर्षिपितृतर्पणरहितमित्यर्थः तथा च स एव तूष्णीमेवाव
गाहेत यदा स्यादशुचिर्नरः आचम्य प्रयतः पश्चात्स्नानं विधि
वदाचरेत् अत्राशौचादिकं निषेधति वृद्धमनुः मृते जन्मनि संक्रां
तौ श्राद्धजन्मदिने तथा अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारि
णेति गार्ग्यः कुर्यान्नैमित्तिकं स्नानं शीताद्भिः काम्यमेव च नि
त्यं याहच्छिकं चैव यथारुचि समाचरेदिति इति नैमित्तिकस्ना
नं अथ काम्यस्नानं पुलस्त्यः पुष्ये च जन्मनक्षत्रे व्यतीपाते च

वैधृतौ अमावास्यांनपीस्नानंपुनात्यासप्तमंकुलं चैत्रशु
क्ल चतुर्दश्यां यः स्नायाच्छिवसंनिधौ नप्रेतत्वमवाप्नोतिगं
गायांचविशेषतः शिवलिंगसमीपेतु मुच्यतेसर्वकिल्बिषैः
सि ज्येष्ठमासितेपक्षेदशम्यांहस्तसंयुते दशराजन्माद्यहागंगा
तेनपापहरास्मृतेति विष्णुः सूर्यग्रहणतु शुक्लमाघस्यसप्त त्याल्तु
मी अरुणोदयवेलायांतस्यांस्नानंमहाफलं पुनर्वसुबुधो
पेताचैत्रमासिसिताष्टमी स्रोतस्सुविधिवत्स्नात्वावाजपे
यफलंलभेत् आदित्यपुराणे कार्तिकंसकलंमासंनित्य
स्नायीजितेंद्रियः जपन्हविष्यभुक्शान्तःसर्वपापैःप्रमु
च्यते तुलामकरमेषेषु प्रातस्नायीसदाभवेत् हविष्यंब्र ।।२६।।
ह्मचर्यंचमहापातकनाशनमिति मत्स्यपुराणे आषाढा

दिचतुर्मासिंप्रातस्नायीभवेन्नरः विप्रेभ्योभोजनंदत्वाकार्तिक्यां
गोप्रदोभवेत् सवैष्णवंपदंयाति विष्णुव्रतमितिस्मृतमिति
मार्कंडेय सर्वकालंतिलैःस्नानंपुण्यंव्यासोब्रवीन्मुनिः तुष्य
त्यामलकैर्विष्णुरेकादश्यांविशेषतः श्रीकामःसर्वदास्ना
नंकुर्वीतामलकैर्नरः सप्तमीनवमींचैवपर्वकालेचवर्जयेदि
ति विष्णुः बालाश्चतरुणावृद्धानरनारीनपुंसकाः स्नात्वा
माघेशुभेतीर्थेप्राप्नुवंतीप्सितंफलं माघमास्युषसिस्ना
त्वाविष्णुलोकंसगच्छति चंद्रिकायां दर्शंचपौषमासंवाप्रा
रभ्यस्नानमाचरेत् पुण्यान्यहानित्रिंशत्तुमकरस्थेदिवाक
रे अप्रावृतशरीरस्तुयः कोष्णस्नानमाचरेत् पदेपदेश्वमे
धस्यफलंप्राप्नोतिमानवः अनभ्यंगीद्विजोमासंसर्वमेतंनये

[illegible]

फ्ही ततः स्नानस्यावसाने भोज्यद्रव्यं सुसंस्कृतं भोजयेद्द्विज
दांपत्यं भूषयेद्वस्त्रसुभूषणैः रूप्यसौवर्णसंसीमं हेमं सप्तधान्य
समन्विते त्रिंशच्च मोदकादेयाः शर्करातिलसंयुताः अथा
श्वत्थछायाजले स्नानं आदित्यपुराणे गुरुवारेष्वमावास्या
स्वश्वत्थछायवारिणा स्नानं प्रयागस्नानेन समं पातकनाशनं
पारिजाते अश्वत्थीयोदके छायायां जछायेतिसोच्यते अमा
गुरुसमायोगात्सूर्यपर्वशताधिकः इति तत्र प्रार्थनामंत्रः जी
वो बृहस्पतिः सौरीराचार्यो मधुरं गिरः इत्यश्वत्थछायास्ना
नं अथ समुद्रस्नानं तत्राचार्यः समुद्रे पर्वसु स्नायाद मायां
तु विशेषतः पापैर्विमुच्यते सर्वैरमातस्नानमाचरेत् भर
गौ भौमदिने स्नानं समुद्रे च विवर्जयेत् ग्रहणे रविवारे च पु
॥जीवो बृहस्पतिः [illegible] वाचस्पतिर्देवमंत्री

॥२७॥

त्रेषु नैव तदाचरेत् भरद्वाजः पक्षोपवासफलदा मरुतां नद्यः समु
द्रगाः मासोपवासफलदः सकृत्स्नातो महोदधिरिति इति काम्य
स्नानप्रपंचः क्रियांगस्नानं तु प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने
देवमर्चयेदित्यादि द्रष्टव्यं अथ मलापकर्षणस्नानं गर्गः पं
चदश्यां चतुर्दश्यां अष्टम्यां रविसंक्रमे द्वादश्यां सप्तमीषष्ठ्यो
स्तैलस्पर्शं विवर्जयेत् नच कुर्यात्तृतीयायां त्रयोदश्यां
कौ तिथौ तथा नवम्यां च दशम्यां च क्षेममिच्छन्ति पंडिता इति मनुः
पक्षादौ च रवौ षष्ठ्यां रिक्तायां च तथा तिथौ तैलेनाभ्यंजमा
नस्तु धनायुर्भ्यां विहीयते माधवीये ज्योतिर्ग्रंथवचनं सं
तापः कांतिरल्पायुर्धनं निर्धनता तथा अनारोग्यं सर्वका
मा अभ्यंगाद्भास्करादिषु प्रचेताः सार्षपं गंधतैलं च यत्तैलं

॥अन्हका॥
॥२८॥

पुष्पवासितं अन्यद्रव्ययुतंतैलंनदुष्यतिकदाचनेति इतिम
लापकर्षणस्नानं अथक्रियास्नान अथक्रियास्नानं तीर्थप्रा
प्तेसत्यांयक्रियतेस्वतंत्रस्वर्गादिफलकंतक्रियास्नानं येषु
षट्स्वपिमध्येमलापकर्षणभिन्नेषुपंचसुवारुणपूष्णोदकं
निषेधति याज्ञवल्क्यः वृथातूष्णोदकस्नानंवृथाजाप्यमवे
दिकं वृथाश्रोत्रियेदानंवृथामुक्तमसाक्षिकमिति यमः नि
त्यनैमित्तिकंचैवक्रियांगंमलकर्षणं तीर्थाभावेतुकर्त्तव्य
मुष्णोदकपरोदकैः आदित्यकिरणैःपूतंपुनःपूतंचवह्निना
आम्नातमातुरस्नानेनअनूरास्तुनदद्यादग्निनामिति एतदभिप्रा
येणैवमूलं आपःस्वभावतोमेध्याःकिंपुनर्वह्नितापिताः ॥२८॥
अतःसंतःप्रशंसंतिस्नानमुष्णेनवारिणेतिवृद्धमनुः सं

क्रांतौभानुवारेचसप्तम्यांराहुदर्शने आरोग्यपुत्रमित्रार्थीनस्ना
यादुष्णवारिणेती इतिवारुणस्नानप्रपंचः अथगौणस्नाना
नि वृद्धमनुः असामर्थ्याच्छरीरस्यकालशक्त्याद्यपेक्षया मं
अस्नानादिकंप्रोक्तंमुनिभिःशौनकादिभिरिति पारिजाते
आपोहिष्ठादिभिर्मंत्रैर्मृदालंभस्तुपार्थिवं आग्नेयंभस्मना
स्नानंवायव्यंगोरजःस्मृतं यत्तु सातपवर्षेणस्नानंतद्दिव्यमु
च्यते अवगाहोवारुणंस्यान्मानसंविष्णुचिंतनं मूले आग्ने
यंभस्मनास्नानमवगाह्यचवास्नं आपोहिष्ठेतिचब्राह्म
वायव्यंरजसागवां यत्तुसातपवर्षेहितत्स्नानंदिव्यमुच्यते
स्नानान्येतानिचापत्सुव्याधितस्योदकंविनेति अथकापिल
स्नानं अशक्तावशिरस्कंयत्स्नानंमंत्रविधानतः आर्द्रेणवा

अवगाह्यचवारत्रयं॥

२ तथाह्योचार्यः प्रातःस्नातु मशाकस्यरोगा
३ धैवाजयाच्चैवा॥ पूर्वबिस्वंपरिसप्यगो
२९

ससाच्यांगमार्जनंकापिलंस्मृतं अथसारस्वतं विद्वत्सरस्व
तीप्राप्तंस्नानंसारस्वतंविदुः अथगायत्र गायत्र्याजलमा
दायदशाकृत्वोभिमंत्र्यच शिरश्चांगानिसर्वाणिप्रोक्षयेत्तेन
वारिणा स्नानंगायत्रकंनाम सर्वपापप्रणाशनं अशक्तानां
तुजंतूनांगुरोःपादोदकंशुभं तथा विप्रपादात् विष्णुपादा
तुलस्याःसंभृतंजलं प्रोक्षणात्स्नानमाप्नोति ध्यानस्नानंवि
शिष्यते चतुर्भुजंमहाकायंशंखचक्रगदाधरं ध्यायेतमन
साविष्णुंस्नानंमानसमुच्यते एवमुक्तेषुनुक्तस्नेषुस्नातो
जपादिष्वर्हः नतुदेवतार्चनादिषु जपेत्संध्यातथावेदात्सो
धीयीतसध्याविधीति इतिस्नानप्रकरणं॥ ॥अथतिलक ॥२९॥
विधिः ब्रह्मपुराणे पर्वताग्रेनदीतीरे मम क्षेत्रेविशेषतः
एास्नानेनशुद्धिता।सर्वकर्मस्वनर्हस्याच्छ्राद्धदेवार्चनादिषु॥२॥

सिंधुतीरेचवल्मीकेतुलसीमूलमाश्रिताः मृदएतास्तुसंपाद्याव
र्जयेदन्यमृत्तिकाः द्वारवत्युद्भवागोपीचंदनादूर्ध्वपुंड्रकं कार्य
न्नित्यमेवंहिपापंहंतिदिनेदिने जाह्नवीतीरसंभूतांमृदंमूर्ध्नाबि
भर्त्तियः बिभर्त्तिरूपंसोर्कस्यात्तमोनाशयकेवलं शुभमंत्रांति
करंप्रोक्तं रक्तंवश्यकरंभवेत् श्रीकरंपीतमित्याहुर्वैष्णवंश्वेत
मुच्यते अंगुष्ठःपुष्टिदःप्रोक्तोमध्यमायुष्करीभवेत् अनामिका
न्नदानित्यंमुक्तिदाचप्रदेशिनी एतैरंगुलिभेदैस्तुकारयेन्नन
खैस्पृशेत् चंद्रिकायांब्रह्मांडपुराणे ललाटेकेशवंविद्यान्नारा
यणमथोदरे माधवंहृदिविन्यस्यगोविंदंकंठकूपके उदरेदक्षि
णेपार्श्वेविष्णुरित्यभिधीयते तत्पार्श्वेबाहुमध्येतुविन्यसेन्म
धुसूदनं त्रिविक्रमंकर्णदेशेवामकुक्षौतुवामनं श्रीधरंबाहु

आह्निक॰।।

।।३०।।

केवामेहृषीकेशंतुकर्णके पृष्ठदेशेपद्मनाभंककुद्दामोदरंस्मरे
त् द्वादशैतानिनामानिवासुदेवेतिमूर्द्धनि संकर्षणादिभिः क
ष्ठे शुक्लेचकेशवादिभिरितिशौनकः ऊर्ध्वपुंड्रंशिवस्यैवंकुर्यु
विष्णोश्चवाबुधाः मूर्ध्निमूलेनमंत्रेणशेषंद्वादशनामभिः स्था
नेष्वेषुद्विजस्नात्वानमोतेः प्रणवेनवेति स्थानविशेषेणाकृति
विशेषः स्मर्य्यते निर्दिष्टेवाक्रुवद्धेवदंडवत्कर्णपल्लवे हृदयेक
मलाकारमुदरेदीपवल्लिखेत् वेणुपत्रसमाकारंबाहोर्मध्येलि
खेत्सुधीः अधस्पृष्ठेस्कंधदेशेलिखेज्जंबुफलाकृति भाले।
दशांगुलप्रमाणंतुउत्तमोत्तममुच्यते नवांगुलंमध्यमंस्याद
ष्टांगुलमतःपरं सप्तषट्पंचभिःपुंड्रंमध्यमंत्रिविधंस्मृतं च ।।३०।।
तुस्त्रिद्व्यंगुलैःपुंड्रंकनिष्ठंत्रिविधंभवेत् ऊर्ध्वपुंड्रमृजुंसौम्यं

कनिष्ठांगुलिचस्मृतं नासादिकेशपर्यंतंप्रयत्नाद्धारयेद्विजः
पारिजातेसंग्रहे ऊर्ध्वपुंड्रंत्रिपुंड्रंवाममध्येशून्यंतुधारयेत् श्रणु
षण्मुखतन्मध्ये [illegible] उमयाहंश्रियाहरिः इति स्मृतिसारस
मुच्चयेगोपीचंदनलिप्तांगोयंयंपश्यतिचक्षुषा तंतंशुद्धंवि
जानीयान्नात्रकार्याविचारणेति अशुचिर्वाप्यनाचारोमनसा
पापमाचरन् शुचिरेवभवेन्नित्यमूर्ध्वपुंड्रांकितोनरइति स
र्वतःमभक्तोधारयेन्नित्यमूर्ध्वपुंड्रंविनातुतत् यत्कर्मका
रयेन्नित्यंतत्सर्वंनिष्फलंभवेदिति यत्तुशंखवचनं संख
चक्रं शंखचक्राद्यंकनंतुतुलसीदलभक्षणं यःकुर्यान्निय
तंभक्त्यासयातिपरमांगतिंनान्यंदेवंनमस्कुर्यान्नान्यंदेवंनि
रीक्षयेत् चक्रांकितःसदातिष्ठेन्मभक्तःपांडुनंदनेति तद्धरि

आह्निक ।

॥३११॥

कुमार्गपरिभ्रष्टविषयम् तथाचाश्वलायनः शिवकेशवयोश्चि
ह्नांश्चक्रशूलादिकान्द्विजः नधारयेतमतिमान्वैदिकेवर्त्मनि
स्थितइति ब्रह्मांडे मृत्तिकाचंदनंचैवभस्मतोयंचतुर्थकं एभि
र्द्रव्यैर्यथाकालमूर्ध्वपुंड्रंभवेत्सदा स्नात्वापुंड्रंमृदाकुर्याद्धुत्वा
चैवतुभस्मना देवानभ्यर्च्यगंधेनसर्वपापापनुत्तये जलेन
तिलकंकुर्याज्ज्ञात्वांतः कर्मसिद्धयइति संग्रहे नकदाचिन्मृ
दातिर्यक्कुन्यसेदूर्ध्वेनभस्मनेति तत्रभस्मनोर्ध्वपुंड्रस्यविहि
तप्रतिषिद्धत्वाद्धआचारतोव्यवस्थेतिपारिजाते कात्यायनः
श्राद्धेयज्ञेजपेहोमेवैश्वदेवेसुरार्चने धृतस्त्रिपुंड्रः पूतात्मामृ
त्युंजयतिमानवः भविष्यपुराणे सितेनभस्मनाकुर्यात्त्रिसं ॥३१॥
ध्यंचत्रिपुंड्रकं सर्वपापविनिर्मुक्तः शिवेनसहमोदते अक

रणेप्रत्यवायउक्तस्तत्रैव सस्नानंचजपोहोमस्तीर्थेदेवादिपूज
नं तस्यव्यर्थमिदंसर्वंयस्त्रिपुंड्रंनधारयेत् स्मृतिरत्नावल्यां लला
टेहृदयेनाभौगलांसेबाहुसंधिषु पृष्ठदेशेशिरस्येवस्थानेष्वेतेषुधा
रयेदिति पुलस्त्यः अग्निरित्यादिभिर्मंत्रैः शुद्धभस्माभिमंत्रितं
शिवमंत्रेणतद्धार्यंमंत्रेणाष्टाक्षरेणवा गायत्र्यावाथवेदर्षेमंत्रे
णप्रणवेनवा करोतिशिव[illegible]यंमंत्रेणयस्त्रिपुंड्रंद्विजोत्तमः
स्पष्टः श्वधलरः सौम्यः शिवलोकेमहीयते अष्टाक्षरेणमंत्रेण
यःकरोतित्रिपुंड्रकं विष्णोःपरमवाप्नोतिनान्यथाश्रुतिचोदितं
सौरंपदमवाप्नोतिगायत्र्यामुनिसत्तम प्राप्नोतिब्रह्मणोरूपंप्र
णवेननसंशयइति अग्निरित्यादिमंत्रा आथर्वणशिखायामुद्
र्शिताः भस्माभिमंत्रणमंत्रस्य पिप्पलादिऋषिभिः गायत्रीछं

दः। रुद्रोदेवता भस्मशुध्यर्थेजपेविनियोगः अग्निरितिभस्म
वायुरितिभस्मजलमितिभस्मस्थलमितिभस्मव्योमेतिभस्म
सर्वंहवाइदंभस्ममनएतानिचक्षूंषिभस्मानीनीति रत्नावल्यां
मध्यमानामिकांगुष्ठैरनुलोमविलोमतः प्रतिस्वल्पमनायु
ष्यमतिदीर्घंतपः क्षयं नेत्रयुग्मप्रमाणेनत्रिपुंड्रंधारयेद्द्विजः
पारिजाते धार्यंभस्मत्रिसंध्यंतुगृहिणाजलसंयुतं सार्वकालं
भवेत्स्त्रीणांयतीनांजलवर्जितं वानप्रस्थस्यकन्यानांदीक्षाही
ननृणांतथा मध्याह्नात्प्राग्जलैर्युक्तंपरतोजलवर्जितं मध्यांगु
लित्रयेणैवस्वदक्षिणकरस्यच त्रिपुंड्रंधारयेद्विद्वान्सर्वकल्मष
नाशनमिति तत्रैव षडंगुलप्रमाणेनब्राह्मणानांत्रिपुंड्रकं न
पाणांचतुरंगुल्यंवैश्यानांद्व्यंगुलंतथा शूद्राणामथसर्वेषामेकां

ननद्वानं

गुल्यंत्रिपुंड्रकमिति तत्रैवत्रिपुंड्रंब्राह्मणोविद्वान्मनसापिनलंघ
येत् श्रुत्याविधीयतेयस्मात्तत्त्यागीपतितोभवेत् त्रिपुंड्रेनविना
येनविप्रेणयदनुष्ठितं नतध्यानंनतत्ज्ञानंनजपोनसः संग्रहे ये
भस्मधारिणंदृष्ट्वावाचानिंदंतिमानवाः तेषांशूद्रेणसंभूतिरनुमे
याविपश्चितेति नारदः मद्यंपीत्वागुरुदारांश्चगत्वास्वर्णस्तेयं
ब्रह्महत्यांचकृत्वास्वर्णस्तेयंगत्वा भस्मछन्नोभस्मशय्यासन
श्चरुद्रंध्यायन्मुच्यतेपातकेभ्यइति स्मृतिसंहितादिषुतुप्रसिद्ध
तरएवभस्ममहिमेत्यलंबहुना।। ।।इतितिलकप्रकरणं।। अथ
संध्याप्रकरणं तत्रसंध्याशब्दोयद्यपिकालवचनस्तथापिदर्श
पूर्णमासादिवत्तत्कालयोगनिमित्तिकस्यकर्म्मणिवर्तते तत्का
लोपास्यदेवतायांवेतिमाधवः साचैकस्मिन्दिवसेत्रिवारमु

अ॰ह्नीक॰॥

॥३२॥ पास्या यथाहात्रिः संध्यात्रयंतुकर्त्तव्यंद्विजेनात्मविदासदेति
कालभेदेनदेवतायानामभेदमाहव्यासः गायत्रीनामपूर्वाह्णे
सावित्रीमध्यमेदिने सरस्वतीचसायाह्ने सैवसंध्यात्रिषुस्मृतेति
रा॰४ अत्रसंध्याशब्दः आदित्यवाचीदेवतापरः संध्याकालोपास्यत्वा
दितिमाधवः सम्यक्ध्येयत्वात्संध्यै चिंतायामितिधातोः आ ध्या॰५
तश्चोपसर्गे इतिकर्मण्यङ्प्रत्ययः इतिपारिजातकारः उभ
यथापिस्त्रियांध्येयइतिवाक्यार्थः वर्णविशेषःस्मृत्यंतरेदर्शि
तः गायत्रीतुभवेद्रक्तासावित्रीशुक्लवर्णिकासरस्वतीतथाकृ
ष्णाउपास्यावर्णभेदतइति तथा गायत्रीब्रह्मरूपातुसावित्री
रुद्ररूपिणी सरस्वतीविष्णुरूपाउपास्यावर्णभेदतइतिउपा
स्येति ध्येयेत्यर्थः तथाचतैत्तिरीयब्राह्मणं उद्यंतमस्तंयंतमा ॥३२॥

दित्यमभिध्यायन्कुर्वन्ब्राह्मणोविद्वान्सकलंभद्रमश्नुतेसावादित्योब्र
ह्मेति ब्रह्मैवसन्ब्रह्माप्येतियएवंवेदेति अस्यार्थः वक्ष्यमाणप्र
कारेणअर्घ्यक्षेपेसप्राणायामादिकंकर्मकुर्वन्यथोक्तनामवर्णरूपोप २
तं संध्याशब्दवाच्यमादित्यंब्रह्मेति ध्यायन्नैहिकमामुष्मिकंचसक
लंभद्रमश्नुतेयएवमुक्तध्यानेनशुद्धांतःकरणोब्रह्मसाक्षात्कुरुतेस
पूर्वमपिब्रह्मैवसन्नज्ञानाजीवत्वंप्राप्तोयथोक्तज्ञानेनाज्ञानापगमे
ब्रह्मैवप्राप्नोतीति व्यासोप्याह्ननभिन्नांप्रतिपद्येतगायत्रींब्रह्म
णासह साहमस्मीत्युपासीतविधिनायेनकेनचित्तन्त्वेवंसतिप्र
तिग्रहान्नदोषात्तुपातकादुपपातकात् गायत्रीप्रोच्यतेयस्माद्गा
यंतंत्रायतेततः सवितृद्योतनात्सैवसावित्रीपरिकीर्तिता जग
तःप्रसवित्रीवावाग्रूपत्वात्सरस्वतीतिव्यासोक्तनिर्वचनानिमं

॥३४॥ त्वपरतयाप्रतीयमानानिविरुध्येरन्निति चेन्न प्रतिपाद्यप्रतिपाद
कयोरभेदोपचारेणतदुपपत्तेरिति पारिजातकारः ध्यानदत्राप्य
स्मर्यते गायत्रीचिंतयेद्यस्तु हृत्पद्मे समुपस्थितां धर्माधर्म
विनिर्मुक्तः सयाति परमांगतिमिति अत्रचसंध्योपासनशब्द
वाच्यंसूर्यध्यानंप्रधानं मार्जनादीन्यंगानीतिबोध्यं अत
एवयुधिष्ठिरादिभिर्युद्धाद्यतैः सांगानुष्ठानासमर्थैरादित्यो
पासनमात्रमनुष्ठितमित्याह व्यासः तेत्तथैवमहाराजदंत्रि
तारणमूर्धनिसंध्यागतंसहस्रांशुमादित्यमुपतस्थिरे पुरा
णांतरे सएवासंध्येति सूर्यंगंब्रह्मसंधानादविभागतः ब्र
ह्माद्यैःसकलैर्भूतैस्संधितैस्सच्चितात्मनः तस्मात्सोहमस्मीति
सोहमस्मीतिवामतिः भवदुपासकस्येतिघेवंबहुविदावि ॥३४॥

दुरिति इतिसंध्यास्वरूपनिरूपणं अथतत्कालः अग्निस्मृतौ
संध्याकालः प्रागुदयाद्द्विप्रस्यद्विमुहूर्त्तकः क्षत्रियस्यतदर्धस्या
त्तदर्धस्याद्धिकेणाप्युनस्तथैवास्तमिते तेषांवैश्यादीनामयंक्रमः इ
ति दक्षस्तु रात्र्यंत्ययामनाडीद्विसंध्याकालोयमुच्यते दर्शनाद्र
विरेखायास्तंयतोमुनिभिःस्मृतः अध्यर्धयामदासायंसंध्या
माध्याह्निकीष्यतइति धर्मसारसुधानिधौ उत्तमातारकोपे
तामध्यमालुप्ततारका अधमासूर्यसहिताप्रातः संध्यात्रिधा
मता उत्तमासूर्यसहितामध्यमालुप्ततारका कनिष्ठातारको
पेतासायंसंध्यात्रिधामता इतिसंध्याकालः अथदेशः व्या
सः गृहेत्वेकगुणासंध्यागोष्ठेदशगुणास्मृता शतसाहस्रि
कानद्यामनंताविष्णुसंनिधौ बहिस्संध्यादशगुणागर्तेप्रस्र

आन्हीक।

॥३५॥

वर्णेषु च स्यात्तेतीर्थेन्नापगुणाल्मनंताजाह्नवीजले शातातपः
अनृतं म[illegible]द्यगंधं च दिवामैथुनमेव च पुनाति वृषलस्यान्नं
बहिः संध्याह्युपासितेति यत्तत्रिवचनं संध्यात्रयं तु कर्त्तव्यं
द्विजैनात्मविदा सदा उभे संध्ये तु कर्त्तव्ये ब्राह्मणैस्तु गृहेष्वपी
ति तस्यार्थ्यायः यद्यपि बहिरेव संध्यात्रयं प्रशस्तं तथापि यदा
विहरणाद्यंगलोपप्रसक्तिस्तदा श्रौतस्य विहरणस्य प्राबल्यात्त
न दनुरोधेहि संध्ये गृहे अनुष्ठेये इति इति संध्यादेशः अथ प्रयो
गः आचम्य प्राणायामं कुर्यात् तत्र शौनकः नासिकामंगुलीभि
श्च तर्जनीमध्यमाहतो दक्षिणेन समालभ्य सव्येन तु विसर्जये
त् प्रणवव्याहृतीः सप्त गायत्रीं शिरसा सह त्रिः पठेदायतः प्रा ॥३५॥
णः प्राणायामः स उच्यते शनैर्नासापुटे वायुमुत्सृजेन्न तु वेग

तः नकंपयेच्छरीरं तु स योगी परमो मतः इति स एव प्राणनाप
प्य विधिवद्वाग्यतः संयतेंद्रियः अथ संध्यामुपासिष्ये इति सं ॥३६॥
कल्प्य मार्जयेत् तिसृभिर्मार्जनं कुर्यात् आपोहिष्ठेति कुशोद
कैः पादे पादे क्षिपेन्मूर्ध्नि प्रतिप्रणवसंयुतं ऋग्विधाने नवप्र
णवयुक्तेन आपोहिष्ठात्रचेन च संवत्सरकृतं पापं मार्जनांते विन
दौ श्यतीति प्रतिपादमोंप्रणव इति ऋक्त्रये नवप्रणवाः ब्रह्मा
प्याह आपोहिष्ठादिभिः पादैः शिरस्यं सेच विप्रुषः यस्यक्षया
येत्यधस्तात् क्षिप्त्वाद्भिः परिषेचयेदिति स एव धाराच्युतेन तोये
न संध्योपास्तिर्विगर्हिता कथं तर्हि मार्जनं कार्यमित्यत्र स ए
वाह नद्यां तीर्थे ह्रदे वापि भाजने मृन्मये पि वा औदुंबरे च सौव
र्णे राजते दारुसंभवे कृत्वा तु वामहस्ते वा संध्योपास्तिं समाच

[illegible]

रदिति औदुंबरंताम्रपात्रं कृत्वेति जलमिति विशेषः यत्तु वचनं
वामहस्ते जलं कृत्वा ये तु संध्यामुपासते सा संध्या वृषली ज्ञेया
असुरास्ते स्तु तर्पिता इति तन्मयादिपात्रांतरसद्भावावि न
षयं तदभावे तु कृत्वा तु वामहस्त इति बोध्यं अथ मंत्राच
मनं तत्र गृह्यपरिशिष्टे अथाचमनोदकमादाय सूर्यश्चेति
पिबेत् सूर्यश्च मामन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापे
भ्यो रक्षंतां यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यां प
द्भ्यामुदरेण शिश्ना रात्रिस्तदवलुंपतु यत्किंचिदुरितं मयि
इदमहं माममृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहेत्येतत्सम
आचमनं अथ मध्यंदिने आपः पुनंत्विति मंत्राचमनं आपः पु
नंतु पृथिवीं पृथिवी पूता पुनातु मां पुनंतु ब्रह्मणस्पतिर्ब्रह्म
एतदपवादमाह आपस्तंबः गंगायां वापिकायां च तडागे च

पूता पुनातु मां यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं मम सर्वं
पुनंतु मामापोसतां च प्रतिग्रहं स्वाहेत्येवं सायं विशेषः
सूर्यश्चेति मंत्रे सूर्यस्थानेग्निरिति सोहसत्ये ज्योतिषीति चांते ब्रू
यादिति भगवानाह सूर्यश्चेत्यनुवाकेन प्रातःकाले पिबे
दपः अग्निश्चेत्यनुवाकेन सायंकाले पिबेदपः आपः पुनंतु
मध्याह्ने मंत्राचमनमारभेदिति सूर्यश्चेति मंत्रस्य याज्ञवल्क्यो
पनिषदृषिः सूर्यो मन्युपतयो रात्रिश्च देवता गायत्रीपंक्तिर्वि
राजश्छंदांसि रक्षंतामित्यंता गायत्री दुरितं मयीत्यंता पंक्तिः पं
चपदा पंक्तिरिति श्रुतेः स्वाहेत्यंता दशाक्षरपादद्वयोपेता वि
राट् दशाक्षरा विराडिति श्रुतेः द्विपदा विराजइत्यनुक्रमणि
कातश्च प्रकृतिछंद इति पारिजाते आपः पुनंत्विति अस्य मंत्रस्य

याज्ञवल्क्यस्योपनिषदृषिः मतांतरेतुसूतऋषिः आपःपृथिवीप्रा
णस्यतिब्रह्मादेवता अष्टपदीअष्टीछंदः इतिमंत्राचम
नै अथद्वितीयमार्जनं मूलपरिशिष्टे अथपुनराचम्यमार्ज
येत्सएवव्याहृतिसावित्रीभिरापोहिष्ठेतिसूक्तेन गायत्रीशि
नं रसाचांतश्चात्मा परिषिंचेदेतन्मार्जनमिति भगवान् प्रण
वेनव्याहृतिभिःगायत्र्याप्रणवाद्यया आपोहिष्ठेतिसूक्तेनमा
र्जनंहिचतुर्थकं कात्यायनः प्रणवोभूर्भुवःस्वश्चगायत्री
चतृतीयका अब्दैवतऋचश्चैवचतुर्थमितिमार्जनं प्रजाप
तिःऋगंतेमार्जनंकुर्यात्पादांतेवासमाहितः अर्धर्चांतेथ
वाकुर्याच्छिष्टानांमतमीदृशं इतिमार्जनं अथपापपुरुषवि
सर्जनं भगवान् उद्धृत्यदक्षिणेहस्तेजलंगोकर्णवत्कृते

पि
निश्वासनासिकाग्रेतुपाप्मानंपुरुषंस्मरेत् ऋतंचेतितृचंवाद्रुपदां
वाजपेयचं दक्षनासापुटेनैवपाप्मानमपोहयेत् तज्जलंनावलो
क्याथवामभागेक्षितौक्षिपेत् अन्यापिजलपूर्णतथाहस्तंनासिका
ग्रेसमर्पयेत् ऋतंचेतिपठित्वाथतज्जलंतुक्षितौक्षिपेत् द्रुपदा
चवाजसनेयकेपस्मते द्रुपदादिवेमुमुचानःस्विन्नःस्नात्वामला
दिवा पूतंपवित्रेणेवाज्यमापःशुंधंतुमैनसः इतिगृह्यपरि
ट शिष्टे तदुक्तसवीक्षमाणोवामभागेतीव्रपातेनक्षिप्यातंपाप्मानं
वज्रह[illegible]तं सहस्रधादलितंभावयेदिति कात्यायनः करेणो
त्सृज्यसलिलंप्राणमासज्यतत्रच जपेद्नियतासुर्वात्रिसकृदा
घमर्षणमिति प्राणमासज्य निरुद्धप्राणइत्यर्थः द्विविधोपिवि
कल्पः शक्ताशक्तविषयतयाव्यवस्थितोबोध्यः ध्येयस्यपाप

पुरुषस्यस्वरूपंचस्मर्य्यते ब्रह्महत्याशिरस्कंचस्वर्णस्तेयभुज
द्वयम् सुरापानहृदायुक्तंगुरुतल्पकटिद्वयम् तत्संयोगपद
द्वंद्वं अंगप्रसंगपातकं उपपातकरोमाणंरक्तश्मश्रुविलोचनं
खड्गचर्मधरंकृष्णंकुक्षौपापंविचिंतयेदिति॰ इतिपापपुरुष
र्जे विसर्जनप्रकरणं अथार्घ्यप्रदानं गृह्यपरिशिष्टे अथाचम्यदर्भ
पाणिःपूर्णमुदकांजलिमुद्धृत्यादित्याभिमुखःस्थित्वाप्रणव
व्याहृतिपूर्वयासावित्र्यात्रिर्निवेदयन्नुत्क्षिपेत्तदेवार्घ्यनिवेद
नम् आसावादित्योब्रह्मेतिप्रदक्षिणंपरिषिच्यउपस्थेत म
ध्या ध्याह्नेसंध्यैविशेषस्तत्रैवोक्तः अथाह्णीयाहंसवसावा
त्रिःसकृद्वार्घ्यमुक्षिप्येति आधारमंडलस्थंज्योतिर्विशेषमंजं
जलिपुटंप्रतिदक्षिणनासापुटेनसंप्राप्तंपरिभाव्यतच्चमंदे

हासुरनिबर्हणायजलांजलिनासहक्षिपामीति भावयन्गायत्रीत्रि
रसापुनस्तत्तेजोवाममार्गेणस्वस्मिन्स्थापयेदिति विशेषोबोध्यः
तदुक्तमाश्वलायनस्मृतौ ततस्तिष्ठन्जलंगृह्यप्राङ्मुखोंजलिना
स्मरेत् स्थानादौसुस्थितंतेजस्फाटिकज्योतिषासमं स्थानादौ आ
धारमंडपद्मइत्यर्थः उच्चार्यतच्चसंप्राप्तंदक्षिणेनयथांजलिं व्या
हृत्यादिजपेन्मंत्रंस्मरन्येवंपरितोरवेः मंदेहान्सुधातः क्रूरान्निक्षि
पेत्तेषुयथांजलीन् षोडशाक्षरमंत्रेणपुनराकृष्यसत्वरः पुन
र्जलंगृहीत्वैवतेजोमंत्रंचतत्स्मरेत् एवंत्रिवारमावर्त्यदग्धाता
नसुरान्द्विजः मंत्रेणाकृष्यतत्तेजःस्थानादौस्थापयेत्स्मरन् पूर्वव
द्वाममार्गेणास्मत्वासस्थाप्यचात्मनि प्रदक्षिणंसमावर्त्यजलंग
ह्याचमेत्ततः इतिषोडशाक्षरमंत्रलक्षणमाहव्यासः षोडशा

आन्हीक॥
॥३१॥

हरकं ब्रह्मगायत्र्यास्तु शिरस्मृतं ॐ मापोज्योतिरियेषमंत्रोवैते
त्तिरीयकः इति संग्रहे मुक्तहस्तेनदातव्यंमुद्रांतत्रनकारये
त् तर्जन्यंगुष्टयोर्योगेराक्षसीमुद्रिकास्मृताराक्षसीमुद्रिका
योगेनतोयंरुधिरंभवेत् जलेष्वर्घ्यंप्रदातव्यंजलाभावेशुचि
स्थले संप्रोक्ष्यवारिणासम्यक्कृततोर्घ्यंतुप्रदापयेत् एतच्चा
र्घ्यदानंप्रधानमितिकेचित् अंगमितिबहवः एवमर्घ्यांता
निपूर्वांगानिनिरूपितानि अथगायत्रीजपः तत्रगृह्यं यज्ञो
पवीतीनिसोदकःसंध्यामुपासीतवाग्यतः सायमुत्तराभि
मुखोन्वष्टमदेशंसावित्रीजपेदर्धास्तमितेमंडलआनक्षत्रद
श्रा र्शनादेवंप्रातःङ्मुखस्तिष्टन्नामंडलदर्शनादितिअस्यार्थः
यज्ञोपवीतिशिखाबंधनादेरप्युपलक्षणं निसोदकःस्म ॥२१॥

युक्तश्चमनाघर्घ्यप्रदानीतमुदकसाध्यत्वात्उदकशब्देनलक्ष्य
तेतंनिसंयस्यसः वाग्यतःसंध्यामुपासीतेतिसार्वकालसाधार
णं सायंतुविशेषोयम् उत्तरस्याअपरस्याश्चांतरालं वायव्या
मु दिक्तदभिमुखः तत्रापिनांजस्यनकिंतुअन्वष्टमदेशंअभिमु
खःप्रतीच्यायःउत्तरोभागः तदभिमुखइत्यर्थः प्रातस्तिष्ठन्नि
ति उपवेशननिवृत्त्यर्थं अत्रगृह्यपरिशिष्टं शुचौदेशेदर्भे
भसोक्षितेदर्भान्संस्तीर्यव्याहृतिभिरुपविश्यप्राणायामत्रयं
कृत्वात्मानंव्याहृतिभिरभ्युक्ष्यसावित्र्याऋषिदैवतछंदांस्यनु
स्मृत्यषड्भिस्तदंगमंत्रैर्यथांगमात्मनिन्यस्यात्मानंतद्रूपंभावय
येद्यथातत्सवितुर्हृदयायनमइतिहृदयेवरेण्यंशिरसेस्वाहेति
शिरसिभर्गोदेवस्यशिखायैवोषडितिशिखायांधीमहिक

अ॰टीका।।

।।४०।

वचायकुभित्करसि धियोयोनः नेत्रत्रयायवौषडिति नेत्रल
लाटेषु अस्त्रप्रचोदयादस्त्रायफट्इति करतलेस्त्रं प्राच्यादि
षुदशासुदिक्षुन्यसेदेषोंगन्यासः एवमप्येकेनेच्छंतिसहिविधि
रवैदिकस्यर्थंमंत्रदेवतांध्यात्वा आगच्छवरदेदेवीत्यावाहति
ष्ठन्नर्घनक्षत्रेष्वा मंडलदर्शनान्मंत्रार्थमनुसंदधानः प्रण
वम्याहृतिपूर्विकांसावित्रींजपेदिति भगवान् सायंप्रातश्च
मध्याह्ने सावित्रीवाग्यतोजपेत् सहस्रपरमांदेवींशतमध्यां
दशावरां गायत्रींसंस्मरेद्धीमान्हृदिवासूर्यमंडले मनःसं
तोषणंशौचंमौनंमंत्रार्थचिंतनं अव्यग्रत्वमनिर्वेदोजपसं
पत्तिहेतवइति अत्रकेचि च्चिगायत्रीजपएवप्रधानंतस्यै ।।४०।
वफलस्यबंधश्रवणात् तथाचवृहस्सरा[illegible]यउपासिताये

रा रः ग।

नतेनोपास्तंजगत्त्रयम् गायत्रीमेवयोज्ञात्वासम्यगभ्यसतेबु
धः इहामुत्रचपूज्यासौब्रह्मलोकमवाप्नुयादिति पाराशरीये
ष्टमाध्याये गायत्रीरहितोविप्रः शूद्रादप्यशुचिर्भवेत् गायत्री
ब्रह्मतत्त्वज्ञाःसंपूज्यंतेजनैर्द्विजाः इत्याहुः जपसंख्यांतरमाह
व्यासः अष्टोत्तरशतंनित्यमष्टाविंशतिमेववा विधिनादशकं
वापित्रिकालेषुजपेद्बुधः इति। जपयोग्यान्यासनान्याह व्यासः ना
कौशेयंकंबलंचैव अजिनंपट्टमेवच दारुजंतालपत्रंचआस
नंपरिकल्पयेत् कृष्णाजिनेज्ञानसिद्धिर्मोक्षश्रीर्व्याघ्रचर्मणि
कुशासनेव्याधिनाशः सर्वेष्टंचित्रकंबलइति निषिद्धान्यास
नान्याह सएव वंशासनेतुदारिद्र्यंपाषाणेव्याधिसंभवः धरण्यां
दुःखसंभूतिर्दौर्भाग्यंछिद्रदारुजे तृणेधनयशोहानिः पल्लवे

॥आन्हीक॥

॥४१॥ चित्तविभ्रमः इति तत्रोपवेशनमंत्रमाह स एव पृथिव्यामेरुपृष्ठ
तु ऋषिरित्यभिधीयते सुतलं छंद इत्याहु कूर्मो वै देवता स्मृता
मेरोरारोहणे तस्या विनियोगः प्रकीर्तित इति व्रह्ममनुः वस्त्रेण छा
घतुकरं दक्षिणं यस्सदा जपेत् तस्य तत्सफलं जाप्यं हीनमफलं ते
स्मृतमिति विश्वामित्रः उत्तमं मानसं जाप्यं उपांशुं मध्यमं विदुः
अधमं वाचिकं प्राहुः सर्वमंत्रेषु वै द्विजा इति गौतमः गछतस्तिष्ठ
या तो वापि स्वेच्छौ कर्म कुर्वतः अशुचेर्वा विनासंख्यां तत्सर्वं निष्फलं भ
वेदिति बौधायनः नाभेरधः संस्पर्शं कर्म संयुक्तो वर्जयेदिति
जपागमे तामक्षमालामाह हारीतः शंखरौप्यमयी माला कांचनी
वनजोत्पलैः पद्माक्षकैश्च रुद्राक्षैर्विद्रुमैर्मणिमौक्तिकैः रज ॥४१॥
तैर्द्राक्षैर्मालात्रैवांगुलिपर्वभिः गौतमः शतस्याच्छंखमणि

भिः प्रवालैश्च सहस्रकं स्फटिकैर्दशसाहस्रं मौक्तिकैर्लक्षमुच्यते
पद्माक्षैर्दशलक्षं तु सौवर्णैः कोटिरुच्यते कुशग्रंथ्या च रुद्राक्षैर
नंतं फलमुच्यत इति अक्षमालामणिसंख्यामाह प्रजापतिः अ
ष्टोत्तरशतं कुर्याच्चतुःपंचाशिकां तथा। सप्तविंशतिकां चापि ततो
नैवाधिका मता। पारिजाते। आर्षं छंदो दैवतं च विनियोगस्त
~~अनुष्टुभं भवेच्छंदो वागेश्वरी देवतास्मृता।~~ [illegible] थैव च। वेदितव्यं
प्रयत्नेन ब्राह्मणेन विपश्चितेति। गोभिलः। आयात्वित्यनुवाकस्य
वामदेव ऋषिः स्मृतः। अनुष्टुभं भवेच्छंदो वागेश्वरी देवता स्मृता।
आवाहने तु गायत्र्या विनियोगः प्रकीर्तितः। गंधर्वीरिष्टे तु
अनुवाकसमानार्थको मंत्रो विनियुक्तः। आगच्छतु इति तच्च प्रागुदा

हुतम्। व्यासोपि। आवाहयेत्तुगायत्रीं सर्वपापप्रणाशनीं।। आग
च्छवरदेवीजप्येमेसंनिधौभव। गायंतंत्रायतेयस्माद्गायत्रीत्व
मुदाहृतेति। व्याहृतीनांदेवताघाहयाराज्ञारः अग्निर्वायुस्त
थासूर्योबृहस्पत्या एवच। इंद्रश्चविश्वेदेवाश्चदेवताःसमु
चे दीरिताः। गायत्र्युष्णिगनुष्टुप्बृहतीपंक्तिरेवच। त्रिष्टुप्जगती ने
चैवछंदांस्येतान्यनुक्रमात्। भरद्वाजःकश्यपश्चगौतमोत्रि
स्तथैवच। विश्वामित्रोजमदग्निर्वसिष्ठऋषयःक्रमात्इ
ति। इतिजपप्रकरणं।। ।।अथोपस्थानविधिः। तत्रगृह्यपरि
शिष्टं। जातवेदसेसुनवामसोमंतच्छंयोरावृणीमहेनमोब्र
ग्र ह्मणेनमोस्त्वग्नयइत्येताभिरुपस्थायप्रदक्षिणंदिशःसाधि ।।४२।।
पानत्वायेसंध्यायेसावित्र्यैगायत्र्यैसरस्वत्यैसर्वाभ्योदेवता

भ्यश्चनमस्कृत्यततउत्तमेशिखरेदेवीभूम्यांपर्वतमूर्द्धनि। ब्रा
ह्मणेरभ्यनुज्ञातागच्छदेवियथासुखमिति। संध्यांविसृज्य। भद्रं
नोअपिवातयमनइत्यात्मानंतिचत्रिरुच्चार्यप्रदक्षिणंपरिक्रा
मन्नासत्यलोकादापातालाद्यालोकालोकपर्वतात्। येसंतिब्रा
ह्मणादेवास्तेभ्योनित्यंनमोनमइतिनमस्कृत्यभूमिमुपसंगृह्य
गुरून्वृद्धांश्चोपसंगृह्णीयादेवसायमितिमध्याह्नकालमधि
कृत्योक्तंतत्रैव। उद्बाहुरुन्मुखउदुसंजातवेदसंचित्रंदेवानामि
तिसृभ्यांपामादिसमुपस्थायजपमासीनोयथेष्टकालं[illegible]र्या। कु
हिसेषुसंध्याविधिर्व्याख्यातइति। दैवाघदिदिवामाध्याह्निके
नकृतंतत्रविशेषःस्मर्यते। रात्रौप्रहरपर्यंतंदिवाहृत्यानिका

रयेत्।अवगाहंब्रह्मयज्ञंसौरंजप्यंचवर्जयेदिति।सायंप्रातश्चोप
स्थानेविशेषमाहभगवान्।नमोब्रह्मणइत्येतांत्रिरुक्त्वायदिशो
नमेत्।इमंमेवरुणतत्त्वेतिसायंकालेविशेषतः।मित्रस्यचर्ष
णीधृताभ्यांप्रातःकालेविशेषतइति।आश्वलायनस्मृतौतु।अ
ग्निश्चतसृभिर्मंत्रैर्गायत्रैरेवबहृचैश्चसूक्तैः।मित्रैर्मित्रदैवत
कैः।मित्रस्यचर्षणीधृतइत्यादिभिरित्यर्थः।पाराशरीयमाध
वीयग्रंथनारायणः।वारुणीभिरथादित्यमुपस्थायप्रदक्षिण
मिति।यद्यपिवारुणीभिर्वरुणोपस्थानंलिंगात्प्रतीयतेतथापि
श्रुतेःप्राबल्याद्दिशोपस्थानेवारुणीनांविनियोगः॥तदाहु
र्भट्टपादाः।मंत्रार्थंमंत्रतोबुध्वापश्चाद्युक्तिंनिरूप्यचमंत्राकां ॥४३॥

क्षाबलेनैंद्र्याशेषत्वश्रुतिकल्पनं।श्रुत्याप्रत्यक्षयापूर्वंगार्हपत्यांगतां
गतेति।निराकांक्षीकृतेमंत्रेनिर्मूलश्रुतिकल्पना।तेनत्रीप्रभ
वत्तिवाक्यस्यालिंगस्यबाधनमिति।सांगायाःसंध्यायाःफलमा
हयमः।संध्यामुपासतेयेतुसततंशंसितव्रताः।विधूतपापास्ते
यांतिब्रह्मलोकंसनातनमिति।अकरणेप्रत्यवायमाहदक्षः।संध्या स
हीनोऽशुचिर्नित्यमनर्हःसर्वकर्मसु।यदन्यत्कुरुतेकर्मनतस्य
कु फलभाग्भवेत्।गोभिलोपि।संध्यायेननविज्ञातासंध्यायेनानुपा
सिता।जीवमानोभवेच्छूद्रोमृतश्वाचाभिजायतइति।मरीचिः
सूतकेकर्म्मणांत्यागःसंध्यादीनांविधीयतइति।तत्रविशेषमा
त हपारिजातेभरद्वाजः।सूतकेमृतकेकुर्यात्प्राणायाममंत्रकं।तथा त
मार्जनमंत्रांस्तुमनसोच्चार्यमार्जयेत्।गायत्रींसम्यगुच्चार्यसू

र्यीयार्घ्यंनिवेदयेत्।मार्जनंतुनवाकार्यमुपस्थानंनचैवहीति।अ
ऋगायत्रीदन्नाकंकार्यंतथाचाश्वलायनः।आपन्नश्चाशुचिःकाले
तिष्ठन्नपिजपेद्धृतीति।आपन्न।आपद्ग्रस्तः।तंप्रसग्निस्मृतौ
अंगांतरहाणेपिअर्घ्यस्यावश्यकतोक्ता।जलाभावेमहामार्गे
वंधनेत्वशुचावपि।उभयोःसंध्ययोःकालेरजसावार्घ्यमुत्सृजे
दिति।अशुचौ।आर्तोचेत्यर्थः।श्राद्धभोजिनांसंध्याधिकार
सिद्धयेविशेषस्मर्यतेहत्वाहत्वःपिबेदापोगायत्र्याश्राद्धभु
क्द्विजः।ततःसंध्यामुपासीतशुध्यतेतदनंतरमिति।नैतच्छ्रा
द्धभोजनप्रायश्चित्तं।तस्यगुरुणावक्ष्यमाणत्वात्।किंतुसंध्या
धिकारायेतिपारिजाते।अथमंत्रार्थः।तत्रआपोहिष्ठेत्यादयः ॥५४॥
ऋक्संहितास्थमंत्रास्तद्भाष्यादेवज्ञेयाः।इतरेतुव्याख्यायंते।

अग्निश्चेत्यस्यायमर्थः।अग्निश्चमाइतिमारभ्यंतां।मन्युःक्रोधाभिमा
निनीदेवतातथाचभगवान्व्यासः।अभिमानिव्यपदेशस्त्वितिसूत्र
यत्।मन्युपतयोजितक्रोधामहात्मानः।शिश्ना।शि।श्नेन।सुपांसु
लुगित्यादिनाडादेशः।इदंपापजातंमांतत्कर्तारंचाहंकारअमृतयो र्गा
नौमोक्षकारणेअग्न्याख्येज्योतिषिपरब्रह्मणिजुहोमिप्रक्षिपामि
तदर्थमिदमभिमंत्रितंजलंस्वाहामदीयंचअग्नौहुतमस्तु।एत
न्सूर्यश्चेत्यपिव्याख्यातं।आपःपुनंत्वित्यस्यायमर्थः।आपःपृ
थिवीमच्छरीरं।यच्छरीरंसापृथिवीसारूप्यकोक्तेः।साचपृथि
वीमांलिंगशरीरंपुनातु।किंचब्रह्मणोवेदस्यपतिःपरमात्मा
पुनंतु।पुनातुव्यत्ययेनबहुवचनं।ब्रह्मदेवैःपूता।पूतमित्यर्थः।

अ॰ टीक।।

।।४५।।

सुपांसुलुगिति पूर्वं सवर्णः।उच्छिष्टं तन्निमित्तकं पापं।सर्वं परिह
स्येति शेषः।मां पुनंतु।तदर्थं स्वाहा।अभिमंत्रितमुदकं आत्मन्यग्नौ जु
होमीत्यर्थः।प्रणवो ब्रह्मपरः।भवंत्यस्माद्भूतानीति भूः।अधिक
रणे क्विप्।भावयति स्थापयतीति विश्वमिति भुवः।अंतर्भावितण्य
र्थादसु निगुण भावश्छांदसः।सुष्ठु दृश्यति प्राप्नुवंति एतदिति स्वः।
कं धातोः।कर्म्मणि विच्बाकुलकात्।मह पूजायां।अस्मादसुनि
महः पूज्यं।जन जनने।तप आलोचने।आभ्यां कर्तर्यसुन्।सत्यं का
लत्रयाबाध्यं सवितुः प्रेरकस्य वरेण्यं भजनीयं भर्गः संसारभंजना
त्सच्चिदानंदात्मकं रूपं धीमहि।ध्यायेम यः सविता नो धियः प्रचो
दयात्।प्रेरयेत्।पंचमलंकारः।आपः व्यापकं।ज्योतिः।चिद्रूपं।र
सः।सुखं।अमृतं मोक्षः।इत्यग्रे लेति ॐ अंगीकुर्वे ध्यायामीत्यर्थः। ।।४५।।
नि

गत्यपरिशिष्टादावुपस्थानोत्तरकालानुष्ठेयतयोक्तमुपसंग्रहेण तु
प्रागेव ब्रह्मचारिप्रकरणे प्रपंचितं।इति संध्याप्रकरणं।। ।।अथ का
म्यजपः।आचार्याः।वैष्णवैर्वारुणैः सौरैः पावमानीभिरेव च।क्ष
पयेदाशु पापानि कामांश्च निखिलांल्लभेत्।रौद्रैर्विशेषतो घो
रान्ब्रह्महत्यादिकानपि।क्षपयेत्सौरूषेणापि कामांश्चाप्नोति दु
र्लभान्।शतरुद्रेण जप्तेन चास्यवामीयकेन वा।मोक्षमप्यसंस
देहं किमन्यत्तदधिकं ततः इति।ऋग्विधाने।विष्णोर्नुकं जपन्स
क्तं विष्णुरेव भविष्यति।वसिष्ठः।तमुद्धरीत्पंचं वापि सद्योजा
तादिपंचकं।पंचाक्षरं महामंत्रं जपेदनुदिनं सुधीः।आयुरारो
ग्यमैश्वर्यं संततिं पूर्णजीवनं।संपत्समृद्धिसौख्यं च लभते त्रि
वर्गासनादिति।स्नानकाले जपवित्रोषमाह व्यासः।कुपदाना

आन्हीक॥
॥४६॥

प्रणवंहंसःशुचिषत्व्याहृतिंच

मगायत्रीवेदेवाजसनेयके।सकृदंतर्जलेजप्त्वाब्रह्महत्यांव्यपोह
ति।इति।द्रुपदागायत्रीचाघमर्षणप्रकरणेप्रागेवोदाहृता।मूले।
द्रुपदादितिवास्नायाज्जुंबुकायेतिवापुनः।पुण्यानिचस्मरेत्तीर्था
न्सुरानामुनिरब्रवीत्इति।गौतमः।अपिवागायत्रीपच्छोर्धर्च
शः समस्तामपित्रिरंतर्जलेजपन्सर्वस्मात्पापात्प्रमुच्यतइ
ति।विस्तरोन्यत्रबोध्यः।अथहोमविधिः॥तत्रदक्षः।संध्याक
र्मावसानेतुस्वयंहोमोविधीयतइति।अशक्तंप्रतिसएवाह।
ऋत्विक्पुत्रोगुरुर्भ्राताभागिनेयोथविट्पतिः।एतैरपिहुतंयत्स्या
त्तद्धुतंस्वयमेवहीति।विट्पतिर्जामाता।कात्यायनः।असमक्षं
तुदंपत्योर्होतव्यंनर्त्विगादिना।द्वयोरप्यसमक्षंतुभवेद्धुतमन ॥४६॥
र्थकं।उभयोःसन्निधानंमुख्यं।एकतरसन्निधानंतुअनुक

ल्पः।संध्यावंदनंहोमंचसंक्षिप्याकुर्य्यात्लकारः।आचम्यमार्जनंकृत्वा
ततःप्राणान्समाचरेत्।प्राणायामैस्त्रिभिःपूतोगायत्र्याजपमाच
रेत्।तिष्ठन्नाचोदयात्प्रातर्जपेद्व्याहृतिपूर्वकं।आसीनःप्रत्यक्सा
यंतुवह्निकार्यंततःपुनरिति।समाचरेत्त्रिरध्येदित्यर्थः।अग्नि
कार्यंअग्नौकर्त्तव्यं।होममित्यर्थः।प्रातर्होमस्यकालमाहमनुः।
उदितेनुदितेचैवसमयाध्युषितेतथेति।सायंहोमकालमाहका
त्यायनः।यावत्सम्यङ्भाव्यंतेनभस्यृक्षाणिसर्वतः।लोहितत्वं न
नचापैतितावत्सायंतुहूयते।उभयत्रगौणकालमाह।आश्वलाय
नः।संगवांतःप्रातःप्रदोषांतःसायमिति।बौधायनः।आसा
यंकर्मणःप्रातराप्रातःसायंकर्मणः।आहुतिर्नातिपद्येतपा
र्वणंपार्वणांतरादिति।मरीचिः।शारीरापद्भवेद्यत्रभयाद्वार्त्तिः

प्रजायते।तथान्यास्वपि चापत्सुपक्षहोमो विधीयते।कात्यायनः।
विहायाग्निंसभार्यश्चेत्सीमामुल्लंघ्यगच्छति।होमकालात्यये
तस्यपुनराधानमिष्यते।होमश्चस्वगृह्योक्तविधिनाबोध्यः।
मूलं अग्निहोत्रंदद्यादेतुयथायुक्त्याथवासदे[illegible]ति।अस्या
र्थः।अग्निहोत्रंकुर्यात्।दत्तः अवस्था।जातपुत्रःकृष्णकेशो
६ ग्नीनाधीतेत्यत्रजातपुत्रकृष्णकेशपदाभ्यांवाक्यभेदपरिहा
रायलक्षिता।तदुक्तमरुद्रगाहः टच्च्।अग्निनिष्यसनंतर
मितिफलितोर्थः।यथायुक्ति।यथायोगं।स्वर्गकामादिवाक्य
बलात्तत्कामनयेत्यर्थः।सदेतिनित्यतयेत्यर्थः।यावज्जीवा
दिविधिबलादितिभावः।मूलं।श्रौतस्मार्त्तानिकर्म्माणिकुर्या
द्धर्मपरायणः।अग्निहोत्रफलावेद्यःषडंगपदक्रमः।अग्निहो
त

त्रासरोधर्म्मोनभूतोनभविष्यति।अग्निहोत्रंप्रकुर्वीतज्ञान
याश्रद्धयान्वितः।इष्टिश्चपशुसोमाश्चपाकयज्ञासुरार्चनं।
धर्म्माचारांश्चदानानिकुर्याद्धर्मपरायणइति।यस्यतुश्रौ
तस्मार्त्ताग्निद्वयंतंप्रत्याहभरद्वाजः।होमंवैतानिकंत्वास्मा
र्त्तंकुर्याद्विचक्षणः।स्मृतीनांवेदमूलत्वात्स्मार्त्तकेचिद्गुरावि
दुरिति।व्यासः।श्रौतंकर्म्मनचेच्छक्तःकर्त्तुंस्मार्त्तसमाचरेत्।
तत्राप्यशक्तकरणेसदाचारलभेद्बुधः।सदाचारःस्नानसंध्यादि।
अशक्तः।द्रव्याभावात्।व्याधितः।ज्ञानाभावाच्चेतिबहुविधा।
अर्थीसमर्थोविद्वान्शास्त्रेणापर्युदस्तश्चाधिकारीति।सिद्धांता
त्।तथाचमाधवीयेगिरः।स्वाभिप्रायलतंकर्म्मयत्किंचिज्ज्ञान
वर्जितं।क्रीडाकर्मेवबालानांतत्सर्वंनिष्प्रयोजनंइति।यत्किंचि
ग्रं

अन्हीकं।।

११४८।।

दितिश्रौतंस्मार्त्तंचेत्यर्थः।ज्ञानाभावेत्वनधिकारीत्वात्सर्वथैवनि ये
ष्फलान्यायुतः।आज्ञेपिवचनादीषत्फलमस्तीत्यवधेयम्।तथा
चगोतमः।धर्म्मिणांविशेषेणस्वर्गलोकंधर्म्मविदाप्नोतिज्ञा
नाभिनिवेशाभ्यामिति।धर्म्मिणामितिनिर्द्धारणेषष्ठी।अत्रध
र्म्मविद्विशेषेणस्वर्गमाप्नोतीत्युक्त्याज्ञानरहितानामपिअनुत्कृष्टः
स्वर्गोस्तीत्युक्तंभवतीतिहरदत्तोमिताक्षरायांव्याख्यातवान्।श्रौ रा २
तस्मार्त्तयोरग्निव्यवस्थामाहयाज्ञवल्क्यः।कर्म्मस्मार्त्तंविवाह स्या।
ग्नौकुर्वीतप्रत्यहंगृही।दायकालाहृतेवापिश्रौतंवैतानिकाग्नि
षु।वैतानिकाः।गार्हपत्यादयः।विष्णुः।बहुशुष्कैंधनेचाग्नौसु
समिद्धेहुताशने।विधूमेलेलिहानेचहोतव्यंकर्म्मसिद्धये।यो
नर्चिषिजुहोत्यग्नावंगारेचैवमानवः।मंदाग्निरामयावीचदरि ११४८।

द्रश्चाभिजायतेति॥ ॥इतिहोमप्रकरणं॥अथनित्यदानं।महाभा
रतेयुधिष्ठिरंप्रतिभीष्मः।एकस्मिन्नप्यतिक्रांतेदिनेदानविवर्जिते।
दस्युभिर्मुषितस्येवयुक्तमाक्रंदितुंभृशमिति।तस्माद्विभवानुसा
रेणपूगीफलादिकमपिप्रत्यहंदेयमित्यर्थइतिपारिजाते॥ ॥
अथमंगलदर्शनं नारदः।लोकेस्मिन्मंगलान्यष्टौब्राह्मणोगौ
र्हुताशनः।हिरण्यसर्पिरादित्यआपोराजातथाष्टमः।मनुः।
अग्निचित्कपिलासत्रीराजाभिक्षुर्महोदधिः।दृष्टमात्राः
पुनंत्येतेतस्मात्पश्येत्तुनित्यशइति।पश्यतेत्यात्मनेपदमा
र्षं।इयंसप्तधाविभक्तस्याह्नःप्रथमभागकृत्यं।अथद्वितीयभाग
कृत्यंदक्षः।द्वितीयेचतथाभागेवेदाभ्यासोविधीयतइति।कूर्म्मे
पुराणे।जपेदध्यापयेच्छिष्यान्धारयेद्वैविचारयेत्।अवेक्षेतचशा

आन्हीक.१

।५९।

स्त्राणि धर्म्मादीनि द्विजोत्तम इति। मूले। गुरोस्तु मितिं कृत्वा वेदा
ध्ययनमाचरेत्। अध्यापयेत्ततः शिष्यानभयशीलगुणान्विता
न्। वेदस्वीकरणं पूर्वं विचारोभ्यसनं जपः। तद्दानंचैव शिष्ये
भ्यो वेदाभ्यासोहि पंचधेति। दक्षः। समित्पुष्पकुशादीनां सका
लः समुदाहृतः इति॥ ॥अथ तृतीयभागकृत्यम्। दक्षः। तृती
ये च तथा भागे पोष्यवर्गार्थसाधनम्। पोष्यवर्गः स एवाह। माता
पिता गुरुर्भार्या प्रजा दीनः समाश्रितः। अभ्यागतोतिथिश्चा
ग्निः पोष्यवर्ग उदाहृतः। मातापितागुरुर्भार्यापुत्रादासीत
थैव च। अभ्यागतातिथिश्चाग्निः पोष्यवर्ग उदाहृतः। गृह
स्थस्तु सदायुक्तो धर्ममेवानुचिंतयन्। पोष्यवर्गार्थं सिध्य
र्थं धनमिच्छेत बुद्धिमान्। आत्मनेपदमार्षं। तल्लिं चौर्यादि

।५९।।

मा

नाप्यर्जनीयं। नेत्याह कर्म्मूले। न्यायोपार्जितवित्तेन कर्त्तव्यं तत्सदा
द्विजैरिति।। यत्कर्त्तव्यं तेनोपार्जितेनेति गुणविधिः। यद्यपि लि
प्सातत्र अर्जननियमः पुरुषार्थः। नतु क्रत्वर्थः इति न्यायेन स्व
पितं तथापि अनेन वचनेन तद्व्याघातो बोध्यः। मूले। कुसूलकुंभीधा
न्यो वा स्यात् त्र्याहिको श्वस्तनोपि वा।। जीवेद्वापि शिलोंछेन श्रेयानेषां
परः परइति। कुसूलादयो यद्यप्यनवस्थितप्रमाणास्तथापि स्व
कुटुंबपोषणद्वादशाहपर्याप्तधान्यः कुसूलधान्यः षडहपर्या
प्तधान्यः कुंभीधान्यः। वस्त्रं ऋग्गृहणं शिलं। कणोपादानमुंछ
मिति पारिजाताद्यो स्थितं। अर्जनोपायमाह मनुः। षण्णांतु कर्म्म
णामस्य त्रीणि कर्म्माणि जीविका। याजनाध्यापने चैव विशुद्धा
च्च प्रतिग्रहः इति। अस्य ब्राह्मणस्य। मूले। राजप्रतिग्रहो घोरो

१ एवंच यज्ञोपवीतोथ्वादिवंउ भयार्थता
बोधका

आन्हीक।

॥५०॥ मध्वाख्यादिविशेषणमः।पुत्रमांसंवरंभोक्तुंनतुराजप्रतिग्रहइति।
एतच्चउच्छास्त्रवर्त्तीराजविषयं।तथाचयाज्ञवल्क्यः।नराज्ञःप्र
तिगृह्णीयाल्लुब्धस्योच्छास्त्रवर्त्तिनइति।धर्म्मिष्टराजप्रतिग्रह
स्तुज्यायानेव।तदाहनारदः।शुचिनामशुचीनांचसन्निपातो
ग यथांभसा।समुद्रेसमतांयातितद्वद्राज्ञांधनागमः।यथाग्नौसंस्थि
तंसर्वंशुद्धिमायातिकांचनं।एवंप्रतिग्रहाःसर्वेशुचितांयांतिरा
जनीति।मूले।नकुर्यात्कृषिवाणिज्यंसेवावृत्तिंतथैवच।ब्राह्म
ण्याद्धीयतेतेनतस्मात्तानिविवर्जयेत्।कुर्यात्कर्म्माविरोधेन ग
ग धनधान्यस्यसंग्रहमिति।नपुंसकमनपुंसकेनेतितेनता
प्राप्ति नीतिसाधु।आपद्वृत्तिमाहमूले।वृद्धौचमातापितरौसा
ध्वीभार्याशिशुःसुतः।अप्यकार्यशतंकृत्वाभर्त्तव्यामनुर ॥५०॥

२ मूले।अयाचिताहृतंग्राह्यमपि
दुष्कृतकर्मणः।अन्यत्रकुलटाषंढ

ब्रवीत्।इति।अकार्यशतंअयाज्ययाजनादि।एतदभिप्रायेणैवाह
मूले।सीदंश्चेत्प्रतिगृह्णीयाद्ब्राह्मणेभ्यस्तथान्यतः।ततोपिचैतनृप
शूद्रेभ्यःशाखस्यवचनंयथेति।अब्राह्मणादिभ्योन्यूनाचारेभ्यो ग
योपप्रतिगृह्णीयादितितात्पर्यं।तथाचयाज्ञवल्क्यः।कुशाःशा
कंपयोमत्स्याःपुष्पंगंधादधिक्षितिः।मांसंशय्यासनंधानाः
प्रत्याख्येयंनवारिचेतिपठित्वाअयाचिताहृतमितिश्लोकंप
पाठविज्ञानेश्वरश्चैकवाक्यंनोपप्रशंसा [illegible] इत्यादिबोध्यं।
क्षत्रियादेरुक्तयुद्धादयोजनोपायाः।तथा [illegible] गौतमः।स्वामीऋ
क्थक्रयसंविभागपरिग्रहाधिगमेषुब्राह्मणस्याधिकंलब्धं
क्षत्रियस्यविजितंनिर्विष्टंवैश्यशूद्रयोरिति।वाक्यमतेववाध्या ख्या
नात्र।मूले।ब्रह्मचारीयतिश्चैवविद्यार्थीगुरुपोषकः।अध्वगःक्षी
पतितेभ्यस्तथाद्विषः।अन्यत्रकुलटादिकमयाचिताहृतंसंग्राह्यं

वृत्तस्थोग्राह्यमितितात्पर्यं।

हा यतिश्च षंडे ते भिक्षुकास्मृताः। भिक्षाहारो निराहारो भिक्षान्नैव प्र
तिग्रहः। अवधूतान्वपूताच्च सोमपानं दिने दिने ति। विद्यार्थी। ब्रह्म म
चारी भिन्नोपिव्रतस्नातकादिः। अध्वग इति। यस्य पाक सामग्री
वैकल्यं तादृशो ग्राह्यः। क्षीणवृत्तिः। अनयोगोपि सामग्री विकल्पः
। एते भिक्षायां पक्वान्ने धिकारिणः। सोममपानमिति। अर्थभागक्र पचनु
मः। चतुर्थे तु तथा भागे स्नानार्थं मृदमाहरेत्। तिलपुष्पकुशा
दींश्च स्नायाच्चाकृत्रिमे जले। मूलं। ततो मध्याह्नकाले तु पुनः स्ना
नं समाचरेत्। सूर्यस्य चाप्युपस्थानं जपहोमादिकं तथा। पंचय
ज्ञान्प्रकुर्वीत विधिदृष्टेन कर्मणा। वैश्वदेवं ससातिथ्यमुक्तं तच्चा
पित्राह्निक इति। होमो देवयज्ञः। वैश्वदेवे यज्ञ भूतयज्ञः [illegible] ॥५१॥
पितृयज्ञारब्धं त्रिकं। ईक्षणं। अतिथिप्रतीक्षा। आतिथ्यं अतिथि
देव

सत्कारः समाहारद्वंद्वः। उद्धृतमुद्धारः। भावे क्तः। अद्यैवा भिक्षा उद्धरे
त्। इति स्मृत्यन्तरे। गृह्यपरिशिष्टे। अथ मध्यंदिने तीर्थमेत्य सपत्नि
म्याथ वरुणप्रार्थनादि तर्पणांतं तेनोक्तेन [illegible] विधिनास्ना
यान्नस्मिन्प्राग्ब्रह्मयज्ञतर्पणाद्वस्त्रं निष्पीडयेदपुत्रादयोऽपि तत्त
र्प्यादिति। स्नानानंतरं धृतोर्ध्वपुंड्रः संध्यावंदनं कुर्यान्नदाहव्वं द्वि
कायाचारांख्यः। प्रातः संध्यां सनक्षत्रां मध्यमां स्नानकर्मणि। सादि
त्यां पश्चिमां संध्यामुपासीत यथाविधि। इति स्नानकर्मणीति। मध्य म
न्हे स्नाने कृते सति। तीर्थेयं। माध्याह्निकसंध्याविधिश्च प्रागेवोक्तः।
अथाहरहः कर्तव्यपंचमहायज्ञादिविधिरुच्यते। तेषां स्वरूपमाह
गृह्यकारः अथातः पंचमहायज्ञा देवयज्ञो ब्रह्मयज्ञो भूतयज्ञः पितृ
यज्ञो मनुष्ययज्ञ इति। तद्यदग्नौ जुहोति स देवयज्ञो यत्स्वाध्यायम

आन्हीक॥

॥५२॥

दद्याति

धीतेसब्रह्मयज्ञोयुद्धलिंकरोतिसभूतयज्ञोयत्पितृभ्योददातिसपि
तृयज्ञोयन्मनुष्येभ्यःसमनुष्ययज्ञइति।तानेतान्यज्ञानहरहःकुर्वीत
ति।व्यासः।वैश्वदेवंप्रकुर्वीतस्वशाखाविहितंततः।संस्कृतान्नैर्हवि त
विधैर्हविष्यंव्यंजनान्वितैरिति।व्यंजनमत्रघृतानतुक्षारादि।जुहु
यात्सर्पिषाभ्यक्तंतैलक्षारविवर्जितमितितेनैवाभिधानात्।सचाग
ग्नौलौकिकेवाग्नौकार्यः।शालाग्नौलौकिकेवापिजलेभूम्यामथा
सवै पिवा।वैश्वदेवस्तुकर्त्तव्योदेवयज्ञःस्मृतइतिकूर्मपुराणात्।शौ
नकोप्याह।औपासनेतुहोतव्यंशालाग्नौवाविजानताविकल्प
स्त्विच्छयाकार्योनास्त्यत्रव्यवस्थितिरिति।अत्रशालाग्निर्लौ
किकः।जातकर्मादिसिध्यर्थंयोव्याहृतिभिराहृतः।सोग्निः ॥५२॥
पौरुषइत्युक्तःशालाग्निर्लौकिकस्तथेतितेनपरिभाषणात्।

अंगिरः।यस्मिन्नग्नौपचेदन्नंतस्मिन्होमोविधीयतइति।अ
त्रवैश्वदेवइतिशब्देनदेवभूतपितृणांयज्ञास्त्रयउच्यते।तत्रहो
मोदेवयज्ञः[illegible]बलिर्भूतयज्ञः।स्वधाकारःपितृयज्ञःसिद्धेनित्यश्रा एवंन्यतेनैवः
ना द्धार्थंब्राह्मणभोजनंवावश्यकं।अतएवदेवलस्त[illegible]स्यतथाश्रा पितृयज्ञः
क द्धमनेकालतामाहएतेनविधिनाश्राद्धंकुर्यात्संवत्सरंसकृत्।
त्रिश्चतुर्वापिथाश्राद्धंमासेमासेदिनेदिनेइति।एवंदर्शश्राद्धम
पिअशक्तौ:संवत्सरमध्येसकृद्देवकार्यं।मासिकंपार्वणंश्राद्धमश
क्तानांतुवार्षिकमित्याश्वलायनस्मरणात्।सचायंवैश्वदेवआ
त्मसंस्कारार्थोन्नसंस्कारार्थश्च।अहरहःकुर्वीतेतिवचनात्।सिद्धस्य
हविष्यस्यजुहुयादितिवचनात्।एकस्यतूभयत्वेसंयोगपृथक्त्व
मिति।न्यायात्।नचप्रतिपुरुषप्रतिपाकंचतदावृत्तिःस्यादिति

अन्ही॰क॰।
॥५३॥

प्रधानं गुणवत्तिरितिन्यायात्। अविभक्ते सर्वैः पृथगनुष्ठेयं
स्यात्संध्यावंदनादिति वाच्यम्। तद्येकस्मिन्काले पुनः पृथगन्नं प
च्यते सकृदेव बलिं कुर्वीत। अथ यद्येकस्मिन्काले बहुधान्नं पच्यते
गृहपतिम~~हप~~तिमहानसादेव न कुर्वीतेति गोभिलवचना
त्। तथाच शौनकः। वैश्वदेवमपि प्रोक्तं पूर्वैरेवमनीषिभिः। अ
न्नस्य चात्मनश्चैव संस्कारार्थं तदिष्यत इति। तच्च सायंप्रातः क
र्तव्यं। अथ सायंप्रातः सिद्धस्य हविष्यस्य जुहुयादित्याश्वला
यनस्मरणात्। सायंप्रातः करणंचोक्तो प्रातरेवं द्विरावृत्य कुर्या
द्यासक्तो द्विजः। सायं वा यदि भुंजीयात्तत्कृत्वाश्नात्वपि स्वय
मिति। मनुष्ययज्ञस्त्वतिथिभोजनं। एषामावश्यकतामाहाश्वा ॥५३॥
सः। होमाग्निदानेरहितं न भोक्तव्यं कथंचन। अविभक्तेषु सं

सृष्टेष्वेकेनापि कृतं तु वा। पयोमूलफलैर्वापि पंचयज्ञान्समा
चरेत्। अकृत्वा पंचयज्ञांस्तु भुक्त्वा चांद्रायणं चरेदिति। आश्व
लायनस्तु। वसतामेकपाकेन विभक्तानामपि ध्रुवं। एकस्तुच
तुरो यज्ञान्कुर्याद्वाग्यज्ञपूर्वकान्। वाग्यज्ञो ब्रह्मयज्ञः। अविभक्ता
विभक्ता वा पृथक्पाका द्विजातयः। कुर्युः पृथक्स्वधर्मपत्न्या भोज
३ दिने नात्साग्रदिनैं। पृथगेकपाकानां ब्रह्मयज्ञो द्विजन्मनां॥ सूतका
द्येस्त्वशुद्धकालान कुर्यान्न च कारयेदिति। इहमाधवाद्युदाहृतं गो
भिलवचनस्य पारिजाताद्युदाहृताश्वलायनवचनस्य विरोध
विकल्पादविभक्तानां पाकभेदे पृथक्वैश्वदेवस्य कृतालंतु बो न
ध्यं। हरदत्तस्त्वाह सकमध्येपि ब्रह्मयज्ञे भिन्नोश्यातारानुसंधेया
दे: एव तानेतानं हकुर्वीत्याश्वलायनस्मरणात्। इदं हि वचनंना ते
न न

।।अह्क।।
।।५४।।

प्राप्त प्रौणार्थं। तत्तद्विधिभिरेव प्रातिस्विकैस्तेषां प्राप्तत्वात्। किंतुब्र
ह्मारात्रं वा महागुरुषु दानाध्ययने वर्जयेरन्निति वक्ष्यमाणस्य प्र
तिषेधस्य बाधनार्थं माहरुरिति वचनं। नचैवं ब्रह्मयज्ञोपि प्र
सज्येतेति वाच्यम्। तस्य ह्यावनध्यायेपोयदात्माः शुचिर्यद्ध्वाद्
ति वक्ष्यमाणत्वात्। एवं च सूतकाधेरिस्कद्याहेत वचनं ब्रह्मय
ज्ञपरमिति। वृत्तिकारास्त्वाहुः। सूतके वैश्वदेवादिनकार्यमेव।
पंचयज्ञविधानं तु न कुर्यान्मृतिजन्मनोरिति स्मरणात्। अहरहः
कुर्वीतेति वचनं तु सर्वथा पाकासंभवे कंदमूलफलादिभिरपि
कुर्यादित्येवमर्थं। आपत्रमपि दातव्यं शाकाद्यमपि जुहुयादास
चमपि ब्रह्मयज्ञं कुर्यादिति वचनांतराच्चेति। अत्रैवार्थे मूलं
अलाभे येन केनापि फलशाकोदकादिभिः। पयोदधिघृतैः कु

पात्र

।।५४।।

र्याद्वैश्वदेवं स्रुवेण तु। हस्तेनान्नादिभिः कुर्याद्भिरंजलिनाज
लंइति। गृह्यपरिशिष्टेपि। शाकं वा यदि वा पत्रं मूलं वा यदि वा फ
लं। संकल्पयेद्यदाहारस्तेनैव जुहुयादपि। स्मृत्यंतरे। कोद्रवं चण
कं माषं मसूरं च कुलित्थकं। क्षारं च लवणं सर्वं वैश्वदेवे विवर्ज
येत्। अन्नादिनामभावे तु साक्षारादिभिरपि अग्नेरीशानभागे
उष्णो भस्म निहोतव्यं तदाहोमस्तबः। न क्षारलवणहोमो विध
ते तथा परान्नसंसृष्टस्य ह। विप्रस्य होममुदीचीनमुष्णं भस्मा
पोह्य तस्मिन्जुहुयात् हुतमहुतं चाग्नौ भवतीति। परिशिष्टे उ
त्तानेन तु हस्तेन स्वंगुष्ठाग्रेण पीडितं। संहतांगुलिपाणिस्तु वा
ग्यतो जुहुयाद्द्विरिति। अनग्निकस्य वैश्वदेवे विशेषमाहव
द्धवसिष्ठः। अनग्निकस्तु यो विप्रः सोन्नं व्याहृतिभिः स्वयं।

अ॰ह्नीक॰।

।।५५।।

हुत्वा शाकलमंत्रैश्च त्रिहंकाकबलिं हरेदिति। प्रवसतां तु गौ
णकर्तृद्वारेण गृहे वैश्वदेवः कारणीयः। गौणकर्तॄनाहात्रिः।
पुत्रो भ्राताथवा ऋत्विक् शिष्यः श्वसुरमातुलाः। पत्नी श्रोत्रिय
याज्याश्च दृष्टास्तु बलिकर्मणि। कर्त्रंतराभावे त्वाह बौधा
यनः। प्रवासे गच्छतो यस्य गृहे कर्त्ता न विद्यते। पंचानां महता
मेषां स यज्ञैः सह गच्छतेति। इति पंचमहायज्ञानां स्वरूपनि
रूपणं। अथ अनुष्ठानक्रमः। तत्र ब्रह्मयज्ञस्य कालमाह वृ
द्धबृहस्पतिः। संध्यावाक् तर्पणं कार्यः पश्चाद्वा प्रातराहुतेः।
वैश्वदेवावसाने वा नान्यो हेत्तें निमित्तत[illegible]ति। अत्र प्रातरा २
हुतेः पश्चादित्तिनारवीतरं आश्वलायनेन तु धनार्जनोत्तरका ।।५५।।
लमेव कर्त्तव्यतयोक्तत्वात्तदीयैस्तथैवानुष्ठेयं। यदाह। प्रात

रेवार्जयित्वैवं महायज्ञांस्ततश्चरेत्। स्वगृह्यविधिना कृत्वा ब्रह्म
यज्ञं पुरा द्विजः। स्वाध्यायतर्पणाभ्यां च गृहमेत्यार्चयेत्सुरानिति। ।।५६।।
माध्याह्निकसंध्यानुष्ठानानंतरं प्रागग्रेषु दर्भेषु प्राङ्मुख उप
प नूयोरुस्थं कृत्वा सव्यं पाणिं प्रागंगुलिमुत्तानं कृत्वा तस्मिन्पवि
त्रं प्रागग्रे निधाय दक्षिणं पाणिं न्यंचं प्रागंगुलं तेन संदध्यात्
तदाह कारिकाकारः। दर्भान्बहून् श्रुचौ देशे प्रागग्रानास्तृणाय
थ। दर्भेषु पवित्रोत्कर्मण्यत्र प्राङ्मुख एव सन्। कृत्वोपस्थं क
रं सव्यं उत्तानं प्राग्दिगंगुलं। पवित्रे स्थापयेदुक्ते प्रागग्रे दक्षि
णेन तु। न्यंचं प्रागंगुलं तेन संदध्याद्दक्षिणं करं इति। ततो द्यावा
पृथिव्योः संधिमीक्षमाणः। संमीलिताक्षो वा सूक्ताद्यन्यत
मं यदध्ययनं तदक्षि संधाय वाक्ति ततः ॐ का[illegible]रं व्याहृतीश्च

।आन्हीक।

।।५६।।

दुर्गेशो

सकृदुच्चार्यगायत्रीपच्छोनवानंचत्रिर्जपेत्।तदुक्तंकारिकायां।
सूक्तानामन्यतमंपूर्वमभिसंधायशक्तितः।ॐपूर्वाव्याहृतीस्ति
स्रःसमस्तास्ततःसकृद्वदेत्।पच्छस्त्वर्धर्चशःसर्वांसावित्रींत्रि
र्वदेदयेति।ततःपूर्वाभिसंहितंयथाशक्त्याधीयात।तदाह
शौनकः।ततोयावत्मतिशातमध्यायंसूक्तमेववा।ऋचंवाते
तोवत्र्यमधीयीतस्वशक्तितइति।ततःकर्त्तव्यमाहगृह्यका
रः।सयावन्मन्येततावदधीत्यतयापरिदधाति।नमोब्रह्म
णेनमोअस्त्वग्नयेनमःपृथिव्यैनमओषधीभ्यः।नमोवाचे
नमोवाचस्पतयेनमोविष्णवेमहतेकरोमीति।पुनस्तर्पणा
नंतरंकर्त्तव्यंब्रह्मयज्ञशेषमाहगृह्यकारः।गृहानेत्ययद्ददा
तिसादक्षिणेति।भिक्षादानादिकंदक्षिणेत्यर्थः।उपवीत्यब्र

पं

।।५६।।

अ
ह्मयज्ञंकर्त्तुंशक्तश्चकिंचिदंगलोपेनयथाशक्तिकुर्यादित्याश्वलायना
हगृह्यकारः।सयदितिष्ठन्व्रजन्नासीनःशयानोवायंयंक्रतुमधी
तेतेनतेनहास्यक्रतुनेष्टंभवतीतिविज्ञायतेतस्यद्वावनध्यायौ
यदात्माशुचिर्यद्देशइति।द्वावनध्यायाविति।तत्रब्रह्मयज्ञःस
र्वात्मनानकार्यमित्यर्थः।अनध्यायांतरेषुतुअल्पंपठनीयम्
।तदाहापस्तंबः।अथयदिवातोवायात्स्तनयेद्वाविद्योततेवा
स्फूर्जेद्वैकांवर्चमेकंवायजुरेकंवासामाभिव्याहरेद्भूर्भुवःस्वः
यां सत्यंतपःश्रद्धांजुहोमीतितेनैवतद्धैवास्यैतदहःस्वाध्यायउ
पात्तोभवतीतिनमोब्रह्मणइतिचत्रिःपठेत्।तथाचश्रुतिः।न
मोब्रह्मणइतिपरिधानीयांत्रिरन्वाहेति।जप्यामंत्रविशेषउ
क्तऋग्विधाने।आग्नेयंसूक्तमाद्यंतुपुण्यंब्रह्मर्षिसम्मितंतारा

यस्योषकरंधन्यंजपन्विप्रोऽर्थमाप्नुयात्।ऋचंसर्वामिमांज्ञात्वास
पूतोनियतःशुचिः।संहिताफलमाप्नोतिऋग्वेदस्यनसंशयइ
ति।तथा।अग्निमीळेजपेत्सूक्तंपापघ्नंश्रीकरंपरं।पाराय
णफलंतस्यवेदानांस्यात्सहस्रशइति॥ ॥अथतर्पणविधिः
तत्रगत्वादेवतास्तर्पयतिप्रजापतिर्ब्रह्मावेदादेवाऋषयःस
र्वाणिछंदांस्योंकारोवषट्कारोव्याहृतयःसावित्रीयज्ञाद्या
वापृथिवीअंतरिक्षमहोरात्राणिसंख्याःसिद्धाःसमुद्रानद्यो
गिरयःक्षेत्रौषधिवनस्पतिगंधर्वाप्सरसोनागावयांसिगा
वःसाध्याविप्रायक्षारक्षांसिभूतान्येवमंतान्यथऋषयः।श
तर्चिनोमाध्यमागृत्समदोविश्वामित्रोवामदेवोऽत्रिर्भर
द्वाजोवसिष्ठःप्रगाथाःपावमान्यःक्षुद्रसूक्तामहासूक्ताइति

प्राचीनावीति।सुमंतुजैमिनिवैशंपायनपैलसूत्रभाष्यभारतमहा
भारतधर्माचार्याःजानंतिबाहविगार्ग्यगौतमशाकल्यबाभ्रव्य
मांडव्यमांडूकेयागार्गीवाचक्नवीवडवाप्रातिथेयीसुलभामैत्रे
यीकहोलकौषीतकंमहाकौषीतकंपैंग्यंमहापैंग्यंसुयज्ञसांख्या
यनमैतरेयंमहैतरेयंशाकलंबाष्कलंसुजातवक्त्रमौदवाहि
महौदवाहिसौजामिशौनकमाश्वलायनंयेचान्येआचार्या
स्तेसर्वेतृप्यंतुप्रतिपुरुषंपितृंस्तर्पयित्वेति।अस्यार्थः।परि
धानीयानंतरमेतादेवतास्तर्पयेत्।प्रजापतिमारभ्यएकोन
त्रिंशत्।ताश्चयथायोग्यंतत्पतुतृप्यतांतृप्यत्वितिशब्दमुच्चार्य
तर्पयेत्।एवमंतानीतिपृथक्त्वेनबोध्यः।तथाचकारिका।अपां
समीपमागत्यतर्पयेदथदेवताः।एवमंतानितृप्यंत्वित्यंतेऋषीन्

अन्हीक।।
२५८।।

निमंत्रकं सिंचेत्प्रजापतिस्तृप्यत्वित्युपो देवतीर्थतः।धातुस्तु वि
र्यथालिंगं मंत्रांतेषु प्रयुज्यत इति।शौनकोपि।मंत्रैः प्रजापतिस्तृ
प्यत्विसारभ्ययथोदितैः।एवमंतानि तृप्यंत्विति वैतुर्यथाक्रममि १सं
ति।द्यावापृथिवीत्तृप्यतामिति प्रयोक्तव्यं न तु तृप्येतामिति।द्वि त दि
धास्माल्लोडात्मनेपदं लिङ् परस्मैपदं वा।तत्र नाद्यः।धातोः पर
स्मैपदत्वात्।न द्वितीयः।शौनकादिभिर्लोडैव व्यवहारात्।तृ
प्यतु।तृप्यंत्विसादिसंदर्भविरोधाच्चेति दिक्।अथ ऋषयः इत्या
देर्ग्रंथस्यायमर्थः।देवतातर्पणानंतरं शांतर्दिप्रभृतीनुदगग्रा
न्तर्पयेत्।किंविशिष्टः सन्निवीती प्रासनयोः तीर्थविशेषश्च स्मृतेर्बो
ध्यः।तथा च कारिका।मंत्रैः शांतर्चिनस्तृप्यंत्विसादिभिरतः परं
प्रतिमंत्रं निवीती तु र्पयेद्धर्षीतीर्थत इति।प्राचीनावीती भूत्वा ।।५९।।
ग

दि
सुमंत्विसादित्रयोविंशतिवाक्यैः पितॄंस्तर्पयेत्।तत्र कहोडादिद्वितीयांतं
तर्पयामीति प्रयोगः कार्यः।अत्र पितृतीर्थं बोध्यम्।तथा च कारिका।
प्राचीनावीसथेदानीं तर्पयेत्पितृतीर्थत इति।द्वितीयांतेषु सर्वेषु तर्पया २त
मिपदं वदेदिति च।अंजलिसंख्यातूक्ता विष्णुपुराणे।देववर्णानांय
थान्यायं सकृत्सकृत् प्रजापतेः।पितॄणां प्रीणनार्थाय त्रिरापः पृथिवी
पत इति।व्यासः।एकैकमंजलिं देवा द्वौ द्वौ तु सनकादयः।अर्हंति पि
तरस्त्रीन्स्त्रीन स्त्रियश्चैकैकमंजलिमिति।अत्र सनकादयोदृसने
न ऋषयो विवक्षिताः।आश्वलायनभिन्नानामिति हि तैयाज्ञवल्क्येन के
षुतर्पणीयत्वोक्तः।सनकश्च सनंदनश्च तृतीयश्च सनातनः।
उ कपिलश्चासुरिश्चैव वोढुः पंचशिखस्तथा।एते ब्रह्मशिखास्तर्पण
इत्युक्ते।व्यासवाक्येणापवस्य स्त्रियश्चैकैकमित्यस्यापवादमाह सां
१ख्यानुव्याः परिकीर्तिताः।आश्वलायनपतानां तु च द्वेशैव ऋषयस्तर्प्या १
न

अन्हीकः।

।।५८।

२ द्वौ

श्वलायनः। मातृमुख्यास्तिस्रः तासां त्रीन् त्रीन् जलांजलीन्
इति। सापत्न्याचार्यपत्नीनां द्वौ द्वावंजलिमिति च। तर्पणप्रका
र उक्तः संग्रहे। अन्वारब्धेन सव्येन दक्षिणेनैव पाणिना। सव्येतरा
भ्यां पाणिभ्यामुभयथा वा तर्पणं भवेदिति। इदं च तर्पणं जले न कार्यं। तथा
च शंखः। उदके नोदकं दद्यात् पितृभ्यश्च कदाचन। उत्तीर्य च शु
चौ देशे कुर्यादुदकतर्पणमिति। अत्र विशेषमाह हारीतः। वसि
त्वा वसनं शुष्कं स्थले विस्तीर्णबर्हिषि। विधिज्ञस्तर्पणं कुर्यान्न पा
त्रे तु कदाचन। पात्राद्वा जलमादाय शुभे पात्रांतरे क्षिपेत्। जलपू
र्णेऽथवा गर्ते न स्थले तु विबर्हिषीति। पात्रविशेषमाह पितामहः। है
मं रौप्यमयं पात्रं ताम्रकांस्यसमुद्भवं। पितॄणां तर्पणे पात्रं मृन्मयं
तु परित्यजेदिति। कुशास्तरणे विशेष उक्त आग्नेयपुराणे। प्राग

।।५९।।

ग्रेषु सुरास्तर्प्या मनुष्याश्चैव मध्यतः। पितरो दक्षिणाग्रेषु एकद्वित्रिमितां
जली निति। विष्णुः। यत्र क्व च स्थले चास्यादुदके देवताः पितॄन्। तर्पये
त्तु यथाकाममप्सु सर्वं प्रतिष्ठितमिति। मरीचिः। सौवर्णेन च पात्रे
ण ताम्ररौप्यमयेन वा। औदुंबरेण खड्गेन पितॄणां दत्तमक्षयमिति।
योगयाज्ञवल्क्यः। अनामिकाधृतं हेम तर्जन्यां रौप्यमेव च। कनिष्ठि
काधृतं खड्गं तेन पूतो भवेन्नरः। दर्भधारणे विशेष उक्तः स्मृतिभा
स्करे। कुशाग्रैस्तर्पयेद्देवान्मानुषान्कुशमध्यतः। द्विगुणीकृतमूला
ग्रैः पितॄन्संतर्पयेद्द्विज इति। योगयाज्ञवल्क्यः। यद्युद्धृतं निषिंचेत्तु
तिलान्संमिश्रयेज्जले। अतोऽन्यथा तु सव्येन तिला ग्राह्या विचक्षणैरि
ति। अन्यथेति। अनुद्धृतेन तर्पणे इत्यर्थः। अरोमकस्थाने तिला
ग्राह्याः यदाह गोभिलः। रोमसंस्थान्तिलान्कृत्वा यस्तु तर्पयते पि

तथा

तृप्तान्। पितरस्तर्पितास्तेन रुधिरेणमलेन चेति। अथ तिलतर्पणनिषे
धकालाः। मरीचिः। सप्तम्यां रविवारे च गृहे जन्मदिने भृत्यपुत्रकल
त्रार्थिन कुर्यात्तिलतर्पणं। बौधायनः। सप्तम्यां रविवारे च मातापित्रोः
क्षयेहनि। तिलैर्यस्तर्पणं कुर्यात्स भवेत्पितृघातकः। संग्रहे। नंदा
यां भार्गवदिने कृत्तिकासु मघासु च। भरण्यां भानुवारे च गजछाया
ह्वये तथा। अयनद्वितये चैव मन्वादिषु युगादिषु। पिंडदानं मृदास्ना
नं न कुर्यात्तिलतर्पणं। युगादयो मन्वादयश्चानध्यायप्रकरणे प्रागे
वोक्ताः। बौधायनः। विवाहे चोपनयने चौले सति यथाक्रमं। वर्षम
र्द्धं तदर्द्धं च नेत्येके तिलतर्पणं। संस्कारेषु तथान्येषु जातपुंसव
नादिषु इति स्मृत्यंतरे। यावन्मासः समाप्येत तावत्पिंडांश्च वर्ज
येत्। वृद्धावनंतरं प्राज्ञस्तथैव तिलतर्पणमिति। प्रतिप्रसवमा ॥६०॥

ह कात्यायनः। उपरागे पितुः श्राद्धे पाते मायां च संक्रमे। निषिद्धेपि हि
सर्वत्र तिलैस्तर्पणमाचरेदिति। अत्र व्यतीपाते वैधृतेरप्युपलक्षणं।
पितृग्रहणं च पितृमातादेरपि। संक्रांतिग्रहणं [illegible]वायनद्वयव्यतिरि
क्तसंक्रांतिपरमिति पारिजाते स्थितं। वृद्धम[illegible]नुः। संक्रांत्यादिनि
मित्तेषु स्नानांगे तर्पणे तथा। तिथिवारनिषेधेपि तिलैस्तर्पणमाच
रेदिति। प्रतिपुरुषपितृंस्तर्पयेदिति सूत्रे शेषेण पित्रादीनां तर्पण
मुक्तं। तत्र विशेषमाह वशिष्ठः। सबधमनुकीर्त्य च नामगोत्रमनंत
रं। वस्त्रादिरूपं संकीर्त्य स्वधाकारेण तर्पयेदिति। यमः। सबधना
मगोत्रेण स्वधांतेन नमो ततः। वस्त्रादिरूपं निर्दिश्य तर्पयेत्पितृपू
र्वकमिति। एवं च पितॄन् अमुकनाम्नः वसुरूपान् स्वधा नमस्त
र्पयामीति प्रयोगवाक्यबोधम्। अथ क्रममाह पारिजाते संग्रहे

२ अमुकगोत्रान्   २ दि

आह्नीक ।
११६१॥

कारः । पितृमातृमातामहाः पितृव्यो भ्रातरः सुतः । पितृष्वसामातुलाश्च मा
तृभगिन्याः स्वजामयः । भार्या भगिन्यो दुहिता श्वशुरो भावुकास्नुषाः ।
श्यालको गुरुराचार्यः स्वामी मित्रं यथाक्रममिति । ग्रंथांतरे तु क्रमांतरेण
स्मर्यते । आदौ पिता ततो माता सापत्नजननी तथा । मातामहाः सप
त्नीकाः स्वपत्नी तदनंतरं । सुतभ्रातृव्यपितृव्याश्च मातुलाश्च स्व
भार्यकाः । दुहिता भगिनी चैव दौहित्रो भागिनेयकः । पितृष्वसा मातृ
ष्वसा श्वशुरो गुरुरर्थिन इति । अत्रावसानांजलिमीहकासायनः ।
पितृवंश्या मातृवंश्या ये चान्ये मत्त उदकमर्हंति तांस्तर्पयामित्सवसा
नांजलिरिति । विस्तरासंभवे संक्षेपतर्पणमुक्तं विष्णुपुराणे ।
आब्रह्मस्तंबपर्यंतं जगत्तृप्यत्विति ब्रुवन् । क्षिपेत्तोयांजलीं ॥६१॥
स्त्रीन्स्त्रीन्कुर्वन्संक्षेपतर्पणमिति । जीवत्पितृकविषये विशे

षमाह योगयाज्ञवल्क्यः । कव्यवाहोनलः सोमो यमश्चैवार्यमा त
था । अग्निष्वात्ताः सोमपाश्च तथा बर्हिषदोपि च । यदि स्याज्जीव
पितृकः एतान्विधात्ततः पितॄन् । अत्र कव्यवाहं तर्पयामीत्यादि
प्रयोगः । तर्पणाकरणे प्रत्यवायः स्मर्यते । देवताश्च मुनीश्चैव पि
तृव्यान् नतर्पयेत् । देवादीनामृणी भूत्वा नरकं प्रतिपद्यत इति । व
अथ यमतर्पणं । वृद्धमनुः । दीपोत्सवचतुर्दश्यां कार्यं तु यमत
र्पणं । कृष्णांगारचतुर्दश्यामपि कार्यं सदैव चेति । स्मृतिचंद्रिका
यां । यमाय धर्मराजाय मृत्यवे चांतकाय च । वैवस्वताय काला
य सर्वभूतक्षयाय च । औदुंबराय दध्नाय नीलाय परमेष्ठिने ।
वृकोदराय चित्राय चित्रगुप्ताय ते नमः । चतुर्दशैते मंत्राः स्युश्च
तुर्थ्यंता नमोन्विताः । एकैकेन तिलैर्मिश्रांस्त्रीन्स्त्रीन्दद्याज्जलांज

आन्हीक।

पा ६२।

लीन्।यावज्जीवकृतंपापंतत्क्षणादेवनश्यति।स्कांदे।दक्षिणाभि
मुखोभूत्वातिलान्सव्येनसमाहितः।देवतीर्थेनदेवत्वंतिलैःप्रेताधि
पोयतः।स्मृतिसारेतु।यज्ञोपवीतिनाकार्यंप्राचीनावीतिनापि
वा।देवत्वंचपितृत्वंचयमस्यास्तिद्विरूपता।श्लोकगौतमः।य
मोनिहंतापितृधर्मराजोवैवस्वतोदंडधरश्चकालः।प्रेताधिपो
दत्तकृतानुसारीकृतांतमेतद्दशभिर्जपंतिइति।दशभिःपरा
वृत्तिभिरितिशेषः।व्यासः।तथाकृष्णचतुर्दश्यांयेयादिस
प्तभिः।ससोदकांजलीन्दत्त्वासर्वपापैःप्रमुच्यते।वृद्धमनुः।इ
हजन्मकृतंपापमन्यजन्मार्जितंचयत्।कृष्णांगारचतुर्दश्यां
स्तर्पयंस्तद्व्यपोहति।इतियमतर्पणं।अथभीष्मतर्पणं॥चंद्रि
कायांव्यासः।कृष्णाष्टम्यांतुमाघस्यदद्याद्भीष्माययोजलं।संव

माघे

पा ६२।

त्सरकृतंपापंतत्क्षणादेवनश्यति।तत्रायंमंत्रः।वैयाघ्रपादगोत्रा
यसांकृत्यप्रवरायच।गंगापुत्रायभीष्मायप्रदास्येहंतिलोदकं।अ
पुत्रायददाम्येतत्सलिलंभीष्मवर्मणे।इतिभीष्मतर्पणं।ततःआ
चम्यदर्भपवित्रविसर्जनंकुर्यात्।तदुक्तंस्मृतिरत्नावल्यां।विकि
रेपिंडदानेचतर्पणेस्नानकर्मणि।आचांतःसन्नकुर्वीतदर्भ
संसर्जनंबुधाइति।तन्मंत्रस्तुतत्रैव।येषांपितानचभ्रातापु न
त्रोनान्यगोत्रिणः।तेसर्वेतृप्तिमायांतुमयोत्सृष्टैःकुशैस्तथेति।
ततोवस्त्रंनिष्पीडयेत्।तदाहशौनकः।देवादितर्पणंकृत्वावस्त्रं
निष्पीड्यप्रशोधयेत्।स्नानार्थंप्रस्थितंविप्रंदेवाःपितृगणैःस
ह।वायुत्वेनानुगच्छंतितृषितास्तेजलार्थिनः।निराशास्तुनिव
र्तंतेवस्त्रनिष्पीडनेकृते।तस्मान्नपीडयेद्वस्त्रमकृतेतर्पणेद्वि

अन्हीक५।

॥६२॥

जइति। निष्पीडनंच भूमौ। तदाह भारद्वाजः। वस्त्रोदकमपेक्षंते
येमृतादासकर्म्मिणः। तस्मात्सर्वप्रयत्नेन जलं भूमौ निपातये
दिति। ततः सूर्यायार्घ्यं दद्यात्। तथाच विष्णुपुराणे। दत्वाकामो
दकं सम्यक् प्रेतेभ्यः श्रद्धयान्वितः। आचम्य च ततो दद्यात्सूर्या
य सलिलांजलिं। नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे।
जगत्सवित्रे शुचये सवित्रे कर्म्मदायिने॥ इति तर्पणप्रकरणं।
॥ ॥अथ देवतार्च्चनविधिः। तथा च नृसिंहपुराणे। जलदेवं
नमस्कृत्य ततो गच्छेद्गृहं बुधः। पौरुषेण च सूक्तेन ततो विष्णुं
समर्च्चयेदिति। कूर्म्मपुराणे। ब्रह्माणं शंकरं सूर्यं तथैव मधुसू
दनं। अन्यांश्चाभिमतान्देवान् भक्त्याचक्रोधनो नरः। स्वैर्म्मंत्रैरर्च्चये
न्निसंपत्रैः पुष्पैस्तथांबुभिरिति। यद्यपि परमार्थतो देव एक एव।

॥६३॥

एको देवः सर्वभूतेषु गूढः। एकं सद्विप्रा बहुधा वदंति इत्यादिश्रुतिस्व
रसात्। उत्तरमीमांसास्थलाघवादिन्यायोपष्टंभाच्च तथापि औपा
धिकभेदमाश्रित्य अन्याश्चैव साधुक्तिरिति द्रष्टव्यम्। भागवतेप्युक्त
एवोक्तं। सर्वाभिमतयात्मन इति। तत्रापि कलौ हरिहरयोः पूजा प्र
शस्ता। तदुक्तं महाभारते। कलौ कलिमलध्वंसं सर्वपापहरं हरिं।
येर्च्चयंति नरा नित्यं तेपि वंद्या यथा हरिः। स्कांदे। ब्रह्मा कृतयुगे देव
स्त्रेतायां भगवान् रविः। द्वापरे भगवान् विष्णुः कलौ देवो महेश्वर इति।
२ तत्र हरेर्च्चनं यद्यपि। अप्स्वग्नौ हृदये सूर्ये स्थंडिले प्रतिमासु च। ष
ट्स्वेतेषु हरेः सम्यगर्च्चनं मुनिभिः स्मृतमित्याग्नेयपुराणवाक्याद
नेकत्र प्रतीयते तथापि कलौ सालग्रामशिलायामेव प्रशस्तं।
तथा च स्कांदे। कामासक्तोथ वा क्रुद्धः शालग्रामशिलार्च्चनात्

आन्हीक॥

॥६५॥

।भक्त्यावायदिवा भक्त्या कलौ मुक्तिमवाप्नुयात्।वैवस्वतभयं
नास्ति तथा च कलिकाजंतम्।यः कथां कुरुते विष्णोः शालग्रा
मशिलाग्रतः।शालग्रामशिलायास्त्वग्रे तिष्ठा नैव विद्यते।मत्
पूजां तु कृत्वादौ पूजयेत्तां ततो बुधः इति।शिवपूजनमपि कलौ लिं
गे स्थंडिले वा कार्यं।तथा च महाभारते।सदा तं यजते यस्तु श्रद्ध
या मुनिपुंगवः।लिंगे वा स्थंडिले वापि न्यासकं विधिपूर्वकं।युग
दोषं विनिर्जित्य रुद्रलोके प्रमोदते इति।भविष्ये।बाणलिंगानि
राजेंद्र ख्यातानि भुवनत्रये।न प्रतिष्ठा न संस्कारस्तेषामावाह
नं तथेति।तत्र विष्णुपूजाविधिस्तावत्कथ्यते।हेमाद्रौ।ब्राह्मणै
र्वासुदेवस्तु नृपैः संकर्षणस्तथा प्रद्युम्नः पूज्यते वैश्यैरनिरुद्ध ॥६५॥
स्तु शूद्रजैरिति।तल्लक्षणं च विष्णुधर्मे।पंचचक्रो वासुदेवः ष

ड्भिः प्रद्युम्नकः स्मृतः।संकर्षणः सप्तचक्रो निरुद्धैकादशैः स्मृत इ
ति।संख्याविशेषोप्युक्तस्तत्रैव।चत्वारो ब्राह्मणैः पूज्यास्त्रयो राजन्य
जातिभिः।वैश्यैर्द्वौ वै वसं पूज्यौ तथैकः शूद्रजातिभिरिति।इदं च नि
ष्कामपूजाविषयम्।काम्ये तु संख्यांतरमपि स्मर्यते।एकमूर्ति
र्न पूज्यैव गृहिणा भूतिमिच्छता।अनेकमूर्तिसंपन्नः सर्वकामा
नवाप्नुयात्।तथा।शालग्रामाः समाः पूज्या विषमा न कदाच
न।समेषु द्वितयं नेष्टं विषमेष्वेक एव हीति।ननु शूद्रादिभेदे
न संख्याव्यवस्था प्रोक्ता विष्णुधर्मोत्तरे।प्रणवोच्चारणा
च्चैव शालग्रामशिलार्चनात्।संभवत्येव।शालग्रामशिला
वापि चक्रांकितं तथापि च।ब्राह्मणः पूजयेन्नित्यं क्षत्रियादि
र्न पूजयेत् इति।ब्राह्मणीगमनाच्चापि शूद्रश्चांडालतां व्रजे

॥६४॥

दिश्यापस्तंबीयेनिषेधस्मरणादितिचेन्न।निषेधवाक्यस्य
स्पर्शपूर्वकपूजाविषयत्वात्।तथाचलैंगे।ब्राह्मणस्यैववपू
ज्योहंशुचेरप्यशुचेरपि।स्त्रीशूद्रकरसंस्पर्शोवज्रस्पर्शा
धिकोममतेति।बृहन्नारदीयेपि।स्त्रीभनुपनीतानांशूद्रा णा१४
णांचजनेश्वर।स्पर्शनेनाधिकारोस्तिविष्णोर्वाशंकरस्य
चेति।शूद्रोवानुपनीतोवास्त्रीवापिपतितोथवा।केशवंवा
शिवंवापिस्पृष्ट्वानरकमश्नुतइति।एवंचविष्णुधर्मोत्त
रीयवचने।क्षत्रियादिरित्यत्रातद्गुणसंविज्ञानबहुव्रीहिणा
शूद्रादेरेवग्रहणं।अतएवपाद्मे।ब्राह्मणक्षत्रवैश्यानांत्र
याणांमुनिसत्तम।अधिकारःस्मृतःशुद्भिःशालग्रामशिला ॥[illegible]॥
र्चने।स्त्रीशूद्रपतितादीनांषंढादीनांविकर्मिणां।नैवाधि ॥६५॥

कारोविज्ञेयःशालग्रामशिलार्चने।दीक्षायुक्तैस्तथाशूद्रैर्मद्य
पानविवर्जितैः।कर्त्तव्यंब्राह्मणद्वाराशालग्रामशिलार्चनमि
ति।स्पष्टंशूद्रादिनामेवब्राह्मणद्वारापूजाहितेतिदिक्।अथ
विष्णुपूजोपकरणानि।विष्णुधर्मोत्तरे।कलौयच्छतियोविष्णो
स्तुलसीकाष्ठचंदनं।विष्णुप्रीतिकरामर्त्याउत्तरांयांतितेध्रुवं।
यार्चयेन्मालतीपुष्पैर्नभूयस्तनपोभवेत्।स्कांदे।अहोमुग्धा
स्तेनष्टास्तेपतिताःकलिकंदरे।यैर्नार्चितोहरिर्भक्त्याकमले
रसितैस्सितैरिति।पाद्मे।कार्त्तिकेकेतकीपुष्पंयेनदत्तंहरेः
कलौ।दीपदानंचदेवर्षेतारितंतेनवैकुळमिति।पाद्मेद्वार
कात्रोलसंभूतंयस्तोयंपिबतेकलौ।पापानितस्यनश्यंत्या
तजन्मार्जितान्यपि।धृतेशिरसिपीतेचसर्वास्तुष्यंतिदेव

अन्हीकु॥
॥६५॥

ता॥ प्रायश्चित्तं हि पापानां कलौ पादोदकं हरेरिति। शिलैव शौ
लं। अज्ञादित्वात्स्वार्थे अण्। अत्र द्वारवतीशिलासंबंधितोयपान
विधानात्सापि शालग्रामसन्निधौ पूज्येति गम्यते। अथ पूजे
तिकर्त्तव्यता। आग्नेयपुराणे। अर्चनं संप्रवक्ष्यामि विष्णोर
मिततेजसः। यत्कृत्वा मुनयः सर्वे परं निर्वाणमाप्नुयुः॥ आ
नुष्टुभस्य सूक्तस्य त्रिष्टुबंतस्य देवता॥ पुरुषो यो जगद्बीजम्
र्षिर्नारायणः स्मृतः॥ प्रथमां विन्यसेद्वामे द्वितीयां दक्षिणे करे
।तृतीयां वामपादे च चतुर्थीं दक्षिणे न्यसेत्। पंचमीं वामजा
नौ तु षष्ठीं वै दक्षिणे न्यसेत्। सप्तमीं वामकट्यां तु अष्टमीं द
क्षिणे तथा। नवमीं नाभिमध्ये तु दशमीं हृदये तथा। एकाद
शीं कंठमध्ये द्वादशीं वामबाहुके। त्रयोदशीं दक्षिणे तु तथै ॥६६॥

वास्ये चतुर्दशीं। अक्ष्णोः पंचदशीं चैव विन्यसेन्मूर्ध्नि षोडशीं॥
यथा देहे तथा देवे न्यासं कृत्वा विधानतः॥ न्यासेन तु भवेत्सो
पि स्वयमेव जनार्दनः॥ एवं न्यासविधिं कृत्वा पश्चाद्यागं समा
चरेत्। पूर्वयावाहयेद्देवमासनं तु द्वितीयया। पाद्यं तृतीयया
चैव चतुर्थ्यार्घ्यं प्रदापयेत्। पंचम्याचमनं दद्यात् षष्ठ्या स्ना
नं समाचरेत्। सप्तम्यां च ततो वासो अष्टम्या चोपवीतकं। न
वम्यां गंधमेवं तु दशम्यां पुष्पकं तथा। एकादश्या तथा धूपं
द्वादश्या दीपमेव हि। नैवेद्यं तु त्रयोदश्या नमस्कारं चतुर्दशी।
प्रदक्षिणे पंचदशी विसर्जने षोडशीं तथा। स्नाने वस्त्रे च
नैवेद्ये दद्यादाचमनं तथा। कृत्वा षोडशभिर्मंत्रैः षोडशान्युप
चाराकृतिः। पुनः षोडशभिर्मंत्रैर्दद्यात्पुष्पाणि षोडश। [illegible]स

॥६७॥ वैंजपेत्भूयः पौरुषंसूक्तमुत्तमम्। षण्मासात्सिद्धिमाप्नोतिवि
घ्नमेवसमर्च्चयन् इति। यद्यपि शालग्रामशिलायामावाहन
विसर्जनेनस्तः। शालग्रामार्च्चनेनैव आवाहनविसर्ज्जने। शा
लग्रामेहि भगवानाविर्भूतः सदाहरिः इति। स्कांदवचनात्।
ना प्रतिमास्थानेष्वास्वग्न्यावाहने विसर्ज्जनवर्ज्जंसर्वंसमानमि
ति। बौधायनस्मरणाच्च। तथापि। तत्स्थानापन्नपुष्पांज
लौतदीयत्वविनियोगोबोध्यः। तथाचमंत्रराजानुष्टुप्विधा
ने। आवाहन[illegible]चाददद्यात्पूर्वंपुष्पांजलिंहरेः। तस्यैवान्मु
खत्वप्राप्त्यैयोगे [illegible]द्वासनेस्वा॥ अंतेपुष्पांजलिंदद्याद्या
गसंपूर्तिसि[illegible]उद्ये इति। भागेते उद्वासावाहनेनस्त
स्थिरायामुद्वासार्च्चने। अस्थिरायांविकल्पः स्यात्स्थं ॥६७॥

डिलेच भवेद्द्वयमिति। व्यासः। प्रतिमापटयंत्राणांनित्यस्नानं
नकारयेत्। कारयेत्पर्वदिवसे यथामलनिवारणमिति। व
स्त्रस्पनप्रतिदिनमपूर्वतानियमः। तदुक्तंतत्वसागरसंहि
तायाम्। वस्त्रमभ्युक्षणंचक्षुर्ऽपरंतु दिनेदिने। इति अप
रंपुष्पादि। विद्याकरे। यावच्चंद्रश्चसूर्यश्चयावतिष्ठंतिदेवताः।
ननिर्माल्यंभवेत्तावत्स्वर्णेविभूषणम्। तथा। तद्देवसमर्प
येदिसाकुः। शालग्रामेणसहपूजायांसत्यां शिवनिर्माल्य
मपिग्रहणार्हं। तदुक्तंस्कांदे। अग्राह्यंशिवनिर्माल्यंपत्रंपु
ष्पंफलंजलं। शालग्रामस्यसंसर्गात्सर्वंयातिपवित्रतामिति।
कूर्मपुराणे। नविष्णवाराधनंपुण्यंविद्यतेकर्मवैदिकं॥ तस्मा
दनादिमध्यांतंनित्यमाराधयेद्धरिं। अथवादेवमीशानंभ
गं

श्री ली का।

।।६५।।

तंसनातनं।आराधयेन्महादेवंभावभूतोमहेश्वरं।मंत्रेणरुद्र-
गायत्र्याप्रणवेनाथवापुनः।ईशानेनाथवारुद्रंत्र्यंबकेनस
माहितः।पुष्पैःपत्रैरथाद्भिर्वाचंदनाद्यैर्महेश्वरं।तथोन्नमः
शिवायेतिमंत्रेणानेनवाजपेत्।नमस्कुर्यान्महादेवंऋतंसत्य
मितीश्वरं।निवेदयेतचात्मानंयोब्राह्मणमितीश्वरं।प्रदक्षि
णंद्विजःकुर्यात्पंचब्रह्माणिवाजपेत्।ध्यायेत्तदेवमीशानं
व्योममध्यगतंशिवमिति।बोधायनोपि।अथातोमहादेव
स्याहरहःपरिचर्याविधिंव्याख्यास्यामः।स्नात्वाशुचौदे
शेगोमयेनोपलिप्यप्रतिकृतिंकृत्वाक्षतपुष्पैर्यथालाभम
र्चयेत्।सहपुष्पोदकेनमहादेवमावाहयेत्।ॐभूर्महा ।।६५।।
देवमावाहयामि।ॐभुवःमहादेवमावाहयामि।ॐस्वः

रमा

इत्यादि।इत्यावाह्य।आयातुभगवान्महादेवइत्यथस्वागतेना
भिनंदति।स्वागतमनुना।स्वागतंभगवतेमहादेवायए[illegible]त्तु
तं त्वासि[illegible]मास्तांभगवान्महादेवइत्यत्रकूर्चंददातिभगवतो
यंकूर्चोदर्भमयस्त्रिवृद्धरितसुवर्णस्त्रजुपस्थेत्यत्रस्थाना
निकल्पयति।अग्रतोब्राह्मणेकल्पयामिदक्षिणतस्कंदायक विछवे
ल्पयामिविनायकंकल्पयामि।पश्चिमतः।स्थूलायक।उत्त
रेउ[illegible]मायेकल्पया।नंदिकेश्वरायकल्पयामिति।कल्पयित्वा
मभिमंत्र्य थसाविअपात्रेप्राक्षाल्यत्रिरपःपवित्रमध्यआनीयसह
पवित्रेणादित्यंदर्शयेदोमिरुत्तमितिस्नानमोस्त्वितिरूपा ड्रेण
द्यंददात्प्रणवेनार्घ्यमपव्याहृतिभिर्निर्माल्यंपाद्योत्तरश्च्यं
अयनमइत्यथेनंस्थापयित्वापोहिष्ठामयोभुवइतितिसृभि

अ

हिरण्यवर्णाःशुचयःपावकाइतिचतसृभिःपवमानःसु
वर्जनइत्येतेनानुवाकेनस्नापयित्वाद्भिस्तर्पयति।भवंदेवं
तर्पयामि२।शर्वंदेवंतर्पयामि।ईशानंदेवंतर्पयामि।पशु
पतिंदेवंतर्पयामि।रुद्रंदेवंतर्पयामि।उग्रंदेवंतर्पयामि।
नं भीमंदेवंतर्पयामि।महांदेवंतर्पयामि।इतितर्पयित्वाथे
तानिवस्त्रयज्ञोपवितान्याचमनीयुदकेनव्याहृतिभिःप्रद पा
क्षिणमुदकंपरिषिच्यनमस्तेरुद्रमन्यवइतिगंधंदद्या
त्सहस्राणिसहस्रशइतिपुष्पंदद्यादीशानंत्वाभुवना तो
मधिश्रियइतिवाक्षतान्दद्यात्सावित्र्याधूपंदीपस्त्व
तिदीपंदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ता

२७

वे
भ्यांभगवतेमहादेवायजुष्टंचरुंनिवेदयामिइतिनैवेद्यंअथाष्ट
भिर्नामधेयैरष्टौपुष्पाणिदद्यात्।भवायदेवायनमः।शर्वायदे
वायनमः।ईशानायदेवायनमः।पशुपतयेदेवायनमः।रुद्राय
देवायनमः।उग्रायदेवायनमः।भीमायदेवायनमः।महतेदे
वायनमः।नमोब्रह्मणेनमोविष्णवेनमस्कंदायनमोविना
यकायनमः।शूरायनमोमहाकालायनमोनंदिकेश्वरायन
मइति।चरुशेषेणाष्टभिर्नामधेयैरष्टाहुतीर्जुहोति।भवाय
देवायस्वाहेत्यादिभिर्हुत्वाथत्रिष्टुभंगंधमाल्यैर्ब्राह्मणानलं
कृत्यायैनमृग्यजुःसामभिस्तुवंतिसहस्राणिसहस्रशइ
त्यनुवाकंजपित्वान्याश्चरौद्रान्मंत्रान्यथाशक्त्येकैकंभूर्भु

आन्हीका।

॥७०॥

वः स्वर्महरोम्। भगवते महादेवायचरुमुद्वासयामीत्यादिभि
रुद्वासनकाले ॐ भूः महादेवमुद्वासयामीतिरुद्रमुद्वास्य
२ग प्रयातुभवानीशः सर्वलोकनमस्कृतः। अनेनहविषातृप्तः।
पुनरागमनायच। पुनः संदर्शनायचेतिप्रतिमास्थानिष्वग्ना १
वावाहनविसर्जनवर्जंसर्वंसमानंमहस्वस्वसूत्रैमित्याचष्ट न
तइत्याहभगवान्बोधायनइति। बृहन्नारदीये। न्यूनातिरि
क्ततासिध्येत्कलौवेदोक्तकर्म्मणां। हरिस्मरणमेवात्तसंपूर्ण
फलदायकमितिभगवान्। यत्करोषियदश्नासियज्जुहोषि
ददासियत्। यत्तपस्यसिकौंतेयतत्कुरुष्वमदर्पणमिति।
नेहाभिक्रमनाशोऽस्तिप्रत्यवायोनविद्यते। स्वल्पमप्यस्यधर्म ॥७०॥
स्यत्रायतेमहतोभयात् इति। कौर्मे। योमोहादथवालस्यादह

त्वादेवतार्च्चनम्। भुंक्तेसयातिनरकंसूकरेष्वभिजायतइति।
॥ ॥इतिदेवपूजा॥ ॥अथगुरुपूजा॥ तथाचमनुः। मातापि
तृप्रभृतीन्गुरूननुकम्याहतेष्वेवनित्यंशुश्रूषांकुर्यात्प्रिय
हितेरतइति। वायुपुराणे। वस्त्राभरणमाल्यानिशयनान्या
सनानिच। प्रियाणिवासनेयानितानिदद्यान्निवेद्यगुरोरिति।
॥१॥इतिगुरुपूजा॥ ॥इतिचतुर्थभागकृत्यं। अथपंचमभाग
कृत्यंनृसिंहपुराणे। पौरुषेणचसूक्तेनततोविष्णुंसमर्च
येत्। वैश्वदेवंततःकुर्याद्बलिकर्म्मतथैवचेति। शातातपः।
वैश्वदेवःप्रकर्त्तव्यःपंचसूनापनुत्तयेइति। सूनापंचकंद
र्शयतियमः। पंचसूनागृहस्थस्यवर्त्तन्तेहरहःसदा। कंड
नीपेषणीचुल्लीजलकुंभउपस्करइतिसूना। हिंसास्थाना

आन्हीक॥
॥७१॥

निःकंडिनीमूसलोलूखलादि।पेषणीदृषदुपलादि।उपस्करः शूर्प
दि।अवस्करइतिपाठेमार्जन्यादिद्रष्टव्यं।तत्रगतं।अथसायंप्रा
तःसिद्धस्य हविषस्यजुहुयादग्निहोत्रदेवताभ्यःसोमायवनस्प
तयेग्नीषोमाभ्यामिंद्राग्निभ्यांद्यावापृथिवीभ्यांधन्वंतरइंद्रायवि
श्वेभ्योदेवेभ्योब्रह्मणेस्वाहेत्यथ।बलिहरणमेताभ्यश्चैवदेवता
भ्योभ्यओषधिवनस्पतिभ्योगृहायगृहदेवताभ्योवा।स्तुदेवताभ्य
इंद्रायेंद्रपुरुषेभ्योयमाययमपुरुषेभ्योवरुणायवरुणपुरुषेभ्यः
सोमायसोमपुरुषेभ्यइतिप्रतिदिशंब्रह्मणेब्रह्मपुरुषेभ्यइति
मध्येविश्वेभ्योदेवेभ्यःसर्वेभ्योभूतेभ्योदिवाचारिभ्यइतिदिवा
नक्तंचारिभ्यइतिनक्तंरक्षोभ्यइत्युत्तरतःस्वधापितृभ्यइति ॥७१॥
प्राचीनावीती।शेषंदक्षिणानिनयेदिति।अस्यार्थःसायं

मं
शब्दोरात्रेर्लक्षकः।प्रातःशब्दश्चाह्नः सिद्धस्यपक्वस्यहोमंत्रा
नाह अग्निहोत्रस्यादि।सायमग्निःप्रातःसूर्यः।प्रजापतिरुभ
यत्रएभ्यइत्यर्थः।सोमायवनस्पतयइत्येकाहुतिः।अग्निर्गृह
पतिःसोमोवनस्पतिरित्यादौवनस्पतेर्गुणत्वेनदृष्टत्वात्।वि
श्वेभ्योदेवेभ्यइतिचैकाहुतिः।तदेवंब्रह्मणइतिदशामीआहु
वा तिः।[illegible]देवयज्ञः।भूतयज्ञमाहस्वाहेत्यथबलिहरणमिति।
यागत्वादेवस्वाहाकारेलब्धेस्वाहाकारवचनं अन्यत्रबलौ
स्वाहाकारविरहज्ञापनार्थं तेनचान्यत्रबलौनमस्कारएव
प्रभवति।अथशब्दःआनंतर्यदेवयज्ञाव्यवहितोत्तरकालइत्य
र्थः।एताभ्यःपूर्वोक्ताभ्योदेवताभ्यः।चकारोवक्ष्यमाणानांसमु
च्चये।एवकारस्तुपौनर्वचनिकः।इंद्रपुरुषेभ्यइतिइंद्राद्युत्तर

इतिबोध्यांउदगैंद्राद्वलेरिंद्रपुरुषेभ्योबलिंहरेदिति।कारिकोक्तेः
एवयमपुरुषादिबलिरपिप्रधानादुदग्बोध्यब्रह्मणइतिएता
भ्यएतिशब्देनोपात्तासुदर्भासुदेवतास्वप्येतेब्रह्मणइतियाश्रा
कृतिस्तस्याअनंतरंकिंचिदंतरालमुक्त्वाभज्यइत्यादयोहो
तव्याः।यत्तुअंतरालेतत्रब्रह्मणइत्यादिदिग्देवतानांमध्ये
जुहुयात्इत्यर्थः।विश्वेभ्योदेवेभ्यःस्वाहा।सर्वेभ्योभूतेभ्यःस्वा
हा।दिवाचारिभ्यःस्वाहेत्येतदपिमध्यएवबोध्यम्।दिवेति। व
अनेनवैश्वदेवस्यप्रातरेवारंभोनतुअग्निहोत्रादिवत्साय
मितिसूचयति।अन्यथासायंप्रातरित्येकपक्षेमानुरूप्यमेव
निर्दिशेत्।उत्तरइति।सर्वासामुत्तरतइत्यर्थः।इतिभूतय
ज्ञः।अथपितृयज्ञमाह।स्वधेति।शेषग्रहणादानंतर्यला

भः।दक्षिणादक्षिणस्यांदिशिदक्षिणाग्रान्वाइतिपितृयज्ञः।इ
दंयज्ञत्रयंवैश्वदेवइत्युच्यते।अत्रकारिका।अहस्थोवैश्वदेवा
ख्यंकर्मप्रारभतेदिवा।तत्रनास्त्यत्रभगवृद्धितिलदर्भनयथा।
औपासनाग्निमन्यंवासमिध्याथहविर्भुजं।पर्युक्ष्यपरिषि
च्याग्निमलंकृत्यचपूर्ववत्।हविष्यपक्वमादध्यादधिश्रिया
नलेचतत्।श्रोह्याद्यासंघृताभ्यक्तंहदिसव्यंनिधायच।कृत्वा
हस्तेनसर्प्यायेत्यादिभिर्दशभिस्ततः।प्रजापतिपदस्योक्ति
वैश्वदेवेनतुस्मृतिः।पर्यूहनोक्षणेकुर्याद्धवयज्ञाय।मीरितः।
एतेभुविबलीन्हुत्वाप्राक्संस्थानान्निरंतरात्।मुक्त्वांतराल
प्राक्संस्थानभ्यइत्यादिभिर्हरेत।इत्यपिभवतिस्वाहाकारो
नपितृयज्ञके।अभ्याहतबलेःप्रसंगिंहायेतिबलिंहरेत्।

अन्हीक॰।
।।७३।।

उदेगेः इशाद्दलेरि द्रपुरुषेभ्योबलिंहरेत्।यमायेत्यंतरालस्यद
रेर्द्दक्षिणतोबलिः।याम्याद्दलेरुद्रयाम्यपुरुषेभ्योबलिंहरे
त्।प्राक्ब्रह्मणोबलिंहृत्वा वैरुणायेतिमंत्रेणः।तस्मादुदुत्तु
वरुणःपुरुषेभ्योबलिंहरेत्।सोमायेत्यंतरालस्यहरेदुत्त
रतोबलिं।सौम्याद्दलेरुद्रसोम[illegible]पुरुषेभ्योबलिंहरेत्।
जयंतंस्वाहास्वाहेतेबलिंहृत्वानिरंतरान्।मुक्षांतरा
[illegible]लमिंद्रादिदिग्देवानांबलिंहरेत्।ऐंद्रादिबलितःप्राच्यां प्रा—च्या
स्यात्सौरुषेबलिः।अंतरालेबलिंहृत्वाविशिष्टैर्मंत्रैरतःपरं।
रक्षोभ्यइतिसर्वस्माद्बलिमुत्तरतोहरेत्।भूतेयमुदितःप्रा यह्नो
चीनावीसततःपरंस्वधापितृभ्यइत्युक्त्वादक्षिणस्यांतुनिर्वपे ।।७३।।
त्इति।बलिहरणंचकारंकुर्यात्।पंचस्वेतेषुविप्राणांमुख्या
क्रा

चक्राकृतिर्भवेत्।चक्राकारेणयोविप्रःसदाभूतबलिंहरेत्।
सर्वपापविनिर्मुक्तोविष्णुसायुज्यमाप्नुयात्इतिशौनकवच
नात्।अथगृहबलिः।तत्रगृह्यपरिशिष्टं।अथास्यत्रोबेण
गृहदेवतानांबलिर्द्वारेपितामहायप्रक्रीरुद्राय।धर्माधर्माभ्या ळे
दिशेतिदिग्भ्यासनवग्रहायेंद्रायमविष्णुभ्यांस्कंदवरुणाभ्यांसो
मसूर्याभ्यामश्विभ्यांवसुभ्योनक्षत्रेभ्योधर्मध्येचास्तोष्पतये
ब्रह्मणेप्रागादिभितिमूलेषुसिध्यैश्रीयैकीर्त्यैवरुणायोदधा वध्यै
नेश्विभ्यांदृषदुपलयोर्द्यावापृथिवीभ्यामुलूखलमुसलयो
रथनिष्क्रम्यभूमावपआसिच्यश्वचंडालपतितभूतवायसेभ्यो
न्नंभूमौविकिरेयभूताःप्रचरंतिदिवानक्तंबलिमिच्छंतोविद्यु
रस्यप्रेष्ठाः।तेभ्योबलिंपुष्टिकामोददामिमयिपुष्टिंपुष्टिप

अ.टीका।
।।७४।।

तिर्ददातिति।रात्रौचेन्नक्तंबलिमितिब्रूयादथप्रक्षालितपा
णिपादआचम्यत्रा।तापृथिवीशिवमंतरिक्षमितिजपित्वान्या
निचस्वस्त्ययनानिततोमनुष्ययज्ञपूर्वकंभुंजीतेति।अत्रवि
त्रै शेषमाहशौनकः।।देवयज्ञावशेषांगृहद्वारादिषुक्षिपेत्।चं रु
डालपतितादिभ्योभूतयज्ञान्नशेषतः।पितृयज्ञान्नशेषेण
वायसेभ्योबलिंहरेत्प्रक्षालितां[illegible]पाणिस्तथाचम्यप्रवि
शेद्गृहमिति।इतिवैश्वदेवप्रकरणं।। ।।अथमनुष्ययज्ञः।अ
त्रमनुः।अतिथिभ्योन्नदानंतुनृयज्ञस्तुपंचमइति।ब्राह्म
णभोजनपर्याप्तान्नदानंशक्त्याभावेतुकल्प्यः।स्मर्यंकूर्मपुरा तै
णे।हंतकारमथाग्रंवाभिक्षांवाशक्तितोद्विजः।दद्यादतिथये ।।७४।।
नित्यंबुध्येतपरमेश्वरमिति।अतिथिंपरमेश्वरबुध्यापूजये

रु

त्इतिभावः।भिक्षादिलक्षणंमनुराह।ग्रासमात्रंभवेद्भिक्षाअग्रं
ग्रासचतुष्टयं।अग्रंचतुर्गुणीकृत्यहंतकारोविधीयतइति।
अतिथिनिरीक्षणायकिंचित्कालंगृहांगणेतिष्ठेत्।तदुक्तंमार्कं
डेयपुराणे।आचम्यचततःकुर्यात्प्राज्ञोद्वारावलोकनं।हूर्तस्या मु
क्ष्यो ष्टमभागमुदी[illegible]ह्यतिथिर्भवेत्।नमित्रमतिथिंकुर्यान्नैकग्रा
मनिवासिनं।अज्ञातकुलनामानंतत्कालेसमुपस्थितं।बुभुक्षु
मागतंश्रांतंयाचमानमकिंचनं।ब्राह्मणंप्राहुरतिथिंसंपूज्यः
शक्तितोबुधैरिति।वटुषुभिक्षुष्वागतेषुशक्तेनकर्तव्यंकिमि
त्यपेक्षायांपराशरोप्याह।दद्याच्चभिक्षात्रितयंपरिव्राड्ब्रह्म
चारिणां।इच्छयाचततोदद्याद्विभवेसत्यवा[illegible]तमिति।एतेनैवा रि
शयेनोमूलकारः।।अन्यांश्चतर्पयेत्सर्वाननाथांश्चतपस्विनः।
रु

अन्हीक॥
॥७५॥

पक्षिणश्चैव चांडालान् पतितान् कृमिकीटकानिति। येषां पंच
महायज्ञानामकरणे प्रत्यवायमाह व्यासः। पंचयज्ञांस्तु यो मो
हान्नकरोति गृहाश्रमी। तस्य नायं न च परो लोको भवति धर्म
तइति। माधवीये पुराणवचनं। यत्फलं सोमयागेन प्राप्नो
ति धनवान्द्विजः। सम्यक्पंचमहायज्ञैर्दरिद्रस्तदवाप्नुया
दिति। इति पंचयज्ञप्रकरणं। अथ भोजनविधिः। तत्र मनुः।
भुक्तवत्सु तु विप्रेषु स्वेषु भृत्येषु चैव हि। भुंजीयातां ततः पश्चा
दवशिष्टं तु दंपती। भोजनेतिकर्त्तव्यतामाह बौधायनः। उ
४६ पलिप्ते समे स्थाने शुचौ श्लक्ष्णसमन्विते। चतुरस्रं त्रिको
णं च वर्त्तुलं चार्द्धचंद्रकं। कर्त्तव्यमानुपूर्व्येण ब्राह्मणादिषु मं
डलं। व्यासः। पंचार्द्रो भोजनं कुर्यात् प्राङ्मुखो मौनमास्थितः। ॥७५॥

हस्तौ पादौ तथैवास्यमेषु पंचार्द्रता मतेति। आश्वमेधिके। आर्द्रपा
दस्तु भुंजीयात् प्राङ्मुखश्चासने शुचौ। पादाभ्यां धरणीं स्पृष्ट्वा पा
दैनैकेन वा पुनरिति। भोजनपात्राण्याह पैठीनसिः। सौवर्णे र
जते ताम्रे पद्मपत्रपलाशयोः। भोजने भोजनं कुर्वन् त्रिरात्रफ
लमश्नुते। एक एव तु यो भुंक्ते विमले कांस्यभोजने। चत्वारि तस्य
वर्द्धंते आयुः प्रज्ञा यशो बलमिति। अत्र पद्मपलाशौ भोजने
गृही व्यतिरिक्तविषयं। पलाशपद्मपत्रेषु गृही भुक्त्वैंदवं चरेत्।
ब्रह्मचारियतीनां तु चांद्रायणफलं भवेदिति व्याससंस्मरणात्।
मदनपारिजाते तु ताम्रपात्रं यतिगृहिव्यतिरिक्तविषयं। गृह
स्थस्य निषिद्धत्वात्। तथा च वृद्धमनुः। ताम्रपात्रे न भुंजीत भि
न्नकांस्ये मलाविले पलाशपद्मपत्रेषु गृही भुक्त्वैंदवं चरेत्। अ

आन्हीक.।

७८।।

त्रसर्वत्रपलाशनिषेधोवल्लीपलाशविषयः।पद्मपत्रनिषेध
स्तुस्थलपद्मपत्रविषयः।वल्लीपलाशपत्रेषुस्थलजेपौर
ष्करेतथा।गृहस्थश्चेत्समश्नीयाच्चांद्रायणंचरेत् इति
पृथिवीचंद्रोदयवचनात्।पलाशोवल्लीपलाशइतिस्मृत्यर्थ
सारेउक्तं।कांस्यपात्रंतुगृहस्थैकविषयम्।तथाचप्रचेताः।
तांबूलाभ्यंजनंचैवकांस्यपात्रेचभोजनं।यतिश्चब्रह्मचारीच
विधवाचविवर्जयेदिति।तच्चपात्रंप्राणाहुतिपर्यंतंभूमौ
स्थाप्यपश्चात्तुयंत्रिकायां।तदाहव्यासः।कांस्यपात्रस्थंभु
ंजीतपंचग्रासान्महामुने।शेषमुद्धृत्यभोक्तव्यइतिउ
द्धृत्य।यंत्रादौपात्रंनिक्षिप्येत्यर्थः।पित्रर्थेभोजनेतुभूमौपात्र ।।७८।।
स्थापनमावश्यकंपित्रर्थेतुनचोद्धरेदितिवाक्यशेषात्।

पित्र्येकर्मणिभुंजानोभूमौपात्रंनचालयेदितिब्रह्मपुराणाच्च
स्पष्टंचेदंमदनपारिजातादौ।ब्रह्मपुराणे।अन्नंदृष्ट्वाप्रण
म्यादौप्रांजलिःकथयेत्ततः।अस्माकंनित्यमस्त्वेतदितिभ
क्त्याथवंदयेत्।तदनंतरकृत्यमाहगोभिलः।अथातःप्राणा
हुतिकल्पः।व्याहृतिभिर्गायत्र्याभिमंत्र्य।ऋतंत्वासत्येनप
रिषिंचामीतिसायं।सत्यंत्वर्तेनपरिषिंचामीतिप्रातःइत्या
दि।परिषेचनानंतरभावीविशेषोभविष्यपुराणेउक्तः।भोज
नात्किंचिदन्नाग्रंधर्मराजायवैबलिं।दत्वाथचित्रगुप्तायप्रेते
भ्यश्चेदमुच्चरेत्।यत्रक्वचनस्थानांक्षुत्तृष्णोपहतात्मनां।प्रेता सं
नांतृप्तयेक्षय्यमिदमस्तुयथासुखमिति।तदनंतरंकर्तव्यमु
क्तंकौर्म्ये।अमृतोपस्तरणमसीत्यपोशानंक्रियांचरेत्।छ।।

आन्हीक।
।।७७।।

शौनकः। स्वाहांताः प्रणवाद्याश्चनाम्न मंत्रास्तुवायवाः। तर्ज
नींमध्यमांगुष्ठलग्ना प्राणाहुतिर्भवेत्। मध्यमानामिकांगु
ष्ठैरपानेजुहुयात्ततः। कनिष्ठानामिकांगुष्ठैर्व्यानेचजुहुया
त्ततः। तर्जनींतुबहिःकृत्वाउदानेजुहुयाद्बुधः। समानेस
र्वहस्तेनसमुदायाहुतिर्भवेत्। जिह्वयैवग्रसेदन्नंदशने
नंनसंस्पृशेत्इति। जिह्वाग्रसनेचविशेषउक्तो। आश्वमेधि
के। यथारसंनजानातिजिह्वाप्राणाहुतौनृप। तथासमाहि
तःकुर्यात्प्राणाहुतिमतंद्रितइति। विष्णुपुराणे। अश्नीयात्त
न्मनाभूत्वाभुंजीतमधुरंरसं। लवणाम्लौतथामध्येकटुति
क्तादिकांस्ततः। प्राग्द्रवंपुरुषोश्नीयात्मध्येचकठिनाश ।।७७।।

नः। अंतेपुनर्द्रवाशीबलारोग्येनमुंचति। कवलसंख्यामाहाप
स्तंबः। अष्टौग्रासामुनेर्भक्ष्याः षोडशारण्यवासिनः। त्रिंशत्तु द्वा
गृहस्थस्यह्यमितंब्रह्मचारिणइति।। आश्वमेधिके। वक्त्रप्र
माणपिंडांश्चग्रसेदेकैकशःपुनः। वाक्याधिकस्तुयःपिंडआ
त्मोच्छिष्टंतदुच्यते। सदावात्यशनंनाद्यान्नातिहीनंतुकर्हिचि
त्। यथान्नेनव्यथानस्यात्तथाभुंजीतनित्यशइतिति। वृद्ध
मनुः। पीत्वापोशानमश्नीयात्पात्रेदत्तमगर्हितं। भार्याभर्त
कदासेभ्यउच्छिष्टशेषयेत्ततः। उच्छिष्टशेषणंचघृतादिव्य
तिरिक्तविषयम्। तदाहपुलस्त्यः। भोजनंतुननिःशेषंकुर्या
त्प्राज्ञःकथंचन।। अन्यत्रदधिसक्त्वाज्यपललक्षीरमध्वप
इति। एतच्चभोजनंसायंप्रातःकार्यं। तदाहमनुः। सायंप्रा

तर्हिजातीनामशनंश्रुतिचोदितं। नांतराभोजनंकुर्यादग्निहो
त्रसमोविधिरिति। अत्रसायंप्रातर्भुंजीतेति नियमविधिः।
तेनसतिभोज्येसत्यांचभोजनशक्तौद्वेषादिनाभोजनमकुर्व
न्प्रत्यवैतीतिमिताक्षरायांविज्ञानेश्वरः। हरदत्तस्तु। सायंप्रात न
रेवेतिपरिसंख्या। सात्वयद्यपिदोषत्रयवतीतिथापिएकवाक्य
तालोभात्सोढव्या। एवंहिनांतरेत्यादिअनुवादएवेतिलाघवं।
अन्यथातुवाक्यभेदोभवेत्। गृहस्थएकवारंतुभुंजीतास्मि
न्मतमितितत्। अत्रापस्तंबोद्विरश्नीयात्इतिस्मृतसंहितास्थव
चनविरोधश्चस्यादितिगौतमव्याख्यायांमस्यपीपकृत्। भोज
नेवर्जनीयानिब्रह्मपुराणेदर्शितानि। हस्तपाणितलेभुंक्ते ॥७८॥
यश्चस्फूत्कारसंयुतं। प्रसृतांगुलिभिर्यश्चभुक्तंतस्यगोमांसव

कुर्मा

च्चतत्॥ नाजीर्णेभोजनंकुर्यान्नातिबुभुक्षितः॥ नार्द्रवासानार्द्र
शिरादेवालयगत्तोथवा। नप्रसारितपादस्तुपादारोपितपाणि
मान्। नवेष्टितशिराश्चापिनोत्संगकृतभोजनः॥ आसनारोपितन
चाश्नीयासीतत्रोषंपिबेत्तद्य। शाकमूलफलेक्षूणांदंतच्छेदैर्न
भक्षयेत्। बहूनांभुंजतांमध्येनाश्नीयात्त्वरान्वितः॥ वृथा
नविकिरेदन्नंनोच्छिष्टंकचिद्व्रजेत्। बृहस्पतिः। नस्पृशे
द्वामहस्तेनभुंजानोन्नंकदाचन। नपादौनशिरोवस्तिंनपदा
भाजनंस्पृशेदिति। आदित्यपुराणे। नोच्छिष्टंग्राहयेद्राज्येज
ग्ध्वाशिष्टंनसंसृजेत्। अद्भुक्तावशिष्टंतुनाद्यात्भांडस्थि
तंत्वपीति। कूर्मपुराणेपि। नार्धरात्रेनमध्याह्नेनाजीर्णेना
र्द्रवस्त्रधृक्। नभिन्नभाजनेचैवनभूम्यांनचपाणिषु। नोच्छि

॥अन्हीक॥
॥७१॥

मे

ह्येष्टतमोदधान्नमूर्द्धानंस्पृशन्नपि।नब्रह्मकीर्त्तयन्वापि
नेनिःशेषनभार्यया॥नांगारेनचवाकाशेनचदेवालया
दिष्विति।भार्यीतिसहयोगेतृतीय॥एतद्विषयविवेकस्तु
स्नातकधर्म्मप्रकरणएवोक्तः।वृद्धमनुः।नपिबेन्नचभुं
जीतद्विजःसव्येनपाणिना।नैकहस्तेनचजलंशूद्रेणाव
र्जितंपिबेत्।पिबतोयस्यतत्तोयंभोजनेमुखनिःसृतं।अ
भोज्यंतद्भवेदन्नंभोक्ताभुंजीतकिल्बिषं।पीतावशेषितं
तोयंब्राह्मणेनपुनःपिबेत्॥पिबेद्यदिहितत्तोयंद्विज
श्चांद्रायणंचरेदिति।नैकहस्तेनेति।आवर्जितमित्यनु
षज्यतेस्मारितमितिचवक्ष्यदर्थः॥तथाचहस्तद्वयेनाद ॥७१॥

घादितिफलितमितिहरदत्तः॥शूद्रेणेत्यत्रनेत्यनुषज्यते।अ
त्रिः।तोयंपाणिनखस्पृष्टंब्राह्मणोनपिबेत्क्वचित्।सुरापाने
नतत्तुल्यमित्येवंमुनिरब्रवीत्।शातातपः।उधसवामहस्ते
नयत्तोयंपिबतिद्विजः।सुरापानेनतत्तुल्यंमनुराहप्रजा
पतिः।शातातपः।अग्न्यासनोपविष्टस्तुयोभुंक्तेप्रथमंद्वि
जः।बहूनांपश्यतांसोऽज्ञःपंक्त्याहरतिकिल्बिषं।गोभिलः।
एकपंक्त्युपविष्टानांविप्राणांसहभोजने।यद्येकोपित्यजेत्पा
त्रंनाश्नीयुरितरेपुनः।मोहात्तुभुंक्तेयस्तत्रतत्सांतपनंच
रेत्।भुंजानेषुतुविप्रेषुयस्तुपात्रंपरित्यजेत्॥भोजने
विघ्नकर्त्तासौब्रह्महापितथोच्यतेइति।एतच्चपरे।घ्रात्म

संसागउच्छिष्टस्यापिवर्जनमिति।कलिनिपिंडेषुभागेवगणि
तत्वाद्युगांतरविषयकंबोध्यं।एकपंक्त्युपविष्टानामेकस्मि
न्नपिआचांतेउत्थितेवाअभोज्यं।तदाहगौतमः।आचमनो
च्छिष्टानव्यपेतानीति।अपेतभिन्नानिव्यपेतानिसहितानीत्यर्थ
इति।हरदत्तः।एतदपिगुरुभिन्नेआचांतेउत्थितेवाबोध्यं।
तदाहोशनाः।अगुरुभिराचमनोत्थानंचेति।पुराणे।स्ना
त्रि स्यतोवरुणःशक्तिंजुह्वतोश्रियंनाहरेत्।भुंजतोमृत्युरायुष्यं सु
तस्मान्मौनंत्रिषुस्मृतमिति।एतच्चपंचग्रासभक्षणात्प्राग
वगंतव्यं।तदाहवृद्धमनुः।अनिंदन्भक्षयेन्नित्यंवाग्यतो
न्नमकुत्सयन्।पंचग्रासान्महामौनंप्राणाद्याप्यायनंमह ॥८०॥

दिति।पंचग्रासानंतरंतुनाकृतंमौनं।तदुक्तमाश्वमेधिके।मौ
नीवाअथवामौनीप्रहृष्टःसंयतेंद्रियः।भुंजीतविधिवद्विप्रान
चोच्छिष्टानिवापयेदिति।शातातपः।हस्तदत्तानिचान्नानिप्रत्य
क्षलवणंतथा।मृत्तिकाभक्षणंचैवगोमांसाशनवत्स्मृतमिति।
पैठीनसिः।लवणंव्यंजनंचैवघृततैलंतथैवच।लेह्यंपेयं
चविविधंहस्तदत्तंनभक्षयेदिति।सएव।दर्व्यादेयंघृतान्नं
तुसमस्तव्यंजनानिच।तथा।उदकंपच्चपक्वान्नंयोदर्व्यादातु
स्र मिच्छति।सभ्रूणहासुरापश्चसस्तेनोगुरुतल्पगइति।आश्व
मेधिके।उदक्यामपिचांडालंश्वानंकुक्कुटमेवच।भुंजानोयदि
पश्येत्तुतदन्नंतुपरित्यजेत्।केशकीटावपन्नंचमुखमारुत
वीजितं।अन्नंतद्राक्षसंविद्यात्तस्मात्परिवर्जयेत्।याज्ञवल्क्यः।

॥८१॥ संधिन्यनिर्दशागवत्सागोपयः परिवर्जयेदिति। अत्र गो
त्वमविवक्षितं। तथाच गौतमः। गोश्व क्षीरमनिर्दशायाः
सूतके जामहिष्योश्च नित्यमाविकमपेयमौष्ट्रमैकशफंच
स्यंदिनीयमसूसंधिनीनांच विवत्सायाश्चेति। अत्र विव
त त्सायाः गवादेरिति हरदः। या गर्भिणी सती दुग्धे सा संधिनी।
एककालदोहिनीचेति हरदत्तः। विज्ञानेश्वरस्तु संधिनीग्र
हणं स्यंदिनियमसूवोरूपलक्षणं यस्याः स्तनेभ्यः क्षीरं स्यंद ने
ते सा स्यंदिनी। मृतवत्सा त्वाद्वत्सांतरेण संधीयमाना संधि
नीति नीतिचोक्तवान्। तत्रयमसुवोरितिनाद्द अशुद्धिः। ओः
सुपीतियण्प्रवृत्तेः। मृतवत्सा संधिनीति तु गौतमपर्यालो
चनया पुनरुक्तं। याज्ञवल्क्यवाक्यस्थस्य वेदमर्थं वर्णनं उव ॥८१॥

उ लेखकदोषादागत इति विवेक्तव्यं। कात्यायनः। चंडालपति
तोदक्याया वाक्यं श्रुत्वा द्विजोत्तमः। भुंजीत ग्रासमात्रं तु दिनमेक
मभोजनं। गौतमः। कृकलभ्रमणग्रांचक्रस्यालूखलस्यच। ए व्या
तेषां निनिदो यावत्तावत्कालमभोजनं। बृहस्पतिः। अप्येकपं
क्त्यानाश्नीयाद्ब्राह्मणैः स्वजनैरपि। कोहि जानाति किं कस्य प्र
छन्नं पातकं भवेत्। एकपंक्त्युपविष्टानां दुष्कृतं यद्दुरात्मनां। सर्वे
षांतत्समं तावद्यावत्पंक्तिर्न भिद्यते। पंक्तिभेदप्रकारं च स एव
वाह। अग्निना भस्मना चैव स्तंभेन सलिलेन च। द्वारेणैव च मा
ण र्गेण पंक्तिभेदो बुधैः स्मृतः। इति पराशरः। याव छित्तशिरा मुक्ते
या भुंक्ते दक्षिणामुखः। वामपादकरस्थित्वात्त छ रक्षांसि भुंज
ते इति। वामपादं करोयस्येति बहुव्रीहिः स्थित्वा। अनुपविष्ट र

८२

न
त्यर्थः ॥ रक्षांसीति । स्वयंप्राणाग्निहोत्रफलं प्राप्नोतीत्यर्थः ॥ अत्र
दक्षिणामुखत्वनिषेधो नित्यभोजनविषयः ॥ काम्यं तद्विधा
नात् । तथा च मनुः ॥ आयुष्यं प्राङ्मुखो भुंक्ते यशस्यं दक्षि
णामुखः । श्रियं प्रत्यङ्मुखो भुंक्ते ऋतं भुंक्ते उदङ्मुख इति ।
अथ भोजनविधेरुदीच्यांगानि । देवलः । भुक्त्वोच्छिष्टं समा
दाय सर्वस्मात्किंचिदाचमन् । उच्छिष्टभागधेयेभ्यः सोदकं
निर्वपेद्भुवीति । तत्र मंत्रः । रौरवे पुण्यनिलये पद्मार्बुदनि
वासिनां । प्राणिनां सर्वभूतानां अक्षय्यमुपतिष्ठतामिति ।
गधव्यासः ॥ ततस्स्वस्नःस्नममृतापिधानमसीत्यपः प्राश्य ॥८२॥
ततस्माद्धृत्यान्नमनागपस्त्स्य विधिवदानमेदि । गौतमः ।
द्ध ति

गंडूषस्याप्यसमये तर्जन्या वक्त्रचालनं । कुर्वीतेति यदि मूढा
त्मा रौरवे नरके पतेदिति । व्यासः । हस्तं प्रक्षाल्य गंडूषमपः पि
बेद्विचक्षणः । स देवांश्च पितॄंश्चैव ह्यात्मानं चैव घातयेदि
ति । तथा । तस्मिन्नाचमनं कुर्याद्यस्मिन्भांडे तु भुक्तवान् । यद्यु
त्तिष्ठत्यनाचांतो भुक्तवानासनात्ततः । स्नानं सद्यः प्रकुर्वी
त सोऽन्यथाप्रयतो भवेदिति । कौर्मे । आचांतः पुनराचा
मेदायं गोरिति मंत्रतः । द्रुपदां वा त्रिरावृत्य सर्वपापप्रणा
शनीं । प्राणानां ग्रंथिरसीत्यालभेत हृदं ततः । आचम्यांगु
ष्ठमानीय पादांगुष्ठे तु दक्षिणे ॥ निःस्रावयेद्धस्तजलमू
र्ध्वहस्तः समाहितः । कृतानुमंत्रणं कुर्यात् श्रद्धायामिति

मंत्रतः। अथाक्षरेणस्वात्मानं योजयेद्ब्रह्मणेति हि। सर्वेषा
मेव यागानामात्मयागः परः स्मृतः। योनेन विधिना कुर्यात्स
याति ब्रह्मणः पदमिति। अत्रिः। आचांतोप्यशुचिस्तावद्या
वत्पात्रमनुद्धृतं। उद्धृतेप्यशुचिस्तावद्यावन्नोन्मृज्यते मही।
भूमावपि हि लिप्तायां तावत्स्यादशुचिः पुमान्। आसनादु
त्थितस्तस्माद्यावन्न स्पृशते मही ~~लिङ्गिनां पीतावशे~~ तांमि
ति। विष्णुपुराणे। विष्णुरत्तात्थैवान्नं परिणामश्च वै तथा।
सत्येन तेन वै भुक्तं जीर्यत्वन्नमिदं तथा। इत्युक्त्वाचार्य स्वहस्ते
न परिमृज्यात्तथोदरं। अनायासप्रदायीनि कुर्यात्कर्माण्यतं
द्रितइति। मार्कंडेयः। भूयोप्याचम्य कर्तव्यं ततस्तांबूलं क्षण ॥८३॥
भ

मिति। वसिष्ठः। सपूगं च सुपत्रं च चूर्णेन च समन्वितं। अदत्वा द्वि
जदेवेभ्यस्तांबूलं वर्जयेद्बुधः। एकपूगं मुखारोग्यं द्विपूगं निष्फ
लं भवेत्। अतिश्रेष्ठं त्रिपूगं यच्चाधिकं नैव दुष्यति। पर्णमूले
भवेद्व्याधिः पर्णाग्रे पापसंभवः। चूर्णपर्णं हरेदायुः शिरा बु
द्धि विनाशनी। तस्मादग्रं च मूलं च शिराश्चैव विशेषतः। चूर्ण
पर्णं वर्जयित्वा तांबूलं खादयेद्बुध इति। एतच्च भोजनकाल
विशेषे निषेधति गौतमः। सूर्यग्रहे तु नाश्नीयात्पूर्वं यामचतु
ष्टयं। चंद्रग्रहे तु यामांस्त्रीन्बालवृद्धातुरैर्वि नेति। रात्रि
ग्रहणे यामत्रयस्यापवादमाह वृद्धवसिष्ठः। ग्रस्तोदये वि
धोः पूर्वं नाहर्भोजनमाचरेत्। ग्रस्तास्त मये विशेषमाह
भृगुः। ग्रस्तावेवास्तमानं तु रवींदू प्राप्नुतो यदि। तयोः परेद्यु

हृदयेस्नात्वाभ्यवहरेन्नरइति।विष्णुधर्मोत्तरेपि।अहोरात्रं
न भोक्तव्यंचंद्रसूर्यग्रहेयदा।मुक्तिंदृष्ट्वातुभोक्तव्यंस्नानंकृ
त्वाततःपरमिति।ननुदृष्ट्वाभोक्तव्यमित्युक्त्यादर्शनमावश्य
कंप्रतीयतेतच्चमेघाद्यावृतेनसंभवतीतितत्राभोजनंस्या
दितिचेन्न।मुक्तिज्ञानस्यैवंरूपत्वाच्छास्त्रीयनिश्चयस्यदृ
ष्ट्यानाविवक्षितत्वादितिमाधवादयः।तथाचवृद्धगौत
मः।राहोर्विमुक्तिंविज्ञायस्नात्वाकुर्वीतभोजनमिति।नचै
वंग्रस्तास्तसमयेप्युदयात्प्रागेवशास्त्रीयमोक्षज्ञानसंभवा
द्भोजनप्रसंगः।तयोः।परेद्युरुदयेभ्यवहरेदहोरात्रंनभोक्तव्य
मितिवचनद्वयेनतद्बाधात्।बालवृद्धातुरविषयेविशेषः
स्मर्यतेमात्स्ये।अपराह्णेनमध्याह्नेमध्याह्नेनतुसंगवे।भु ॥८४॥
ह्ने

२ समर्थस्यतुप्रायश्चित्तमाहकात्यायनः।चंद्रसूर्यग्रहेभुक्त्वाप्राजा
पत्येनशुध्यति।तस्मिन्नेवदिनेभुक्त्वा त्रौ।धा।२
ञ्जीतसंगवेचेत्स्यान्नपूर्वंभुजिमाचरेदिति।यद्यपराह्णेग्रह
णंतदामध्याह्नेनभुंजीत।किंतुततःप्रागेवेत्यर्थः।त्रिरात्रेणै
वशुध्यति।ग्रहणदिनेकाम्योपवासमाहदक्षः।अयनेविषु
वेचैवचंद्रसूर्यग्रहेतथा।अहोरात्रोषितःस्नात्वासर्वपापैः
प्रमुच्यतइति।पुत्रीतुनोपवसेत्तदाहनारदः।संक्रांत्यामुप
वासंचकृष्णैकादशिवासरे।चंद्रसूर्यग्रहेचैवनकुर्यात्पुत्र
वान्गृहीति।अयंनिषेधोदक्षोक्तकाम्योपवासस्यैव।तेन
ग्रस्तास्तसमयेपुत्रिणोप्युपवासंकुर्युरितिमाधवादयः।
हेमाद्रिकारस्तुअविरोधादुभयविधिं[illegible]रोग्रहसंगीकृ यकोत्ति
त्सेपुत्रिणांग्रस्तास्तसमयेपिभोजनमंगीचक्रुः।षट्त्रिंशन्म

ते।सूर्यग्रहोयदारात्रौदिवाचंद्रग्रहस्तथा।तत्रस्नानंनकु
र्वीतदद्याद्दानंनचक्वचिदिति।इदमेवज्ञापकं।उपरागदर्श
नमात्रंस्नानादिप्रयोजनंनतुचाक्षुषत्वापेक्षेति।तेनमेघा
वरणेपिस्नानंभवत्येवेतिदिक्।।।।इतिपंचमभागह
सम्।। ।।दक्षः।इतिहासपुराणाद्यैःषष्ठसप्तमकौनयेत्।
अष्टमेलोकयात्रातुबहिःसंध्याततःपुनरिति।सायंसं
ध्याहोमौचप्रागेवनिरूपितौ।विष्णुपुराणेवैश्वदेवेकश्चि
द्विशेषउक्तः।पुनःपाकमुपादायसायमप्यवनी
पते।वैश्वदेवनिमित्तंतुपत्न्यासार्द्धंबलिंहरेत्।अतिथिंचा
गतंतत्रस्वशक्त्यापूजयेद्बुधः।कृतपादादिशौचश्चभुक्त्वा
सायंततोगृही।गच्छेच्छय्यामस्फुटितांततोदारुमयींनृपेति ।।८८।।

दक्षः।प्रदोषपश्चिमौयामौवेदाभ्यासेनवैनयेत्।प्रहरद्वयंश
यीतुब्रह्मभूयायकल्पतइति।अत्रवेदग्रहणमंगोपांगयोरु
पलक्षणम्।तदाहुर्मूलकाराः।वेदवेदांतवेदांगमीमांसान्या
यदर्शनं।इतिहासपुराणानिधर्मशास्त्राणिचाभ्यसेत्इ
ति।अत्रदर्शनांतःपुराणांतश्चसमाहारद्वंद्वः।वेदानामंता
उपनिषद्भागाः।पृथक्तूपादानंप्राधान्यख्यापनार्थंब्राह्म
णाआयातावसिष्ठोप्यायातइतिवत्।गार्ग्यः।स्वगृहेप्राक्
शिराःशेतेश्वाशुर्येदक्षिणाशिराः।प्रत्यक्शिराःप्रवासेतुन
कदाचिदुदक्शिराः।स्कांदे।रात्रिसूक्तंजपेत्स्मृत्वासर्वांश्च
सुखशायिनः।नमस्कृत्वाव्ययंविष्णुंसमाधिस्थःस्वपेन्निशि
इति।गोभिलः।अगस्तिर्माधवश्चैवमुचुकुंदोमहामुनिः।

पु
४ हे

कपिलोमुनिरास्ती कः पंचैते सुखशायिनइति। विष्णुः ना
ईवासाः स्वपेन्नपलाशस्थायनेनपंचदारूलतेनगजभग्नत
तेनविद्युद्दग्धेनाग्नि[illegible]ष्टेनबालमध्येनवाहिमध्येन[illegible]
[illegible]नधान्येनगोगेनकृताश्चासुराणामुपरिनोछिष्टेनदिये न
ति। उशनाः नतैलाभ्यक्तशिरः स्वपेन्नादीक्षितः कदाच
र्मणिइति। एवंनिरूपितस्यान्निकस्याकरणेतुप्रत्यवायः।
तदुक्तंकूर्मपुराणे। इत्येतदखिलंप्रोक्तमहन्यहनिवैमया।
ब्राह्मणानांकृत्यजातमपवर्गफलप्रदं। नास्तिक्यादथवा
लस्याद्ब्राह्मणोनकरोतियः। संपातिनरकान्घोरान्का ।।८६।।
कयोनौप्रजायते। नान्योविमुक्तयेपथामुक्त्वाश्रमविधि

आ।

त्याज्ययच्छति।। तदहंभक्त्युपहृतमश्नामिप्रयतात्मनाभिति
गीतायां।। वसिष्ठः।। उपादेयानिशाकानिभक्ष्याणिचफल
निच।। सुपक्वानिसुहृद्यानिपवित्राणिनिवेदयेत्।। कदली
कालवल्लीचपयेलीबृहतीद्वयं।। कुष्मांडंकुटजंचैवचउर्वारुद्व
यमेवच।। पनसंनारिकेलंचधात्रीचबदरीफलं।। कपित्थंस्तुं
इयंताकमाक्रमाम्रातकंतथा।। अपवित्राणिसर्वाणि।। कोद्रवा
णिकुलित्थानिनिष्पावंचमसूरिकं।। दुष्टानियानिकश्यानिमू
लकंतिलपिष्टकं।। एतच्चवर्जयेन्नित्यंसंहरेन्नैवेद्यवेदने।। पंचरा
त्रेपाकसंस्थान्हविर्भांडान्वारिभिःक्षालितान्बहिः।। तन्मस्म
भिश्चतुर्दिक्षुसूत्रेणाकारपुंड्रकान्।। देवस्यदक्षिणेपार्श्वेनी

वाफलकभूमिषु॥सुवर्णादिषुपात्रेषुपरिविष्यार्पयेद्धरेः॥
नपिबेच्छंखतोयंचनचभूमौविनिक्षिपेत्॥नसंप्रोक्षितेनैवे
द्यंभुक्त्वाचैवाधवाभवेत्॥तस्मात्कुंभोद्धृतेनैवनैवेद्यंप्रोक्ष
येद्बुधः॥ततःप्राणाद्याकुतयोदातव्याःपरमात्मनि॥मूलमं
त्रंजपेदत्रततोनारायणात्मकं॥अष्टोत्तरशतंचैवअष्टाविंश
तिमेववा॥स्नानेचस्वेच्छनैवेद्येदर्घाद्याचमनीयकं॥धूपेदी
पेचपाद्येचतांबूलेदंतधावने॥घंटानादंविनाधूपंनविद्वा
न्दातुमर्हति॥दीपोपचारंनैवेद्यंघंटास्वनसमन्वितं॥चतु
रष्टांगुलोत्सेधंदीपंवर्तिसमन्वितं॥उद्धृत्यादायहस्ताभ्या ॥२१॥
मापादतलमस्तकं॥त्रिःपरिभ्राम्यदेवेशंवहिरेनंततःक्षि

पेत्॥नीराजनेनमहताविष्णोर्मुखंसूर्यसमप्रभं॥येपश्यंतिमह
भाग्यास्तेषांपुण्यमनंतकं॥कोटयोब्रह्महत्यानामगम्यागम
कादयः दहसालोकमात्रेणविष्णोरारात्रिकंसदेति॥तत्रै
व॥आवाहनेचासनंचसान्निध्यंसन्निरोधनं॥अर्घ्यंचाचम
नंचैवगंधपुष्पविभूषणं॥दद्यादेवोपचारांस्तुसर्वेभ्यश्च
पृथकपृथक्॥सदावरणसंस्थेभ्यःस्वाहांतैःस्वस्वनाम
कैः॥धूपदीपादिकंतेषांतत्सर्वंविष्णुनासहेति॥अथवि
ष्णुराक्रयः यिमलोक[illegible]ज्ञानात्क्रियायोगात्तथैवच
॥बकीसयातथे[illegible]नाऽमुष्य[illegible]विष्णुराक्रयः॥अथवि
वस्य॥नामान्येष्टाततो[illegible]कलविकर्लिका॥विक

रिण्याद्क्रमशोक्ता [illegible] विकर्णिका॥ मनोन्मनी
तिसंप्रोक्ताशैवपीठस्यनवशक्तयः॥ अथगणेशस्य॥ ती
व्राख्याज्वलिनीनंदाभोगदाकामरूपिणी॥ उग्रतेजोवती
सत्यानवमीविघ्ननाशिनी॥ अथसूर्यस्य॥ दीप्तासूक्ष्मा
जयाभद्राविभूतिर्विमलातथा॥ अमोघाविद्युतीचेतिम
ध्यश्रीःसर्वतोमुखी॥ अथदुर्गायाः॥ विभूतिरुन्नतिःका
न्तिःसृष्टिःकीर्त्तिश्चसंततिः॥ व्युष्टिरुत्कृष्टिऋद्धिश्चदुर्गा
शक्त्यउदाहृताः॥ तथाद्वादश्यांहरेःस्नानोपचारेणकार्य
इत्युक्तंनृसिंहपरिचर्यायांजन्मप्रभृतियत्किंचित्सुकृतं
तुपुरार्जितं॥ नश्यतिद्वादशीदिनेहरेर्निर्माल्यलंघनात् ग०९२॥

अ०आ०

इतिपाद्मोक्तेः॥ नचैतन्निर्माल्यलंघनविषयं तस्यसर्वदेव
संबंधिनःसर्वदानिषिद्धत्वेनहरिद्वादशीपदयोर्वैयर्थ्या
पत्तेः॥ स्नानंयोहरयेदद्याद्द्वादश्यांवैष्णवोदिवा॥ पक्षपूजा
फलंसर्वंबाष्कलेयायगच्छतीतिपंचरात्रेस्पष्टमभिधाना
त्॥ दिवानिषेधाद्रात्रावभिषेकोद्वादश्यामितिगम्यते॥ द
मनकपवित्रारोपणद्वादश्योस्तुरात्रावपिनाभिषेकः॥ दम
न[illegible]द्वादशीचैवपवित्रारोपणीतथा॥ नस्नानंहरयेदद्याद्रा
त्रावपिकदाचनेतिस्मृतेः॥ कार्तिकद्वादश्यांप्रातःस्वाप
नमुक्तंनिर्णयामृते॥ प्रातरुत्थायमतिमान्विष्णोःस्नानंप्र
कल्पयेत्॥ दध्नाक्षीरेणमधुनातथागंधोदकेनचेति॥ ने

वेद्यपात्रमुक्तंस्कांदे॥ हैरण्यंरजतंताम्रंकांस्यंपालाशपत्र
कं॥ नैवेद्यायानुपत्रंवापात्रंविष्णोरतिप्रियं॥ भक्ष्यंभोज्यंच
लेह्यंचचोष्यंपेयंगुणान्वितं॥ दद्याच्छ्रीहरयेनित्यंयद्यत्प्रि
यमथात्मनः॥ प्रक्षिप्यतुलसीप्रोक्ष्यसम्यक्त्वोभिमंत्रयेत्
नैवेद्यंरांरवतोयेनप्रोक्षेत्तनकदाचनयानिपंचामृतीहस्य
परेण्णायानिवेदयेत्॥ ततोजपनिकार्य्या॥ मुहूर्तमनवेक्ष
माणआसीनोजपतीतिनित्यपूजाप्रकरणेबोधायनोक्तेः
गंडूषार्घ्यजलंदत्वादद्यादाचमनंततः॥ हस्तवासंसकर्पू
रंमुकुटंभूषणानिच॥ कर्पूरैलादिसंयुक्तंतांबूलंचनिवे
दयेत्॥ प्रदर्शयेद्यथादर्शंकल्पयेच्छत्रचामरे॥ महानीराज ॥९३॥

अ०आ

नंचैवपुष्पांजलिमथाक्षिपेत्॥ प्रदक्षिणनमस्कारान्कुर्या
द्वैभक्तिपूर्वकं॥ पदासदांतरंगच्छेत्करौचलनवर्जितौ॥ वाचा
स्तोत्रंमनोध्यानंचतुरंगंप्रदक्षिणं॥ उरसाशिरसादृष्ट्याम
नसावचसातथा॥ पद्भ्यांकराभ्यांजानुभ्यांप्रणामोष्टांगई
रितः॥ यत्तुरक्तंस्पृष्ट्वाउदरंस्पृत्वालिंगंस्पृष्ट्वातथैवच॥ स्त्री
णांवक्षस्थलंस्पृष्ट्वासाभूमिर्नश्यतिध्रुवमितितत्तुनमस्का
रव्यतिरिक्तविषयं नमस्कारेउरसेतिविधानात्॥ एकांचंड्या
रवौसप्ततिस्रोदद्याद्विनायके॥ चतस्रःकेशवेदद्याच्छिवेत्वा
र्द्धंप्रदक्षिणं॥ अर्द्धंप्रदक्षिणमपिदेवालये॥ नगृहे॥ तत्रवृष
चंडाद्यभावात्॥ ततोदेवंस्तुवीत॥ जितंतेपुंडरीकाक्षनमस्ते

विश्वभावन॥ नमस्तेस्तु हृषीकेश महापुरुषपूर्वज॥ नमो
हिरण्यगर्भाय प्रधानाव्यक्तरूपिणे॥ ॐ नमो भगवते वासु
देवाय शुद्धज्ञानस्वभाविने॥ देवानां दानवानां च सामान्यम
धिदैवतं॥ सर्वदा चरणद्वंद्वं व्रजामि शरणं तव॥ सादिकं विधा
नोक्तं स्तोत्रं॥ तत्तु प्रथमस्तबके पुरुषसूक्तविधाने द्रष्टव्यं
॥ एवं भगवंतं प्रपूज्य ब्रह्मादीन्पूजयेत्॥ मुखे पुष्पांजलिं द
त्वा गणेशाद्यर्चनं भवेत्॥ गणेशाएव मुख्यश्चेत्तत्र सूर्यक्र
मा भवेत्॥ इत्याचारदीपोक्तेः॥ तत्र मंत्रः॥ एमा ब्रह्मादयो दे
वाः सनकाद्याः श्रुभादयः॥ श्रीनृसिंहप्रसादोयं सर्वे गृह्णंतु ॥२४॥
वैष्णवा इति॥ रुद्रस्य तु॥ बाणरावणचंडीशनंदीभृंगीकिरी

अ०आ०

टयः॥ सदाशिवप्रसादोयं सर्वे गृह्णंतु शांभवा इति॥ गणेश
स्य तु॥ वक्रतुंडाय दद्यात्॥ सूर्यस्य तु चंडांशवे॥ शक्तयास्तु॥ उ
च्छिष्टचांडाल्यै दद्यात्॥ अथ पूजापराधाः स्कांदे॥ नांगुष्ठेर्मर्द
येद्देवं नाधः पुष्पैः समर्चयेत्॥ कराग्रे निक्षिपेत्तोयं वज्रपा
तसमं भवेत्॥ शालग्रामशिलातोयमपीत्वा यस्तु मस्तके॥ प्र
क्षेपणं प्रकुर्वीत ब्रह्महा स निगद्यते॥ गारुडे॥ पादोदकं पिबे
न्नित्यं नैवेद्यं भक्षयेद्धरेः॥ शेषास्तु मस्तके धार्या इति वेदानु
शासनं॥ पादोदकस्वरूपं॥ उदकं चंदनं चक्रं शंखश्च तुलसी
दलं घंटासूक्तं शिलाताम्रं नवभिश्चरणोदकमिति॥ पावनं
विष्णुनैवेद्यं सुरसिद्धर्षिभिः स्मृतं॥ अन्यदेवस्य नैवेद्यं भुक्त्वा

चांद्रायणंचरेत्॥ स्कांदे॥ विष्णुमूर्द्धि स्थितंपुष्पंशिरसायो
वहेन्नरः॥ अपर्युषितपापःस्याद्यावद्युगचतुष्टयं॥ तीर्थ
ग्रहणप्रकारस्तु॥ वस्त्रंचतुर्गुणीकृत्यप्रसार्यवामकेकरे
दक्षिणेनकरेणाथशंखोदकमथाहरेत्॥ प्रक्षिप्यमस्तके
चिह्नान्तीर्थंग्राह्यंत्रिवत्ततः॥ देवदेवजगन्नाथशंखच
क्रगदाधर॥ देहिदेवममानुज्ञांतवतीर्थनिषेवणे॥ लब्ध्वा
नुज्ञांततस्तीर्थंपठेन्मंत्रमिमंततः॥ शालग्रामशिलावारि
पापहारिनिषेव्यतां॥ अकालमृत्युहरणंसर्वव्याधिविना
शनं॥ सर्वदुरितोपशमनंविष्णुपादोदकंशुभं॥ विष्णोः ॥९५॥
पादोदकंपीत्वाकोटिजन्माघनाशनं॥ तदेवाष्टगुणंपाप

२०१.

अ०आ

भूमौबिंदुनिपातनात्॥ स्नानेचाचमनेचैवभोजनादौ
तथैवच॥ तथैवभोजनस्यांते शालग्रामजलंपिबेदिति॥ आ
दित्यपुराणेतु॥ अग्राह्यंशिवनिर्माल्यंपत्रंपुष्पंफलंजलं॥
शालग्रामस्यसंपर्कात्सर्वंयातिपवित्रतामिति विशेषोक्तेः
निषेधस्तुकेवलपरोवगंतव्यः॥ शिवैकभक्तस्यतुग्राह्यम
पिभवति निर्माल्यंधारयेभक्त्याशिरसापार्वतीपतेः॥ राज
सूयस्ययज्ञस्यफलंप्राप्नोतिनिश्चितमिति॥ अत्रभक्तेति
वदतालोभादिनानग्राह्यमितिसूचितं॥ यद्वानिषेधस्तुम
हास्थानपरः॥ कूपेसर्वंविनिक्षिपेदितिपाद्मोक्तेः॥ अन्य
त्रापि॥ बाणलिंगेस्वयंभूतेचंद्रकांतेहृदिस्थिते॥ सौवर्णम

२७

रकत्ते चैवनृशंभोनैवेद्यभक्षणमिति॥ अथवराहोक्ताः पूजा
पराधाः॥ द्वात्रिंशत्तेमुख्यास्ते वाराहे विष्णुनोदिताः॥ तिर्य
क्पुंड्रधरोभूत्वायः कुर्याद्देवतार्चनं॥ याचितैः पत्रपुष्पा
द्यैर्यः करोतिममार्चनं॥ अप्रक्षालितपादोयः प्रविशेन्मम
मंदिरं॥ ममदृष्टेरभिमुखंतांबूलंचर्वयेच्चयः॥ कौसुंभरा
कंमर्त्योयोभक्षयेन्ममसेवकः॥ उरूबुकपत्लाशस्थैः पुष्पैः
कुर्यान्ममार्चनं॥ ममार्चामासुरे कालेयः करोतिविमूढ
धीः॥ अवेष्ठवस्त्रपक्वान्नंयोमह्यंविनिवेदयेत्॥ अवेष्ठ
वेष्ठुपरस्त्सुमहत्पूजांविदधातियः॥ दिनांतरितपक्वान्नंयो ॥१६॥
मह्यंविनिवेदयेत्॥ नीलीरंजितवस्त्रंयन्मह्यंहिमेनिवेदये

अ०आ०

त् नवमक्षालितंवस्त्रंजीर्णंयन्मेनिवेदयेत्॥ अमोनीघर्मक्लि
ष्टांगोमत्पूजांविदधातियः॥ नखोदकेनस्नपनंकुरुतेममभान
वः॥ हत्वावातमनाचम्यतथाप्रावृतकंबलः॥ पीठासनोपवि
ष्टस्तुपूजयेद्यानिरासनः॥ अन्नमयधूपदहनंदीपंचकुरुतेर्च
नेमत्पूजकोनकुरुतेतांतुपूजांवदामिते॥ मत्पूजकः शिव
द्वेषीमद्भक्तश्चशिवद्विषः॥ भूताष्टम्योर्नकुरुतेनक्तंचह
रिवासरं॥ परस्यपरिधानंयः परिधायार्चयेच्चमां॥ अपू
जयित्वाविघ्नेशंसंभाव्यचक्रपालिनं॥ श्राद्धोयत्कर्मकुरुते
त्रिकालमर्चनंविघ्नहर्तृः॥ अंधकारेस्पृशेन्मांचसंभाष्य
चरजस्वलां॥ वामहस्तेनचमांहस्तास्नापयेद्यदिमूढधीः॥

महापराधान्जानीहि द्वात्रिंशन्नाक्षमामितान्॥ अन्येपि अ
गलग्नंच जीर्णं चवस्त्रं देवे न चार्पयेत्॥ मृन्मये भिन्नपात्रे
वा पाषाणे लोहकाष्टजे॥ पल्लवे करभूम्योस्तु न नैवेद्यं स
मर्पयेत्॥ यानैर्वा पादुकैर्वापि गमनं भगवद्गृहे॥ देवोत्स
वाद्यसेवाश्च अप्रणामस्तदग्रतः॥ उच्छिष्टे चैव चाशौ
चे भगवद्वंदनादिकं॥ शक्तौ गौणोपचारस्तु अनिवेदितभ
क्षणं॥ तत्तत्कालोद्भवानां च फलादीनामनर्पणमित्यग
स्त्योक्तापराधाः॥ अथ गृहिकर्तृकपूजायां पूज्यदेवतानि
यमो भविष्यपुराणे॥ गृहे लिंगद्वयं नार्च्यं गणेशत्रितयं त ॥९७॥
था॥ शक्तित्रयं तथा शंखमत्स्यादिद्विकं तथा॥ नार्चये

अ०अ।

च्च तथा मत्स्यकूर्मादिदशकं तथा॥ द्वे चक्रे द्वारकायास्तु नार्च्ये
सूर्यद्वयं तथा॥ शालग्रामाः समाः पूज्या विषमा न कदाचन॥ वि
षमेष्वत्रयं शस्तं समेषु द्वितयं न हि॥ एतेषां पूजनान्नित्यमुद्वे
गं प्राप्नुयाद्गृही॥ तथा॥ रक्तास्तीक्ष्णाश्च कान्तिस्थूलाः शालग्रा
मशिलाः न पूज्या इति पुराणे॥ अत्र गृहीत्युपादानाद्ब्रह्म
चारीयत्यादेर्न दोष इति ध्वन्यते॥ शालग्रामस्य लक्षणमुक्तं स्कां
दे॥ शालग्रामशिलायास्तु प्रतिष्ठा नैव विद्यते महापूजां तु
कृत्वादौ पूजयेत्तां ततो बुधः॥ खंडितं स्फुटितं भग्नं पार्श्व
तश्च विभेदितं॥ शालग्रामसमुद्भूतं शैलं दोषावहं नहि
चक्रं या केवलं तत्र पद्मेन सह संयुतं॥ केवलं वनमाला वा

हरिर्लक्ष्म्यासहास्थितः ॥ अत्राचिह्नोवाभावोयस्यादिपरः ॥ द्वा
रदेशेसमेचक्रेद्वेज्ञेयेतेनांत्तरीयके ॥ वासुदेवः सविज्ञेयोशु
क्लाभश्चातिशोभनः ॥ द्वौचक्रौवैकलग्नौतुपूर्वभागश्चपु
ष्कलः ॥ संकर्षणः सविज्ञेयोरक्ताभश्चस्वतेजसा ॥ प्रद्युम्नः
सूक्ष्मवक्रस्तुपीतदीप्तिस्तथैवच ॥ सुषीरंछिद्रबहुलदीर्घा
कारंतुतद्भवेत् ॥ अनिरुद्धंतुनीलाभंवर्तुलंचातिशोभनं
रेखात्रयंतुयद्द्वारेपृष्ठेपद्मेनलांछितं ॥ नानावर्णमनंतं
स्यान्नागभोगेनचिह्नितं ॥ अनेकमूर्तिसंयुक्तंसर्वकाम
फलप्रदं ॥ चिह्नितंसुदिक्षुसर्वासुयस्योर्ध्वंदृश्यतेमुखं ॥ ग०१८।
सदेवदेवोविज्ञेयः ॥ पुराणपुरुषोत्तमः ॥ अर्धचंद्राहृति

अ०आ०

र्देवोहृषीकेशउदाहृतः ॥ तमर्च्चयलभंतेस्वर्गंविषयांश्चस
मीहितान् ॥ श्रीधरंतुतथादेवंचिह्नितंवनमालया ॥ कदंब
कुसुमाकाररेखापंचकसंयुतं ॥ मत्स्यरूपंतुदेवेशंदीर्घाका
रंतुतद्भवेत् ॥ बिंदुद्वयसमायुक्तंकांस्यवर्णंसुशोभनं ॥ वाम
पार्श्वेस्थितेचक्रेशुभवर्णेचबिंदुके ॥ लक्ष्मीनृसिंहोविख्या
तोभुक्तिमुक्तिफलप्रदः ॥ कपिलोनारसिंहोथपृथुचक्रे
सुशोभने ॥ ब्रह्मचार्यधिकारीस्यान्नान्यस्तस्यप्रपूजयेत्
नरसिंहस्त्रिबिंदुःस्यात्कपिलःपंचबिंदुकः ॥ ब्रह्मचर्येण
पूज्यःस्याद्अन्यथासर्वविघ्नदः ॥ स्थूलंचक्रद्वयमध्येकुंडली
द्वौसवर्णकः ॥ द्वारोपरितथारेखापूजकस्यसुशोभना सु

ष्टितं विषमं चक्रं नारसिंहं तु कापिलं ॥ संपूज्य मुक्तिमाप्नो
ति संग्रामे विजयी भवेत् ॥ त्रिविक्रमं तथा देवं श्यामव
र्णं महाद्युतिं ॥ वामपार्श्वे तथा चक्रे रेखा चैव तु दक्षिणे ॥
प्रदक्षिणावर्तहिता वनमालाविभूषिता ॥ सा शिला हृ
ष्ठसंज्ञा स्याद्धनधान्यसुखप्रदा ॥ स्थूलो दामोदरो ज्ञेयः
सूक्ष्मं चक्रो भवेत्तु यः ॥ चक्रे च मध्यदेशस्थे पूजितः सुख
दायकः ॥ चतस्रो यत्र दृश्यंते रेखाः पार्श्वे समीपगाः ॥ द्वे
चक्रे मध्यदेशे तु सा शिला तु चतुर्मुखी ॥ तत्राप्यामलकी
तुल्या सूक्ष्मा चातीव या भवेत् ॥ तस्यामेव सदा ब्रह्मन् ॥११॥
श्रिया सह वसाम्यहं ॥ यथा यथा शिला सूक्ष्मा तथैव च मह

अ०आ

हत्फलं ॥ तस्मात्तां पूजयेन्नित्यं धर्मकामार्थसिद्धये स्सादि ॥ द्वा
रकायां चक्रतीर्थे च क्रांकं नेत्रमुत्तमं ॥ समुत्पन्नं मुने साक्षाद्ध
ह्मदृष्ट्यावलोकितं ॥ तस्माच्च क्रांकमिथुनं पूज्यं भक्त्या द्विजैः
सदा ॥ भिन्नं चेदर्थनाशाय स्थूलं बुद्धिविनाशकृत् ॥ शुक्लव
र्णं शुभं चक्रं यत्त चक्रं तथैव च ॥ इति स्कांदे ॥ प्रतिमामूर्तिलक्षण
मपि कारीखंडादौ ज्ञेयं ॥ ग्रंथगौरवभियानोल्लेखि ॥ तथा ॥ पू
ज्यपूजकयोर्मध्ये पूर्वं भित्यभिधीयते ॥ नैरृणं न पूजनकाले संपू
ज्यापेक्षं तु तद्भवेत् ॥ देवस्य मुखमारभ्य दिशां प्राचीं प्रकल्प
येत् ॥ तद्वादिपरिवाराणां संगाधावरणक्रमात् ॥ इदमाग
मोक्तपूजाविषयं ॥ यस्मिन्दिनस्वान्विष्णुवस्कंदे ति धाबीति

उदकुंभ ३ पत्रिर ॥

तांवेदविदोवदंति॥मध्यंपुनःपूजकपूजयोश्चसदागमज्ञाः
प्रवदंतिपूर्वमितिसंग्रहोक्तेः॥तथा॥अकुर्वन्देवतापूजां
भुंजीयाद्योनरोयदि ग्राससंख्यान्लोहपिंडान्श्नातिय
ममंदिरे॥नविष्ण्वाराधनादन्यद्विद्यतेकर्मवैदिकं॥तस्माद
नादिमध्यांतंनित्यमाराधयेद्धरिमितिकूर्मपुराणोक्तमित्य
लमितिमंगलं॥॥इतिश्रीमन्नागदेवविरचितेविधानपा
रिजातेदेवार्चनविधानं॥अथपंचमहायज्ञाः॥तत्रयमः
पंचसूनागृहस्थस्यवर्त्तंतेहरहःसदा॥कंडनीपेषणीचुल्ली
उदकुंभश्चमार्जनीयः॥एतानिवाहयन्विप्रोबाध्यतेवा ॥९०॥
मुहुर्मुहुः॥एतेषांपावनार्थायपंचयज्ञाःप्रकीर्तिताः॥

अ०आ०

हिंसास्थानंसूना॥उपस्करोमार्जन्यादिः॥कात्यायनोपि॥देव
भूतपितृब्रह्ममनुष्याणामनुक्रमात्॥महासत्राणिजानी
यात्तएवहिमहामखाः॥एतेचपंचयज्ञविधानंतुगृहीनित्यं
नहापयेदितिशंखवचनान्नित्याएव॥ननुफलश्रवणात्का
म्याः॥नवाकंडन्यादिनिमित्तश्रवणान्नैमित्तिकाइति॥तदु
क्तंमिताक्षरायां॥यदेषांफलश्रवणंतत्पावनत्वख्यापना
र्थंनकाम्यत्वप्रतिपादनायेत्येवंनित्यत्वेपि॥सायंप्रातर्वैश्व
देवःकर्त्तव्योबलिकर्मच॥अनश्नतापिसततमन्यथाकि
ल्बिषीभवेदितिकात्यायनवचनाद्वैश्वदेवाख्यंकर्मपुरुषा
र्थमेवनत्वन्नसंस्कारकं॥अतएवप्रवसतोप्यावश्यकमि

स्यारूपरिशिष्टकारः॥ प्रवसेदाहिताग्निश्चेत्कदाचित्कालप
र्ययात्॥ यस्मिन्नग्नौ भवेत्पाको वैश्वदेवस्तु तत्र वै॥ मनुरप्ये
वमेवाह॥ वैश्वदेवे तु निर्वृत्ते यद्यन्योतिथिराव्रजेत्॥ तस्मा
दन्नं यथाशक्ति प्रदद्यान्न बलिं हरेत्॥ यद्यन्नसंस्कारः स्या
त्तर्हि बलिं नाम वैश्वदेवं न कुर्यादिति न वदेन्मनुरिति तद्दी
पिकापि॥ केचित्तु सायंप्रातः सिद्धस्य हविष्यस्य जुहुयादि
त्याश्वलायनादिवचनात्पुरुषार्थत्वमन्नसंस्कारकत्वं चेत्यु
भयात्मकत्वं मन्यंते॥ अत्र सायंशब्देन रात्रिः कथ्यते॥ प्रातः
शब्देन दिनमिति ज्ञेयं॥ धर्मप्रश्नेप्येवमेव॥ यस्याग्नौ न क्रि ॥१०१॥
यते यस्य चाग्रं न दीयते॥ न तद्भोक्तव्यमिति॥ यस्येति कर्म

अ०आ०
णिषष्ठी॥ यदन्नमित्यर्थः॥ अग्रं भिक्षा॥ संग्रहेपि॥ भ्रातॄणामवि
भक्तानां पृथक्पाको भवेद्यदि॥ वैश्वदेवादिकं श्राद्धं कुर्युस्ते
वै पृथक्पृथक्॥ तथा॥ अविभक्तेन पुत्रेण पितृमेधो मखोह
नि॥ स्थानांतरे पृथक्कार्ये दर्शश्राद्धं तथैव चेति॥ तथान्यं च वि
शेषं मदनपारिजाते जमदग्निराह॥ वैश्वदेवं तथा रात्रौ कुर्या
द्बलिहरणं तथा॥ महतः पंचयज्ञांस्तु दिवैवेत्याह धर्मविदिति
अस्यार्थः॥ येषां तु त्रगरविनां ब्रह्मयज्ञव्यतिरिक्तमहायज्ञा
नां वैश्वदेवबलिहरणं चांतर्भावस्तेषां वाजसनेयादीना
दिवैव वैश्वदेवाख्यं कर्म न रात्रौ॥ येषां तु स्वसूत्रे स्वायां का
लद्वयेपि तद्विधानमस्ति नास्ति वा तेषामाश्वलायनादी

नांकालद्वयेपिभवतीतिनिर्णयइतितत्रैवव्याख्यातं॥हवि
ष्येषुयवामुख्यास्तदनुव्रीहयःस्मृताः॥इत्यादिहविज्ञेयं॥पं
चयज्ञलक्षणमाहमनुः॥अध्यापनंब्रह्मयज्ञःपितृयज्ञस्तु
तर्पणं॥होमोदैवोबलिर्भौतोनृयज्ञोऽतिथिपूजनं॥अध्या
पनमध्ययनं॥तर्पणंनित्यश्राद्धं॥अत्रविकल्पमाहकात्या
यनः॥श्राद्धंवापितृयज्ञःस्यात्पित्र्योबलिरथापिवेति॥
पितृभ्यःस्वधानमइतियोबलिःसपितृबलिः॥मनुः
दद्यादहरहःश्राद्धमन्नाद्येनोदकेनवा॥पयोमूलफलै
द्वि र्वापिपितृभ्यःप्रीतिमावहन्॥पितॄनुद्दिश्यविप्रांस्तुभो ॥१०२॥
जयेद्विप्रमेवचेति॥शक्तितोत्रव्यवस्थेयं॥अत्रविशेष

अ॰श्रा

माहव्यासः॥आवाहनंस्वधाकारःपिंडाग्नौकरणंतथा॥
ब्रह्मचर्यादिनियमोविश्वेदेवास्तथैवच॥नित्यश्राद्धेत्यजे
देतान्भोज्यमन्नंप्रकल्पयेत्॥याज्ञवल्क्योपि॥नित्यश्राद्धं
दैवहीनंनियमादिविवर्जितं॥दक्षिणारहितंचैवदातृभो
क्तृव्रतोज्झितं॥अत्रदक्षिणानिषेधोयथोक्तदक्षिणाप
रः॥नतुतत्सामान्यपरः॥दत्वातुदक्षिणांशक्त्यानमस्का
रैर्विसर्जयेदितिनित्यश्राद्धप्रकरणेव्यासोक्तेः॥इदंश्रा
द्धंषट्दैवतं॥तत्तुषट्पुरुषंज्ञेयंदक्षिणापिंडवर्जितमि
तिव्यासोक्तेः॥इदंयत्रामावास्याश्राद्धादौषडपिदेवता
इष्टास्तत्रनभवति॥यत्रसांवत्सरीकादौनेष्टास्तत्रभवति॥

निसश्राद्धंनकुर्वीततत्रसंगाद्यत्रासिध्यतीतिचमत्कारखं
डोक्तेः॥तथाकालविशेषेकाम्यश्राद्धमप्युक्तंहेमाद्रौ॥अय
नद्वितयेश्राद्धंविषुवद्वितयेतथा॥मन्वादौचयुगादौचपिंड
निर्वपणाद्दते॥सर्वसंक्रांतिषुपितथेसादिस्मृतिवचनाद्युगा
दिमन्वादिसंक्रांत्यमापूर्णिमावैधृतिमहालयाष्टकापा
तेषुकाम्यादिश्राद्धान्यप्यनुसंधेयानि॥अथवैश्वदेवधर्माः
व्यासः॥जुहुयात्सर्पिषाभ्यक्तंतैलंक्षारंविवर्जयेत्॥दध्य
क्तंपयसाक्तंवातदभावेंभसापिवा॥स्मृत्यर्थसारे॥अलाभे
येनकेनापिफलशाकोदकादिभिः॥पयोदधिघृतैःकुर्या
द्वैश्वदेवंस्रुवेणतु॥हस्तेनान्नादिभिःकुर्याद्भिरंजलिना ॥१०४॥

उ०आ०

ततः॥कासायनः॥पाण्याकृतिर्द्वादशापर्वपूरिकामध्य
तादिनाचस्रुवमात्रपूरिका॥देवेनतीर्थेनचहूयेतहविःस्वं
गारिणिस्वर्चिषिजितच्चपावके॥उत्तानेनतुहस्तेनअंगुष्ठा
ग्रेणपीडितं॥संहतांगुलिपाणिस्तुवाग्यतोजुहुयाद्धविः
कोद्रवंचणकंमाषंमसूरंचकुलित्थकं॥क्षारंचलवणंसर्वं
वैश्वदेवेविवर्जयेत्॥आपस्तंबीयेपि॥नक्षारलवणहोमो
विद्यतेतथापरान्नसंसृष्टस्येति॥क्षारलवणपरान्नसंसृ
ष्टेनहविषानहोतव्यमितिमदनपारिजातेव्याख्यातं॥क्षा
रलक्षणंपुराणे॥तिलमुद्गादृतेसिंव्यंसस्येगोधूमकोद्रवौ
चीनकंदेवधान्यंचतृणकंचतथैवहि॥स्विन्नधान्यंसर्वरा।

क्रमेषःक्षारगणःस्मृतः॥ आश्वलायनगृह्यपरिशिष्टेत्र
विशेषउक्तः॥ सएषदेवयज्ञोऽहरहर्गोदोहनसंमितः॥ सर्वा
भीष्टप्रदस्तस्मादेतमहरहःकुर्वीततमेनंवैश्वदेवंकुर्त्तरो
ऽण्णपृथगग्निनेनवाकुर्यान्नास्यशेषेणवैश्वदेवंकुर्यादि
ति॥ सएषःपंचायतनपूजारूपइत्यर्थः॥ तत्प्रकरणत्वात्
इदंतुस्मार्त्तविषयं॥ वैष्णवानांतु॥ विष्णोर्निवेदितान्नेन
यष्टव्यंदेवतांतरं॥ पितृभ्यश्च॥ पितृद्भ्यतद्दानंसायकल्प
ते॥ पितृशेषंतुयोदद्याद्धरयेपरमात्मने॥ रेतोदाःपितरस्त
स्यभवंतिक्लेशभागिनइतिपंचरात्रोक्तेर्नैवेद्यशेषेणै
वपंचमहायज्ञाःस्युः॥ शेषनिवेदनेदोषश्रवणात्॥ य ॥१०५॥

ग०श्री

दिपूर्वंब्रह्मयज्ञोनकृतः॥ तर्ह्यत्रमनुष्ययज्ञात्पूर्वंकर्त्तव्यः॥ प
श्चात्श्रुतिजपःप्रोक्तोब्रह्मयज्ञस्तुसस्मृतः॥ सचवाचाकृत
र्पणात्कार्यःपश्चाद्वाप्रातरादुते॥ वैश्वदेवावसानेवानान्य
त्रेतिनिमित्ततइतिकात्यायनोक्तेः॥ सचप्रत्यहंसहदेवस्या
त्॥ नहंतातिनहोमंचस्वाध्यायंपितृतर्पणं॥ नैकःश्राद्ध
द्वयंकुर्यात्समानेहनिकुत्रचिदितिमरीच्युक्तेः हंतति
र्मनुष्ययज्ञः॥ होमोदैवयज्ञः॥ सचयेषांद्विवारंनोक्तस्तेषा
मेवनिषिद्धः॥ तर्पणमपितीर्थविशेषप्राप्तोभवत्येव॥ द
त्ततर्पणकोविप्रस्तीर्थसंतर्पयेत्पितॄनितिस्कांदोक्तेः॥ अ
यंवैश्वदेवःश्राद्धसाग्नेःपूर्वंनिरग्नेःपश्चाद्भवति॥ तदुक्तं

ति

कालनिर्णयदीपिकायां। भिन्नान्नेन तु वैश्वदेविकमनुश्रा
द्धंचरेत्साग्निकः पश्चाभ्दूतमखाद्यऽनग्निकजनस्त्वग्नौ
हुतेवैत्तिरंस्वस्यसूक्तेर्विकरस्यचांतिरूनतत्पाकांत्तरेणाच
रेदिं अनुवैश्वदेवोनंत्तरंश्राद्धंचरेदित्यर्थः। हेमाद्रावपि। प
क्षांतंकर्म निर्वर्त्य वैश्वदेवंचसाग्निकः। पिंडयज्ञंततःकु
र्यात्ततोन्वाहार्यकंबुधइति। तथा। वैश्वदेवाहुतीरग्नाव
र्वाग्ब्राह्मणभोजनात्। पितृन्संतर्प्यविधिवद्बलिंदद्या
द्विधानतइति। अग्नौकरणहुतेब्राह्मणभोजनात्पूर्वंवैश्व
देवः कार्यइत्यर्थः। यद्वा। वैश्वदेवंतथाकुर्यात्पश्चाद्ब्राह्मण ॥१०६॥
वाचनमिति। अनेनविकरानंतरंस्वस्तिवाचनात्पूर्वंकृतं

अ०आ०

व्यइतिभावः। पित्रर्थंनिर्वपेत्पाकंवैश्वदेवार्थमेवच। वैश्व
देवंनपित्र्यर्थंनदद्यांवैश्वदेविकमितिपृथक्पाकोक्तिः। वा
जसनेयिनामुभयार्थमेकएवपाकः। उच्छेषसधृतान्नमन्नं
पद्धस्यश्नोकेरिष्यइतिसूत्रव्याख्यानेकर्काचार्येणतथाव्या
ख्यातत्वात्। सांग्नेरपिकश्चिदंत्तेभवति। श्राद्धात्प्रागेवकुर्वीत
वैश्वदेवंतुसाग्निकः। एकादशाहिकंमुक्त्वातत्रह्यंतेविधीय
तइतिगालवकायनोक्तेः।। निरग्निविषयेषड्विंशन्मते। प्रा
तिवासरिकोहोमः श्राद्धादौक्रियतेयदि। देवाहव्यंनगृह्णं
तिकव्यानिपितरस्तथेति। पैठिनसिरपि। पितृपाकंस
मुद्धृत्यवैश्वदेवंकरोतियः।। आसुरंतद्भवेच्छ्राद्धंपितृणां।

नोपपत्तिस्त्वति॥ श्राद्धशेषेणतद्दितिसएवाह॥ श्राद्धंनिर्वर्त्यवि
धिवद्वैश्वदेवादिकंततः॥ कुर्याद्भिक्षांततोदद्याद्धंतकारादि
कंततइति॥ यतोन्नाच्छ्राद्धंततइतिनिबंधकारैर्व्याख्यातं॥ त
स्याप्येकादशाहे श्राद्धेऽतेभिन्नपाकेनवैश्वदेवोभवति॥ एको
द्दिष्टेषुशेषंतुब्राह्मणेभ्यःसमुत्सृजेदितिदेवलेनतदन्नस्यो
त्सर्गविधानात्॥ संप्राप्तेपार्वणेश्राद्धेएकोद्दिष्टेतथैवच॥ अ
ग्रतोवैश्वदेवःस्यात्पश्चादेकादशाहनीतिवैश्वदेवविधाना
च्चेतिसर्वमनवद्यं॥ वैष्णवानामत्रविशेषःपंचरात्रोक्तः॥ सा
ग्नेस्तद्विहितस्यापिवैष्णवस्याविशेषतः॥ श्राद्धंनैवेद्यशेषे
णवैश्वदेवादिपूर्वकं॥ आदिशब्दाद्बलिहरणं॥ बृहत्सारात् ॥१०७॥

अ०आ

रपिपंचमाध्याये॥ वैश्वदेवंकराकार्यंश्राद्धेचसमुपस्थिते॥ पा
कशुध्यर्थमेवैतत्पूर्वमेवविधीयते॥ वैश्वदेवोग्रतश्चैवसा
ग्नेर्हिनाग्निकस्यच॥ कर्त्तव्यःपाकशुध्यर्थंभुक्तोच्छिष्टंविवर्ज
यत्॥ कटकाण्वादेरपिविशेषोधर्मानुशासने॥ निर्वर्त्यश्राद्ध
यज्ञंनैवैश्वदेवंविधायच॥ ततोगृहबलिर्देयः कटकाण्वादि
कान्विनेति॥ स्थालीपाकदिनेविशेषमाहदेवलः॥ अहुतेवैश्व
देवेतुस्थालीपाकाः प्रकीर्तिताः॥ अन्यत्रपितृयज्ञात्तुसोऽप
राह्णेविधीयते॥ पितृयज्ञःपिंडपितृयज्ञः॥ स्थालीपाकाइति
बहुवचनंस्थालीपाकसाध्यकर्मोपलक्षणं॥ नित्यश्राद्धेपि
तृयज्ञइत्याश्वलायनादिविषयं॥ वाजसनेयिनांतुपित्र्योब

लिः पितृयज्ञः ॥ अपरपक्षे श्राद्धंकुर्वीतेतिसूत्रंव्याकुर्वताकर्का
चार्येणश्राद्धशब्दस्यराजसूयवत्समुदायनामधेयत्वंपूर्व
पक्षित्वाःसावेतत्त्वइतिमंत्रवर्णादिनापिंडदानेपितृणांदेव
तात्वावगमात्पिंडदानस्यचनामधेयत्वमित्युक्तत्वात् ॥ अंग
प्रधानचिंतायाः प्रयोजनंतुप्रधानाकरणेनांगकरणमिति
तन्मतेब्राह्मणभोजनस्यांगत्वाद्यादौतथादृष्टत्वाच्चेसलक्ष
पंचेन ॥ अथ मनुष्ययज्ञः ॥ अचिंतितमनाहूतंवैश्वदेवेष
वस्थितं ॥ अतिथिंतंविजानीयान्नैकग्रामनिवासिनं ॥ चक्षुर्द
द्यान्मनोदद्याद्वाचंदद्याच्चसूनृतां ॥ अनुव्रजेदुपासीतसय ॥१०८॥
ज्ञःपचदक्षिणइतिदानधर्मे ॥ इत्यादिलक्षणोपेतायानाद

अ० आ०

ष्टगोत्रकुलायब्राह्मणायासनादिनार्चयित्वाग्रंपरिविष्योदङ्मु
खःसनकादीन्ध्यायन्इदमन्नंसनकादिमनुष्येभ्योहंतेत्युक्त्वा
दद्यात् ॥ अन्नदानासामर्थ्येकार्ष्णाजिनिः ॥ भिक्षांवापुष्कलां
दद्याद्धंतकारमथापिवेति ॥ मनुः ॥ ग्रासमात्रंभवेद्भिक्षा अग्रं
ग्रासचतुष्टयं अग्रंचतुर्गुणीकृत्यहंतकारोभिधीयते ॥ ब्राह्म
णाभावेकात्यायनः ॥ अप्युद्धृत्ययथाशक्तिकिंचिदन्नंयथा
विधि ॥ पितृभ्योथमनुष्येभ्योदद्यादहरहर्द्विजे ॥ उद्धृत्यपात्रे
निक्षिप्येत्यर्थः ॥ तदभावेगवादौदद्यात् ॥ यदावैश्वदेवात्प्रा
गतिथिरागच्छतितदाव्यासः ॥ अकृतेवैश्वदेवेतुभिक्षुके
गृहमागते ॥ उद्धृत्यवैश्वदेवार्थंभिक्षांदत्वाविसर्जयेत् ॥ भि

ष्युरपितेनैवप्रदर्शितः॥ब्रह्मचारीयतिश्चैवविद्यार्थिगुरु
पोषकः॥अध्वगःक्षीणवृत्तिश्चषडेतेभिक्षुकाःस्मृताः
एतेपंचमहायज्ञायथाकालेह्यकृतास्सदा॥यमः॥दिवोदि
तानिकर्माणिप्रमादादकृतानिचेत्॥शर्वर्याःप्रथमेया
मेतानिसर्वाणिकारयेत्॥ब्रह्मयज्ञावगाहोच्चसोरंत्वप
रिवर्जयेदिति॥एवंस्वस्वगृह्योक्तप्रकारेणवैश्वदेवःसा
ग्नेर्भवति॥निरग्नेरपिपिष्टोदिविविधानेनस्वगृह्योक्त
एव॥तदुक्तंकात्यायनगृह्यपरिशिष्टे॥अथातोधर्मजिज्ञा
साकेशांतादूर्ध्वमपत्नीकउत्सन्नाग्निरनग्निकःप्रवासी ॥१०९॥
ब्रह्मचारीविधुरोवाऽन्वग्निरितिग्रामादग्निमाहृत्यपृष्टो

अ०अ०

दिवीसाधिष्ठाप्यत्रिभिश्चसावित्रैःप्रज्वाल्यताꣳसवितुस्तत्सवि
तुर्विश्वानिदेवसवितरितिपूर्ववद्धस्तैर्हुत्वापाकंपचेत्तत्रस्व
गृह्योक्तंवैश्वदेवंकुर्यान्नवृथापाकोभवतिनवृथापाकमश्नी
यात्तत्रैवपिंडपितृयज्ञपक्षाद्याग्रयणानिकुर्यात्॥आश्वला
यनोपि॥लिखवाद्योनैवचतत्सतांसविश्वानिनोघानइमेनचमं
त्राः॥नारम्भणंवाप्यवरोपणंवाव्युसात्तिरेवंविधुरानलस्येति
अथयद्यालस्यादिनापिष्टोदिविविधानंनकरोतितदान्न
कल्लवैश्वदेवःकार्यः॥तदुक्तंव्याससमृतौ॥अनग्निकस्तुयो
विप्रआदायान्नंघृतप्लुतं॥शाकलोक्तविधानेनजुहुयाल्लौ
किकेनले॥व्यस्ताभिर्व्याहृतिभिस्तुसमस्ताभिस्ततःषड्

द्वैवहुतस्येती स्यादिमंत्रैर्यथाक्रमं ॥ प्राजापसंस्विष्टहुतं हुत्वे
वंधादरगकुतीः देवहुतस्येतिषण्मंत्रास्तु ॥ ॐ देवहुतस्येन
सोवयजनमसिस्वाहा ० १ ॥ मनुष्यहुतस्ये ० ॥ स्वाहा ० २ ॥ पि
तृहुत ० स्वाहा ० ३ ॥ आत्महुत ० ४ ॥ अन्यहुत ० ५ ॥ येनसए
नसोवयजनमसिस्वाहा ० ॥ ६ ॥ अग्नयेनममेति सर्वत्र त्या
गः ॥ ॐकारपूर्वस्वाहांतस्त्यागः ॥ तिष्टचिधानतः ॥ भुविद
र्भान्समास्तीर्य बलिकर्मसमारभेत ॥ विश्वेभ्योदेवेभ्य
इति सर्वभूतेभ्य एवच ॥ भूतानापतयेचेति नमस्कारेण
रगास्त्रवित्त ॥ दद्याद्बलित्रयं चाग्रे पितृभ्यश्च स्वधानमः ॥
पात्रनिर्णेजनं वारिवायव्यां दिशि निक्षिपेत् ॥ उद्धृत्यषोड ११०॥

अ०आ०

शग्रासमात्रमन्नं घृतोक्षितं ॥ इदमन्नं मनुष्येभ्यो हंतेत्युक्त्वा
समुत्सृजेत् ॥ गोत्रनामस्वधाकारैः पितृभ्यश्चापि शक्तितः ॥
षड्भ्योन्नमन्वहं दद्यात्सितयज्ञविधानतः ॥ ततोन्यदन्नमादा
यनिर्गत्य भवनाद्बहिः ॥ काकेभ्यः श्वपचेभ्यश्च प्रक्षिपेद्भुसमे
वच ॥ उपविश्य गृहद्वारे तिष्ठे यावन्मुहूर्तकं ॥ अप्रमत्तोऽति
थिं लिप्सुर्भावशुद्धः प्रतीक्षक इति ॥ सच्छूद्रस्यापि वैश्वं तु दैव
क्वोयाज्ञवल्केन ॥ भार्यारतिः ॥ शुचिर्भूस भर्त्रा श्राद्धक्रियाप
र ॥ नमस्कारेण मंत्रेण पंचयज्ञान्न हापयेदिति ॥ न हापये
दनुतिष्ठेत् ॥ नमस्कारेण मंत्रेणेति ॥ देवेभ्यो नमो भूतेभ्यो
नमो पितृभ्यो नमो मनुष्येभ्यो नम इति नमस्कारांतेन मंत्रे

ण॥षद्धा॥देवताभ्यःपितृभ्यश्चमहायोगिभ्यएवच॥नमः
स्वाहायैस्वधायैनित्यमेवनमोनमइतिवायुपुराणोक्तेनवा
शूद्रस्यपंचमहायज्ञाभवंति॥तेचामद्रव्येणकार्याः॥पक्केन
निषिद्धत्वात्॥पाकाभावेप्रवासेचतंडुलानौषधीस्तथा
पयोदधिघृतंवापिकंदमूलफलानिचेतिस्मरणकानुक
ल्पद्रव्येणपंचमहायज्ञान्कृत्वातद्द्रव्यंविप्रकुलेप्रवेशयित
व्यमितिवृणस्मरहस्य॥श्राद्धंतामेनैवतुशूद्रस्येत्यादिनिय
मगदामेनैवश्राद्धंविवाहेतु॥विवाहमात्रसंस्कारंशूद्रोपि
लभतेसदेतिविवाहेतरसंस्कारनिषेधपराद्ब्राह्मणएवच
नाच्छिष्टसमाचाराच्चलौकिकेग्नौब्राह्मणद्वारानाममंत्रे ॥११११॥

अ०आ

र्पूतादिनाहोमोभवतीतिगम्यते॥स्कांदेप्रभासखंडेशूद्रस्यानि
षिद्धमुक्तंनरभोनुद्धरेच्छूद्रोनपिबेत्कापिलंपयः॥मध्यपत्रे
नाभुंजीतब्रह्मवृक्षस्यभामिनि॥नोच्चरेद्वेदमंत्रांश्चपुरोडाशं
नभक्षयेत्॥नशिखानोपवीतंचनोच्चरेत्संस्कृतांगिरं॥नपठे
द्वेदवचनंत्रिषवंनहिसेवयेत्॥नमस्कारेणमंत्रेणक्रियासि
द्धिर्भवेद्ध्रुवं॥निषिद्धाचरणंकुर्वन्पितृभिःसहमज्जतीति
नशिखाम्रियेतदसच्छूद्रविषयं॥सच्छूद्रेतु॥परिचर्याशू
द्रस्यनियतावृत्तिरनियताःकेशवेषाइतिवासिष्ठस्मरणा
त्विकल्पेनशिखाभवतीतिगम्यते॥मनुः॥शूद्राणांमासि
कंकार्यंवपनंन्यायवर्तिनां॥अर्यावच्छौचकल्पश्चद्विजोच्छि

ष्टस्यभोजनं॥ अयेचिन्नृयस्तद्धष्टोवेस्ततकादोकस्यः प्रका
रः॥ शेषंस्पष्टं॥ अन्यच्च॥ दिवार्चपुरतः हत्वाब्राह्मणानांन
पोत्तम॥ श्रोतव्यमेवशूद्रेणतथान्येश्चद्विजातिभिः॥ तथा
स्त्रीभिः शूद्रैश्चश्रोतव्यंहत्वाब्राह्मणमग्रतः॥ पुराणंचेति
हासश्चश्रोतव्यंचदिनेदिने॥ तथा॥ क्षमासत्यंदमः शौचं
दानमिंद्रियसंयमः॥ अहिंसागुरुशुश्रूषातीर्थानुगम
नंदया॥ आर्जवंलोभशून्यत्वंदेवब्राह्मणपूजनं॥ अनभ्य
सूयाचतथाधर्मः सामान्यउच्यतइतिविष्णूक्तः॥ साधार
णधर्माःशूद्रेणाप्यनुष्ठेयाइति॥ अलंबहुप्रपंचेनेतिप्रहृ
तमास्थीयते॥ एवंहत्वेश्वदेवोगोग्रासंदद्यात्॥ तदाह

ऋष्यशृंगः॥ गवांग्रासंचकुर्वीतनित्यमेवसमाहितः॥ गवांकं
डूयनंस्पर्शंग्रासमान्हिकमेवच॥ तत्रमंत्रः सोरभेयः सर्व य्य
हिताःपवित्राःपापनाशनाः॥ प्रतिगृह्णंतुमेग्रासंगावस्त्रै
लोक्यमातरः॥ इतिमंत्रेणसंपूज्यगोग्रासंदद्यात्॥ ततोब
हिः काकबलिः॥ मनुः॥ शुनांचपतितानांचश्वपचांपाप
रोगिणां॥ वायसानांक्रिमीणांचशनकैर्निक्षिपेद्भुवि॥ त
मंत्रस्तु॥ ऐंद्रवारुणवायव्यायाम्यावैनैर्ऋतास्तथा॥ वाय
साःप्रतिगृह्णंतुभूमौपिंडंमयार्पितं॥ वायसेभ्योनमइति
वायसबलिः॥ तथा॥ द्वौश्वानौश्यामशबलौवैवस्वतकु
लोद्भवौ॥ ताभ्यांपिंडंप्रदास्यामिरक्षेतांपथिमांसदा॥ इ

तिश्वभ्यो नम इति श्वबलिः ॥ तथा ॥ पिपीलिकाकीटपतंग
ताश्चाबुभुक्षिताः कर्मनिबद्धबद्धाः ॥ प्रयांतु ते तृप्तिमिदं
मयान्नं तेभ्यो विसृष्टं सुखिनो भवंतु ॥ इति क्रिमिकीटपतं
गेभ्यो नम इति तद्बलिर्देयः ॥ तथा ॥ प्रवासं गच्छतो यस्य ग
हे कर्त्ता न विद्यते ॥ पंचानामहतामेषस यज्ञैः सह गच्छती
यात्रिस्मरणाद्धावासेप्येत्ते यथाशक्ति कर्त्तव्या एव ॥ तत्रापि
वैश्वदेवश्चश्चुल्यां निषिद्धः ॥ चुल्लीहोमो व्रासदानमन्ततो ग
मनं तथा ॥ असंख्यातं तु यज्जप्तं तत्सर्वं निष्फलं भवेत् ॥ त
था ॥ न पन्नये भूबलिं वीर दत्वा गृहबलिं द्विजः ॥ स्वयं नैवो
द्धरेन्मोहाद्यादेत्तच्छ्रीर्विनश्यति ॥ गालवः ॥ वैश्वदेवं दिवान ॥११३॥

उ॰अ।

क्तं न भवेच्चेत्स्थक् पृथक् ॥ प्रातरेव द्विरावृत्त्या कर्त्तव्यं स्मृतिशा
सनात् ॥ तथा ॥ दिवा वा यदि वा रात्रौ क्रियते वैश्वदेविकं ॥ द्विरा
वृत्त्या तदा कुर्यादिति वेदविदो विदुः ॥ एतच्चयच्छ्व ॥ ख्यायांसा
यंप्रातर्वैश्वदेवो विहितस्तद्विषयं ॥ अन्येषां सकृदेव भवती
सकृन्मेव ॥ वैश्वदेवं तथा श्राद्धं ब्रह्मयज्ञं च सूतके ॥ न कुर्यात्स्व
यमन्येन कारयेन्न च सर्वथा ॥ स्मर्त्यर्थसारेपि ॥ कुर्यात्संचम
हायज्ञान्नित्सदा सूतकं विनेति ॥ आत्मार्थं पचनं यस्य रत्य
र्थं यस्य मैथुनं ॥ वृत्त्यर्थं यस्य चाधीतं निष्फलं तस्य जीवि
तं ॥ अस्नात्ताशीमलं भुंक्ते त्वजपी पूयशोणितं ॥ अहुता
शी क्रिमीन् भुंक्ते अनन्वरुधिरं तथेत्यादि ॥ ततस्तदीयाबा

लज्येष्ठाग्रह्यायथार्हमश्नीयुः॥अन्येपितत्कालसमागता
भोजनीयाः॥भोजनकालेसमागतान्सखिसंबधिबांध
वान्भोजयेदितिवसिष्ठोक्तेः॥एवंपंचमहायज्ञाअहरहः
कार्याः॥अन्नाभावेकेनचिदाकाष्ठाद्देवेभ्यःपितृभ्योमनु
ष्येभ्यश्चोदपात्रादितिकात्यायनोक्तेः॥विनास्वस्थतकंपंच
महायज्ञाकरणेप्रायश्चित्तमुक्तंस्मृतौ॥स्वकर्महानेपत
नमृद्धेनैवस्वनापदि॥स्वकर्महानौनास्तिक्यान्मासेनप
तनंस्मृतं॥द्वादशाहव्रतेनैवतस्यशुद्धिस्तुनान्यथा॥त
त्रिरीक्ष्यार्कमीक्षेतस्परेत्स्नानंसचैलकं॥विद्योदितानांनि
सानांकर्मणांसमतिक्रमे॥स्नातकव्रतलोपेचप्रायश्चि

त्तमभोजनमित्याद्यलंप्रपंचेन॥ ॥इतिश्रीमदनंतभट्ट
विरचिते~~दिरः~~चितेविधानपारिजातेआह्निकविधौवैश्व
देवविधानं॥६२॥\ अथभोजनविधानं॥तत्रयाज्ञवल्क्यः
संभोज्यातिथिभृत्यांश्चदंपत्योःशेषभोजनं॥बालस्ववासि
नीवृद्धगर्भिण्यातुरकन्यकाः॥दंपत्योरपिमध्येपूर्वंगृह
पतिःश्रेष्टान्नमश्नीयात्ततःपत्नीति॥भारतेदानधर्मे॥भृ
त्यातिथिषुयोभुंक्तेभुक्तवत्सुनरःसदा॥अमृतंकेवलंभुं
क्तेइतिविद्धियुधिष्ठिर॥अभुक्तवत्सुनाश्नातिब्राह्मणेषु
चयोनरः॥अभोजनेनतेनाथाजितःस्वर्गोभवसूत॥देवेभ्य
श्चपितृभ्यश्चसत्प्रीतिभ्यस्तथैवच॥अवशिष्टानियोभुंक्ते

तमाकुर्विधिरूगासनमिति ॥ देवलः ॥ आहारं तु रहः कुर्यान्नि
र्हारं चैव सर्वदा ॥ गुप्ताभ्यां लक्ष्म्युपेतः स्यात्प्रकाशे परिहीयते
श्रिया ॥ रहः एकांते निर्हारः पुरीषाद्युत्सर्गः ॥ स्त्रीसंगश्च
मैथुनं सततं गुप्तमाहारं च सदाचरेदिति दानधर्मोक्तेः ॥ व्या
सश्च ॥ पंचार्द्रो भोजनं कुर्यात्प्राङ्मुखो मौनमास्थितः ॥ हस्तौ
पादौ तथैवास्यमेषां पंचार्द्रता स्मृता ॥ आचारदीपे ॥ स्नास्य
त्रोवारुणः कांतिं कुरुतेग्निः श्रियं हरते तु ॥ भुंजतो मसुरायु
ष्यं तस्मान्मौनं त्रिषु स्मृतं ॥ मनुः ॥ आयुष्यं प्राङ्मुखो भुंक्ते
यशस्यं दक्षिणामुखः ॥ श्रियं प्रत्यङ्मुखो भुंक्ते ऋतं भुंक्ते ॥११५॥
उदङ्मुखः ॥ एतत्काम्यं ॥ नित्यविधिस्तु ॥ प्राङ्मुखोन्नानि भुं

जीततयोत्तरमुखोपिवेति ॥ अनायुष्यं त्वेवं मुखस्य भोज
नं मातुरित्युपदिशतीत्यापस्तंबस्मरणाज्जीवन्मातृकस्य
दक्षिणामुखभोजननिषेधः ॥ आचारदीपेपि ॥ पुत्रवान्स्व
गृहे निसंनाश्नीयादुत्तरामुखः ॥ सोमवारे तथा नित्यं वर्जये
त्तु सदा बुधः ॥ भोजनकालमाह मनुः ॥ सायंप्रातर्द्विजाती
नामन्नानं श्रुतिचोदितं ॥ नांतरा भोजनं कुर्यादग्निहोत्रसमो
विधिः ॥ भारते दानधर्मे सायंप्रातर्मनुष्याणामशनं देवनि
र्मितं ॥ नांतरा भोजनं दृष्टमुपवासविधिर्हि सः ॥ अतस्तु सा
यमाशं च प्रातराशं च यो नरः ॥ सदोपवासी भवति यो न भुं
क्तेंतरा नर इति अत्र प्रातः शब्दः पंचधा विभक्तदिनस्यत्त

तीयद्विभागवाचकः॥ तथा॥ ततोभोजनवेलायांकृत्वान्वा
रंसदात्मयान्॥ पोष्यवर्गसमोपेतोभोजनंकारयेद्बुधः
मातापितागुरुर्भार्यापुत्रोदासस्तथैवच॥ अभ्यागतोति
थिश्चाग्निःपोष्पवर्गाअमीनव॥ ब्रह्मपुराणे॥ उपलिप्ते
समेस्थानेशुचौशुद्धासनान्विते॥ मंडलंगोमयेनस्याद
थवागोरभस्मना॥ मंडलमाहव्यासः॥ चतुरस्रंत्रिकोणं
चवर्तुलंचार्धचंद्रकं॥ कर्तव्यमानुपूर्वेणब्राह्मणादिषु
मंडलं शंखः आदित्यावसवोरुद्राब्रह्माविष्णुस्तथैवच॥
मंडलंतुपजीवंतितस्मात्कुर्वीतमंडलं॥ यातुधानाःपिशा
चाश्चसुअरोराक्षसास्तथा॥ हरंतिरसमन्नस्यमंडलेनवि ॥११६॥

अ० आ०

वर्जितं॥ आसनमाहमनुः॥ श्रीपर्णीचशमीशालीकदंबोवा
रणस्तथा॥ पंचासनोपविष्टस्तुस्नानहोमादिकंचरेत्॥ व
र्ज्यंमुक्तंप्रचेतसा॥ गोशाकन्मन्मयंभिन्नंतथापालाशपि
प्पलं॥ लोहबद्धंसदैवार्कंवर्जयेदासनंबुधः॥ तथामधुप
र्केभोजनांतेसंध्यादौनिसकर्मणि॥ आसनस्थःसदाचा
मेदन्यत्रकुक्कुटासनः॥ यस्तुभोजनवेलायामासनस्थ
उपस्पृशेत् ब्राह्मणोभोजनात्पूर्वंतभागुः॥ पंक्तिदूषकमि
सादिस्मृतेरासनस्थस्याचमननिषेधः॥ पैठीनसिः॥ एक
एवतुयोभुंक्तेविमलेकांस्यभाजनेचत्वारितस्यवर्द्धंतेआ
युःप्रज्ञायशोबलं॥ भिन्नेभोजननिषेधात्अभिन्नंकांस्यपा

त्रं ॥ सौवर्णेराजतेचैवपात्रेभोजनमाचरेदितिस्मृतेः ॥ सौ
वर्णादिकमपिविभवेसतिकार्यं ॥ ताम्रपात्रेनभुंजीतभि
न्नकांस्येमलान्वितइतिवृद्धमनूक्तेस्ताम्रपात्रनिषेधः ॥
स्वीयपात्रेसर्वदाभोज्यं ॥ परपात्रेषुभुंजानःप्राजापत्यंचरे
द्विजइतिस्मृतेः ॥ पात्रपरिमाणमाहयोगी ॥ पंचांगुलात्तः
परतदूर्ध्वंमहाभाजनमिष्यते ॥ नातिदीर्घंनातिह्रस्वंर
त्निमात्रप्रमाणकं ॥ ग्रंथांतरेतु ॥ पलविंशतिमारभ्यअत
ऊर्ध्वंयथेच्छया ॥ इदमेवगृहस्थानांनयतिब्रह्मचारिणा
मित्यल्पंप्रमाणमप्युक्तं ॥ तत्समंतात्लघुपात्राणिनिषे
ध्यानितन्मध्ये ॥ लघीयांस्यपिपात्राणिभूमौस्थाप्यानि ॥११७॥

अन्न।

भारत ॥ पयःशाकादिभुक्त्यर्थंनमहाभाजनोपरि ॥ सव्ये
पार्श्वेचपानीयपात्रंदद्याद्विचक्षणः ॥ आचारदीपे ॥ दक्षिणं
तुपरित्यज्यवामेनीरनिधापनात् ॥ अभोज्यंतद्भवेदन्नंपा
नीयंसुरयासमं ॥ तथा ॥ तांबूलाभ्यंजनंचैवकांस्यपात्रेचभोज
नं ॥ यतिश्चब्रह्मचारीचविधवाचविवर्जयेत् ॥ इतिव्याघ्रपादु
क्तेर्यसादेःकांस्यपात्रनिषेधः ॥ अत्रप्रसंगाद्विधवाधर्माःकथ्यं
ते ॥ स्कांदे ॥ पत्यौमृतेपियायोषिद्वैधव्यंपालयेद्यदि ॥ सापुनः
प्राप्यभर्तारंस्वर्गलोकान्समश्नुते ॥ एकाहारःसदाकार्योनद्वि
तीयःकथंचन ॥ त्रिरात्रंपंचरात्रंवापक्षव्रतमथापिवा ॥ मासो
पवासंवाकुर्याच्चांद्रायणमथापिवा ॥ यवान्नेनफलाहारैः ॥

शाकाहारैः पयोव्रतैः ॥ प्राल्पयात्रांप्रकुर्वीतियावत्प्राणाःस्व
यंव्रजेत् ॥ वैशाखेकार्त्तिकेमाघेविशेषनियमंचरेत् ॥ स्नानंदा
नंतीर्थयात्रांविष्णोर्नामग्रहंपुनः ॥ नाधिरोहेदनड्वाहंप्राणैः
कंठगतैरपि ॥ कंचुकंनपरीदध्याद्वासोनविकृतंन्यसेत् ॥ २
विधवाकबरीबंधो भर्तृबंधायजायते ॥ शिरसोवपनंतस्मा
त्कार्यंविधवयासदा ॥ पर्यंकशायिनीनारीविधवापातये
त्पतिं ॥ तस्माद्भूशायनंकार्यंपतिसौख्यसमीहया ॥ नैवांगो
द्वर्तनंकार्यंस्त्रियाविधवयाक्वचित् ॥ गंधद्रव्यस्यसंभोगोनै
वकार्यस्तयापुनः ॥ पघादिष्टतमंलोकेयच्चपत्युःसमीहि
तं ॥ तत्तद्गुणवतेदेयंपतिप्रीणनकाम्यया ॥ तर्पणंप्रत्यहंका ॥११८॥

उ०न०अ०

र्यंभर्तुःकुशतिलोदकैः ॥ तत्पितुस्तत्पितुश्चैवतन्मात्रादिभ्यए
वच ॥ तर्पणंतुपुत्रपौत्राभावेज्ञेयं ॥ श्राद्धंचतर्पणंचैवनकुर्या
त्पुत्रिणीसतीतिभृगूक्तेः ॥ विष्णोस्तुपूजनंकार्यंपतिबुध्यान
चान्यथा ॥ पतिमेवसदाध्यायेद्विष्णुरूपधरंपरं ॥ अत्रवृद्धास्तुसु
तान्किंचिन्नकुर्याद्भर्तृतत्परेति ॥ पुत्राद्यभावेहरिवंशेपुण्य
कव्रतकल्पेविशेषः ॥ मन्मयंचित्रगंवापिकृत्वाभर्त्तारमात्म
नः ॥ तदाज्ञयास्नानदानव्रतादीनाचरेत्सदेति ॥ अथप्रकृतेम
नुस्त्रियते ॥ कांस्यपात्राभावेपत्रः ॥ रंभाकुटजमध्वाम्रजंबू
पनसचंपकाः ॥ पद्मोदुंबरपालाशाबलपत्रंपवित्रकं ॥ अश्वः
॥ वटार्काश्वत्थपत्रेषुकुंभीतिंदुकपत्रयोः ॥ श्रीकामोनैवभुं

जीर्णके विदारकरंजयोः॥ करे खर्परके चैव शिलायां ताम्रभा
जने॥ भिन्नकांस्ये च वस्त्रे च न भुंजीत तथायसे॥ आसने पा
दमारोप्य यो भुंक्ते ब्राह्मणः क्वचित्॥ मुखेन धमितं चान्नं तु
ल्यं गोमांसभक्षणे॥ दक्षः॥ भोजनं हवनं दानमुपहारः प्र
तिग्रहः॥ बहिर्जानु न कार्याणि तद्वदाचमनं जपं॥ नाश्नीया
द्भार्यया सार्द्धं नाकाशे न तथोत्थितः॥ शायानः प्रौढपादश्च
कृत्वा चैवावसक्थिकं॥ आकाशो यंत्रादौ॥ पादारोपितपादः प्रौ
ढपादः संयहेत्र विशेषः॥ मात्रा सहोपनीते स्याद्विवाहे भा
र्यया सह॥ अन्यत्र सह भुंजानः समः स्यात्पशुभिः सह॥ प्र
योगपारिजाते गर्गः॥ रंभापत्रपलाशेषु यः कुर्यात्पारणं क्व ॥११५१॥

अ॰आ

चित्॥ सप्तजन्मकृतं पुण्यं तत्क्षणादेव नश्यतीति॥ यत्तु मिताक्ष
रायां॥ पलाशपत्रभोजी च अहोरात्रेण शुध्यतीति यो निषेध
उक्तः स वल्लीपलाशविषय इति मदनपारिजाते व्याख्यातं॥ प
लाशपत्रभोजीयः सोनंतफलमश्नुत इति विशेषोक्तेः॥ य
मः॥ शाकादिपुरतः स्थाप्यं भक्ष्यं भोज्यं च वामतः॥ अन्नं मध्ये
प्रतिष्ठाप्य दक्षिणे घृतपायसे पात्रं हस्तात्तु वामेन यावद्वर्त्तति
भोजनं॥ पाणिना दक्षिणे नैव पर्युक्ष्य परिषिंचयेत्॥ अंगुष्ठ
स्तर्जनी चैव मध्यमा चैव सर्वदा तिस्रो ह्येताः कांगुली चैव प्र
शस्ता पात्रधारणे॥ भारते॥ आज्ञाकृतिं विना नैव यत्किंचि
त्परिविष्यते॥ दुराचारैश्च यद्भुक्तं तं भागं रक्षसां विदुः॥ मा

कंडेयोत्र विशेषमाह ॥ न्यस्तपात्रस्तु भुंजीत पंच ग्रासान्म-
हामुने ॥ शेषमुध्दस्य भोक्तव्यं श्रूयतामत्र कारणमिति ॥ उ-
ध्दस्य यंत्रादौ पात्रं स्थापयित्वेत्यर्थः ॥ यंत्रमुक्तं संग्रहे ॥ कां-
स्यस्य काष्टकस्यापि वंशस्यापि तथैव च ॥ पैत्रिकानुत्रि-
कोणावेक कर्त्तव्या पात्रधारणे ॥ षट्त्रिंशन्मते ॥ ओदनेप-
रमान्ने च घृतपात्रं स्थितं यदि ॥ एतदाज्यं भवेद्दत्तं तदन्नं मां-
समुच्यते ॥ सैंधवं लवणं चैव तथा मानससंभवं ॥ पवित्रं
परं ह्येतत्प्रत्यक्षे च न दुष्यतः ॥ सामुद्रं भूमिजं चैव प्रत्यक्षे च
वदुष्यतः ॥ तस्मादिदं द्वयं तत्र मुक्तं परिवेष्यं ॥ श्राद्धादिभो-
जने पंक्त्याभावउक्ते ॥ ब्राह्मे ॥ पंचग्रासांस्तु भुंजीत तद्धविद्दरम ॥१२०॥

उ०आ०

निसंकटे पात्रमुध्दृत्य शेषं तु भक्षयित्वैतत्काद्दते ॥ गर्गः ॥ स
संवर्त्तेन वै प्रातर्वारिणा परिषेचयेत् ॥ सायंकाले तथैवस्या-
दृतं चेत्सादितः क्रमात् ॥ आपस्तंबः ॥ कौशं तु बिभृयान्नित्यं
पवित्रं दक्षिणे करे ॥ भुंजानस्तु विशेषेण गर्हितां च विशुद्ध-
ये भोजने वर्त्तुलं प्रोक्तं पवित्रं ग्रंथिवर्जितमिति ॥ तथा ॥ उ-
उद्धृत्य किंचिदन्नाग्रं धर्मराजाय वै बलिं दत्वाथ चित्रगुप्ता-
य भक्तेभ्यश्च तथैव च ॥ अन्नेनैव घृताक्तेन नमस्कारेण वै
भुवि ॥ त्रिस्थाने वाकुलीर्दद्याद्भोजनादौ तु दक्षिणे इति भवि-
ष्यत्पुराणे ॥ भोजनमाहात्म्यमन्त्रेणैव सूक्ते भोजनादन्यत्र फला-
हारादौ न चित्राकुन्तिरिति गम्यते ॥ केचित् ॥ भूपतये भु-

वनस्पतये भूतानां पतये नमः ॥ एवं बलित्रयं दद्याद्भो
जनादौ विशेषतः स्या कुः ॥ अत्राचारतो व्यवस्था ॥ पि
तृकार्ये तु ॥ पितृणां मन्त्र उत्सृष्टे बलिं कुर्वन्ति ये द्विजाः ॥ आ
सुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठति ॥ यत्तु ॥ स्पर्शनांते
स्पर्शोदन्नं संकल्प्यांते बलिं हरेत् ॥ होमस्तु मधुवातांते
होमांते चोदकं पिबेदिति ॥ वैश्वदेविक द्विजविषयं ॥ पि
त्र्यद्विजस्य बलिदाननिषेधात् ॥ इति श्राद्धकल्पे ॥ सूत
केपि बलिदानापोशानप्राणाहुतिपात्रधारणादयो भु
क्तिनियमा भवंतीति स्मृत्यर्थसारे स्पष्टमुक्तं ॥ अन्यत्रा
पि ॥ निःसस्नानं चरणैवं च भोजनं नियमान्वितं ॥ अस्प ॥१२७॥

अ ॥

र्श्यस्पर्शने स्नानं कुर्यादिवचस्त्तकी ॥ अन्यत्रानधिकारान्त
र्पणदेवार्चनादयो न भवंति ॥ मनुः ॥ दत्वा तु चित्रगुप्ताय हस्तं
प्रक्षालयेद्द्विजः ॥ अप्रक्षालितकरो भुंक्ते रौरवं नरकं व्रजेत् ॥
चंद्रिकायां दक्षः ॥ भोजनादौ बलिं भुक्त्वा समुद्धृच भोजनं ॥ अ
नुद्धृत्य च यो भुंक्ते प्राणायामाष्टकं चरेत् ॥ उक्त्वा३मृतोपस्त स्य
रणमसि स्वाहां तमेव च ॥ अपोशानं तदित्याकु भोजनादौ
पिबेज्जलं ॥ अपोशानमकृत्वा तु यो भुंक्ते द्विजसत्तमः ॥ अ
भोज्यं न भवेदन्नं भुक्त्वा दोषमवाप्नुयात् ॥ तद्दोषपरिहारा
र्थं प्राणायामान्समाचरेत् ॥ अपोशानार्थं यत्तोयं धृतं वे
च्छिष्टं भवेत् ॥ हस्तं प्रक्षाल्य तोयेन पुनर्नैव धारयेज्जलं

आपोशानंकरेहत्वायथाशीर्वचनंपठेतु॥अभोज्यंतद्भवेद
न्नंदाताभोक्ताचकिल्बिषी॥योयस्यान्नसमश्नातिसतस्या
श्नातिकिल्बिषं॥तद्दोषपरिहारार्थंमंत्रमेतमुदीरयेत्॥अ
न्नंब्रह्मरसोविष्णुर्भोक्तादेवोमहेश्वरः॥एवंध्यात्वाद्विजो
भुंक्तेयन्नदोषैर्नलिप्यते॥प्राणाहुतीरकृत्वातुयश्चान्नंप
रिमर्दयेत्॥मर्द्दितंभोजयेद्यस्तुप्राजापत्यंततश्चरेत्॥चि
त्राहुतिदानानंतरंहस्तंप्रक्षाल्यपंक्तिदोषसंभावनायां
जलधारादिनापंक्तिंभिंद्यादिसूक्तंपारिजातेच [illegible] मनुना
एकपंक्त्युपविष्टानांदुष्कृतंयद्दुरात्मनां॥सर्वेषांतत्समंता
वद्यावत्पंक्तिर्नभिद्यते॥अग्निनाभस्मनाचैवस्तंभेनसलि ॥१२२॥

उ०आ०

लेनवा॥द्वारेणैवचमार्गेणपंक्तिभेदोबुधैःस्मृतः॥स्तंभेनेति
क्वचित्पाठः॥याज्ञवल्क्यः॥अपोशानेनोपरिष्टादधस्तादश्न
नंतथा॥अनग्नममृतंचैवकार्यमन्नंद्विजन्मना॥दक्षः॥श्रा
द्धेनापोशानंपीत्वाश्राद्धेनघृतपायसं॥श्राद्धेनापःपयःपीत्वा
सुरापानसमंभवेत्॥आर्द्रामलकमानंतुयद्वाबदरमात्रकं
॥प्राणाहुतिप्रमाणंचसघृतान्नस्यतद्भवेत्॥घृतहीनंतु
योभुंक्तेनरस्त्वाहुतिपंचकं॥पश्चाद्घृतेनयोभुंक्तेद्विजश्चांद्रा
यणंचरेत्॥घृताभावेतुगव्येनसंस्कुर्वीतजलेनवागव्ये
नदुग्धादिनेत्यर्थः॥पाराशरः॥मुखेचान्नस्यनिक्षेपोमंत्रैः॥
प्राणादिपंचकैः॥भोजनंतद्धिविज्ञेयंतत्रैवनियमाःस्मृताः

पात्रालंभस्तथामौनंतदूर्ध्वमपिचेच्छया॥ शौनकः॥ स्वाहां
ताः प्राणवाद्याश्चनाम्नामंत्रास्तुवायवाः॥ जिह्वयाचग्रसे
दन्नंदन्तानेननसंस्पृशेत्॥ तथैवषष्ठींदद्यात्तुस्वचैतन्येसुखा
त्मनि तर्जनीमध्यमांगुष्ठलग्नाप्राणाहुतिर्भवेत्॥ मध्यमा
नामिकांगुष्ठैरपानेजुहुयाद्बुधः॥ कनिष्ठानामिकांगुष्ठै
र्व्यानेतुजुहुयाद्बुधः॥ कनिष्ठातर्जन्यंगुष्ठैरुदानायहुनेद्बु
धः॥ सर्वांगुलीभिरादायसमानस्याहुतिर्भवेत्॥ तथैवष
ष्ठींजुहुयात्स्वचैतन्येसुखात्मनीति॥ केचित्ब्रह्मणेस्वाहे
तिसप्तमीमाहुः॥ श्रद्धायांप्राणेनिविष्टोमृतंजुहोमीत्या
दिनातैतिरीयारण्यकेतथोक्तत्वादिति॥ इदंचप्राणाग्निहोत्रमि ॥१२३॥

अ॰प्रा

तिज्ञेयं॥ तदुक्तंशतपथब्राह्मणेतेपुरुषमविज्ञातस्तस्यमुखमे
वाहवनीयंकुर्वतेजिह्वांसमिधमन्नमेवश्रुक्कामाहुतिंतेपु
रुषंतर्पयतःसयएवंविद्वानश्नात्यग्निहोत्रमेवास्यहुतंभव
तीति॥ श्रुत्यंतरेपि॥ सयइदमविद्वानग्निहोत्रंजुहोतियथांगा
रानपोह्यभस्मनिजुहुयात्तादृक्तत्स्यादथयएतदेवंविद्वा
नग्निहोत्रंजुहोतितस्यसर्वेषुलोकेषुसर्वेषुभूतेषुसर्वेष्वा
त्मसुहुतंभवतीति॥ गोभिलसूत्रेपंचग्रासान्गृ[illegible]यात्प्रा
णायस्वाहेतिगार्हपत्यमेवतेनजुहोत्यपानायस्वाहेत्यन्वाहार्यप
चनमेवतेनजुहोतिव्यानायस्वाहेत्याहवनीयमेवतेनजुहो
त्युदानायस्वाहेतिसभ्यमेवतेनजुहोतिसमानायस्वाहेत्या

वसथ्यमेवतेनजुहोतीती सामोपनिषद्यपितद्युक्तंप्र
थमभागछेत्यादिनात्रोच्छिष्टदोषःप्रसाकुति॥ तदाहमनुः॥
मधुपर्केचसोमेचअप्सुप्राणाहुतीषुच। आस्यहोमेषुसर्वे
षुनोच्छिष्टंमुनिरब्रवीत्॥ तथास्मृतिसंग्रहे॥ एवंपंचाहुती
र्हुत्वाब्रह्मग्रंथिंविसृज्यच। प्रक्षाल्यवामहस्तंतुपश्चाद्भोज
नमाचरेत्॥ तर्जन्यांतुस्थितेरौप्येब्रह्मग्रंथौचमूर्धनिकनि
ष्ठिकायांस्थितेखड्गेनैवभोजनमाचरेत्॥ अन्यथाभोजनंकु
प र्वन्प्राणायामशतंचरेत्॥ यद्यभुक्तेतदन्नंतुकिंचिद्देस्था
पयेत्पृथक्॥ यद्यद्येप्सितंचान्नंगृहीत्वाभोजनंचरेत्॥ अ
निधायपृथक्चान्नंगायत्र्याभिमंत्रितं॥ पुनरन्नंगृ ॥१२४॥

अ०आ०
ह्णीयाद्यदिभुंजीततद्दोषभाक्॥ पंक्तिभेदेनयोभुंक्तेपरकीये
स्वकेपिवा। तदन्नमांससमित्याहुःक्षयरोगीचजायते॥ सर्वा
भिरंगुलीभिःसममश्नीयादितिवसिष्ठोक्तेःसमुदितांगु
लिभिर्भुंजीत॥ तथा। जलपात्रंतुनिक्षिप्यमणिबंधेचदक्षि
णे॥ विप्रोभोजनकालेतुपिबेद्वामेनपाणिना॥ अन्यत्रतु॥
धारयानोदकंपेयंपीत्वादोषमवाप्नुयात्॥ जलंपात्रेणत
त्पेयमितिशातातपोब्रवीत्॥ एकपंक्त्युपविष्टानांविप्रा
णांसहभोजने॥ यद्येकोपिसजेत्पात्रंनाश्नीयुरितरेप्पणु॥ भुं
जानेषुतुविप्रेषुयोग्रेपात्रंविमुंचति॥ समूढोनरकंयाति
ब्रह्महासनिगद्यते॥ यमादिकरणेदोषोक्तमेवप्राक्।

एकपंक्त्युपविष्टानामन्योन्यं स्पृशन्ते यदि ॥ तदन्नमत्यजन्भु
क्त्वा गायत्र्यष्टशतं जपेत् ॥ भवेदुच्छिष्टसंस्पर्शो भोक्तुर्वा
भाजनस्य वा ॥ अन्नं तदेव भोक्तव्यं न त्याज्यं भाजने स्थितं
अन्यदन्नं न भोक्तव्यं यदि भुंजीत किल्बिषी ॥ स्नात्वा ततो
जपेद्देवीं शतमष्टोत्तरं द्विज ॥ वृद्धशातातपस्तु ॥ यदा भो
जनकाले तु अशुचिर्भवति द्विजः ॥ भूमौ निक्षिप्य तं ग्रासं
स्नात्वा शुद्धिमवाप्नुयात् ॥ आर्द्रीर्वा सर्वमेवापि त्रिरात्रेण
विशुध्यति ॥ अज्ञानाद्भोजनं कुर्वन् गायत्र्यष्टशतं जपेदि
त्याहुः ॥ मदनपारिजाते मार्कंडेयः ॥ यस्तु पाणितले भुंक्ते ॥१२५॥
यः स शूद्रसमश्नुते ॥ अंगुलिं चोद्धरेद्यस्तु गोमांसाशन

अ० आ

वत्स्मृतं ॥ विष्णुपुराणे ॥ अश्नीयात्तन्मना भूत्वा पूर्वं तु मधुरं र
सं गलवणाम्लौ तथा मध्ये कटुतिक्तादिकांस्ततः ॥ प्राक् द्रवं
रु पुरुषोऽश्नीयान्मध्ये तु कठिनाशनः ॥ अंते पुनर्द्रवाशी च ब
लारोग्येन मुंचति ॥ नोच्छिष्टं घृतमादद्यात्तथा गव्यं विशेष
तः ॥ जठरं पूरयेदर्धमन्नैर्भागं जलस्य च ॥ वायोः संचारणा
र्थाय चतुर्थमवशेषयेत् ॥ आपस्तंबः ॥ अष्टौ ग्रासा मुने
र्भैक्ष्यं षोडशारण्यवासिनः ॥ द्वात्रिंशत्तु गृहस्थस्य ह्यमि
तं ब्रह्मचारिणः ॥ पुलस्त्यः ॥ भोजनं तु न निःशेषं कुर्यात्प्रा
ज्ञः कथंचन ॥ अन्यत्र दधिसक्त्वाज्यपललक्षीरमधुनः ॥
परलं मांसं ॥ अनिंद्यं भक्षयेन्नित्यं वाग्यतोन्नमकुत्सयन्

साहिस्मृतेरविधानान्नभोक्तव्यं।तच्चननिंद्यात्।अन्नंननिंद्या
दृ त्।तद्व्रतमितितैत्तिरीयश्रुतेः।अत्रवर्ज्यमाहयाज्ञवल्क्यः
॥अनर्चितंवृथामांसंकेशकीटसमन्वितं।शुक्तंपर्युषितो
च्छिष्टंश्वस्पृष्टंपतितेक्षितं।उदक्यास्पृष्टंसंघुष्टंपर्याया
न्नंचवर्जयेत्।गोघ्रातंशकुनोछिष्टंपदास्पृष्टंचकामतः
अनर्चितंउत्तमायापावज्ञावत्तंयदन्नंतत्।वृथामांसंप्राणा
त्ययेत्तथाश्राद्धेप्रोक्षितंद्विजकाम्यया।देवान्पितॄन्सम
भ्यर्च्यखादन्मांसंनदोषभागित्युक्तप्रकारेणासंपादित
मांसं।केशकीटसमन्वितमन्नं।शुक्तं।यत्स्वयमम्लमस
त्यंसत्कालपरिवासादिनाअम्लीभवतीत्यादिसर्थः।पर्यु ॥१२६॥

अ०आ० षितंरात्र्यन्तरितं।उच्छिष्टंभुक्तोच्छिष्टं।उदक्यारजस्वलातया
स्पृष्टं।संघुष्टंकोभुक्तइत्यादियद्घोष्यदीयते।पर्यायान्नं
अन्यसंबन्ध्यन्यव्यपदेशेनयद्दीयते।अन्यस्पृष्टं।पर्युषि
तेप्रतिप्रसवमाहसएव।अन्नंपर्युषितंभोज्यंस्नेहाक्तंचि
रसंस्थितं।अस्नेहाअपिगोधूमयवगोरसविक्रियाः
गोधूमविकारोमंडकः।यवविकारःसक्तुः।खांडवः।अपू
पाःसक्तवोधानास्तक्रंदधिघृतंमधु।एतत्सर्वेषुभोक्तव्यं ५५
भांडस्थलेपेनस्वेद्दचेत्।तथाआभीरभांडसंस्थानिपयोदधि
घृतानिच।तावत्सूतंहित्वाभांडंयावत्तत्रावतिष्ठति।कलिं
गंचपटोलंचवृंताकंसंधितानिच।गंडुपोदकीरक्तशाकमे

तान्चैववर्जयेद्द्विजः॥नारदीयेपि॥वृंताकंचकलिंगंचदग्धमन्नं
मसूरिका॥उदरेयस्यतिष्ठंतितस्यदूरतरोहरीः॥शाकमूल
फलेक्षूणिदंतछेदैर्नभक्षयेत्॥लवणंव्यंजनंचैवघृतंतैलं
तथैवच॥लेह्यंपेयंचविविधंहस्तदत्तंनभक्षयेत्॥अत्रल
वणादिद्रव्यांयंदे॥अपक्वंस्नेहपक्वंचनतुद्रव्यांकद्दाचैनस्
ह्लेरपक्वस्नेहपक्वेहस्तेनैवदद्ये॥केचित्तुवृंताकनिषेधःश्वे
तपरइत्याहुः॥वर्जयेश्वेतवृंताकमलाबुंवर्त्तुलंतथा॥छ
त्रकंलशुनंचैवभुक्काचांद्रायणंचरेदितिविशेषोक्तेरिति॥
तत्तुनविधेय्वनुपलंभादुपेक्ष्यं॥रागमूलत्वात्॥उपलंभे ॥१२७॥
वाश्वेतत्वविशेषणंदोषाधिक्यायनत्वितरप्रतिप्रसवा

प्र०७।

यप्रायश्चित्ताधिक्यकथनादितिज्ञेयं॥तथा॥रात्रौदधिन
भोक्तव्यंदिवाचनवनीतकं॥पयएकरात्रंहेयंतथाक्रामेल
कांचिकमितिस्कांदे॥तथा॥तिथिविशेषेवर्ज्यान्याहबृहस्प
तिः॥कूष्मांडंतरुणींचैवमूलकंबृहतींतथा॥श्रीफलंचक
लिंगंचधात्रींप्रतिपदादिषु॥वर्जयेत्सप्तमीयावदत्यथा
दुष्कृमाचरेन्॥सप्तम्यांरविवारेचदिवारात्रौतथैवच॥
धात्रीफलंनरोश्नीयादलक्ष्मीकोभवेन्नरः॥विशालंभो
जनेकालेयदिदीपोविनश्यति॥पाणिभ्यांपात्रमालभ्यगा
यत्रीमनसास्मरेत्॥पश्चाद्दीपकंदृष्ट्वातच्छेषंभुंजये
द्विजः॥अन्यदन्नंनभोक्तव्यंभुक्त्वाकृच्छ्रंसमाचरेत्॥माक्षि

कः संतता धारा चेद संबंधिबिंदवः॥ सुरते स्त्रीमुखं चैव
वि पत्रं मनुरब्रवीत्॥ प्राशयेत्तथा श्राद्धे प्रोक्षितं द्विजकाम्य श्र
या॥ देवान् पितॄन् समभ्यर्च्य खादन् मांसं न दोषभागिति
यदुक्तं तस्यायमर्थः॥ अन्नाभावेन यदि प्राणनाशस्तदा
मांसभक्षणे न दोषः सर्वत्र आत्मानं गोपायेदिति श्रुतेः
तथा श्राद्धे निमंत्रितो मांसमश्नीयात्॥ यथाविधिनियुक्त
स्तु यो मांसं नात्ति मानवः॥ स प्रेत्य पशुतां याति संभवानेक
विंशतिमिति मनूक्तेः॥ तथा प्रोक्षणाख्यश्रौतसंस्कारसंस्कृ
तमांसभक्षणे न दोषः॥ विहितत्वात्॥ अभक्षणेप्यागसि
द्धेश्च तथातिथ्यर्चनार्थं संपादितं यन्मांसं द्विजप्रार्थन ॥१२८॥

अ०आ०
यात भक्षणे न दोष इति॥ अत्र यद्यपि दोषाभाव उक्तस्तथापि
यागादन्यत्र कलौ मांसं वर्ज्यं॥ तथाहि॥ अक्षतागोपशुश्चैव श्रा
द्धे मांसं तथा मधु॥ देवराच्च सुतोत्पत्तिः कलौ पंच विवर्जयेदि
ति बृहन्नारदीयोक्तेः॥ अक्षता कृतविवाहाऽनुपभुक्ता पुगं
रेतेन वान्न विवाह्येत्यर्थः॥ शौचं च पात्रशुद्धिश्च श्वश्रद्धा च पर
मायदि॥ अतं तत्र द्विरूच्छ्राद्धे एतत्त्वकृन्निरामिषमिति ब्र
ह्मसारावरोक्तेश्च॥ क्षिप्त्वा कूपे यथा किंचिद्बालः प्राप्तुं यदि
च्छति॥ पतत्यज्ञानतः सोऽपि मांसेन श्राद्धकृत्तथेति निगमो
क्तेः॥ न दद्यादामिषं श्राद्धे न चाद्याद्धर्मतत्त्ववित्॥ मुन्यन्नैः
स्यात्परा प्रीतिर्यथा पशुहिंसयेति भागवतोक्तेः॥ सर्वान्का
न

मानवाप्नोति हयमेधफलं तथा ॥ गृहेपि निवसन्विप्रो मुनि
र्मांसविवर्जनादिति याज्ञवल्क्योक्तेश्च ॥ प्रोक्षिताभ्युक्षितं
मांसं तथा ब्राह्मणकाम्यया ॥ अल्पदोषमिदं ज्ञेयं विपरी
ते तु लिप्यत इति दानधर्मेऽल्पदोषश्रुतेश्च ॥ ननु पि.हृ.मा
मासिकश्राद्धमन्वाहार्यं विदुर्बुधाः ॥ तच्चामिषेण कर्तव्यं प्र
न शस्तेन प्रयत्नतः ॥ तथा ॥ कालशाकं महाशल्काः खड्गलो
हामिषं मधु ॥ आनंत्यायैव कल्प्यंते मुन्यन्नानि च सर्व
थेति मनुयाज्ञवल्क्यादिस्मृतेः ॥ श्राद्धे मांसविधानाद्वि
धिनिषेधानां देशभेदेन व्यवस्था कुतो नांगीक्रियत इति ॥१२९॥
चेन्न ॥ मांसनिषेधकवाक्ये कलावितितद्देशभेदग्रहणाभा

अ०आ० वात् ॥ तत्कल्पनायां तु यावति देशे मांसवर्जनं तद्रूपते तद्दे
शवाचकपदाभावादनेकपदकल्पनेऽनेकवाक्यभेदापत्ति
ः प्रसज्यते ॥ देशाचाराः परिग्राह्यास्तत्तद्देशीयजैर्नरैः ॥ अ
न्यथा पतितो ज्ञेयः सर्वधर्मबहिष्कृत इति बृहन्नारदीय
वचनबलान्नापि देशाचारतो व्यवस्था ॥ इदं वचनं तत्तद्देश
सदाचाराणामेव व्यवस्थापकं न दुराचारस्य ॥ यस्मिन्देशे
य आचारः पारंपर्यक्रमागतः ॥ श्रुतिस्मृत्यविरुद्धश्च तमनु
ष्ठातुमर्हतीति देवलोक्तेः ॥ कलौ पंच विवर्जयेदिति निरवका
शप्रमाणविरोधाच्च अलं प्रसक्तानुसक्तेन ॥ अहृतमुच्यते ॥
याज्ञवल्क्यः ॥ परपाकरुचिर्न स्यादनिंद्यामंत्रणाद्दृते ॥ बहूत्रि

शान्तेपि॥ दुराचारस्य विप्रस्य निषिद्धाचरणस्य च॥ अन्नं भु
क्त्वा द्विजः कुर्याद्दिनमेकमभोजनं॥ लिखितः॥ परपाकनिवृत्त
स्य परपाकरतस्य च अपचस्य च भुक्त्वान्नं द्विजश्चांद्रायणं च
रेत्॥ चांद्रायणमभ्यासविषयं॥ अनभ्यासे तु त्रिरात्रमभो
जनमेव॥ तल्लक्षणमपि स एवाह॥ गृहीत्वाग्निं समारोप्य प
च यज्ञान्न निर्वपेत्॥ परपाकनिवृत्तो सौ मुनिभिः परिकी
र्तितः॥ पंचयज्ञान्स्वयं हुत्वा परान्नमुपजीवति॥ सततं प्रा
तरुत्थाय परपाकरतस्तु सः॥ गृहस्थधर्मवत्तोपोददाति
परिवर्जितः॥ ऋषिभिर्धर्मतत्त्वज्ञैरपचः परिकीर्तित इति
आदित्यपुराणे एकादश्याध्यायैस्तस्मादहरहर्देयमन्नमे ॥१२०॥

अ०आ०

वविचक्षणैः॥ अपरीक्ष्यैव सर्वेभ्यो दतिस्वायं भुत्रासनात्॥
आममन्नं गृहस्थाय पक्वं नैव कदाचन॥ दातव्यं हि निषिद्धं तद
त्ते श्राद्धं शिवो ब्रवीदिति॥ शातातपः॥ वनस्पतिगते सोमे प
रान्नं ये तु भुंजते॥ तेषां मासकृतं पुण्यं दातारमधिगच्छतीति
उपासते ये गृहस्थाः परपाकमबुद्धयः॥ तेन ते प्रेत्य पशुतां
व्रजंत्यन्नादिदायिनामिति मनुवचनं लोभेन ग्रामात् ग्रामां
तरं गत्वा परान्नं भुंजतो दोषविशेषाय दर्शिताकल्पनीयं॥ अ
भोज्यान्नान्याह याज्ञवल्क्यः॥ कदर्यबद्धचौराणां क्लीबरंगाव
तारिणां॥ वैणाभिशस्तवार्धुष्यगणिकागणदीक्षिणां॥ चि
कित्सकातुरक्रुद्धपुंश्चलीमत्तविद्विषां॥ क्रूरोग्रपतितव्रात्य

दांभिकोच्छिष्टभोजिनां॥ अवीरास्त्रीस्वर्णकारस्त्रीजितग्रा
मयाजिनां॥ शस्त्रविक्रयककर्मारतंतुवायश्ववृत्तिनां॥ नृशं
सराजरजककृतघ्नवधजीविनां॥ चैलधावसुराजीवसहो
पपतिवेश्मनां पिशुनानृतिनोश्चैव तथा चाक्रिकबंदिनां
एषामन्नं न भोक्तव्यं सोमविक्रयिणस्तथेति॥ अस्यार्थः॥ क
दर्योतिलुब्धः॥ बद्धो निगडादिना॥ चौरो ब्राह्मणहेमव्यति
रिक्तपरद्रव्यापहारी॥ क्लीबो नपुंसकः॥ रंगावतारी नटादिः
वेणो वेणुच्छेदजीवी॥ अभिशस्तः पतनीयेन कर्मणाभि
युक्तः॥ वार्धुष्यो निषिद्धवृध्युपजीवी॥ गणिका पण्यस्त्री॥ ॥१३॥
गणदीक्षी बहुयाजकः॥ चिकित्सको भिषग्वृत्त्युपजीवी॥ आ

अ०आ०

तुरो महारोगाभिभूतः॥ पुंश्चली व्यभिचारिणी॥ मत्तो विद्या
दिना गर्वितः॥ विद्विट् शत्रुः॥ क्रूरोभ्यंतराधिककोपः॥ उग्रो रो
गादिनोद्वेजकः॥ पतितो ब्रह्महादिः॥ व्रात्यः पतितसावित्रीकः
॥ दांभिको वंचकः॥ अवीरा स्त्री पतिपुत्ररहिता॥ स्वतंत्रेत्यन्ये
॥ ग्रामयाजी ग्रामनृणां सादिकर्ता॥ कर्मारो लोहकारः॥ तंतुवा
यः सूचीशिल्पोपजीवी॥ श्ववृत्तिः श्वभिर्वृत्तं जीवनमस्या
स्तीति॥ नीचसेवको वा॥ नृशंसो निर्दयः॥ रजको वस्त्ररंगह
र्त्ता॥ चैलधावः वस्त्रनिर्णेजकः॥ सहोपपतिवेश्मा॥ सह सहि
तं उपपतिना जारेण वेश्म यस्यासौ सः तथा॥ पिशुनः परदो
षवक्ता॥ चाक्रिकस्तैलिकः॥ बंदीजनः स्तावकः॥ सोमवि

क्रयीयज्ञे सोमलता विक्रेता ॥ कदर्यत्वादिदोषदुष्टानामेषां
द्विजन्मनां अन्नं न भोक्तव्यमिति सम्ग्रहार्थः ॥ तथा ॥ अग्निहीनः
ससप्यधिकारे श्रौतस्मार्त्ताग्निरहितः ॥ शूद्रस्यान्नं न भोक्त
व्यमिति शूद्रस्या भोज्यान्नत्वे प्राप्ते प्रतिप्रसवमाह ॥ शूद्रेषु
दासगोपालकुलमित्रार्द्धसीरिणः ॥ भोज्यान्ना नापितश्चैव
यश्चात्मानं निवेदयेत् ॥ दासा गर्भदासादयः ॥ अर्द्धसीरोप ५सीरी
लक्षितेह्यविफलार्द्धग्राही ॥ शेषं प्रसिद्धं संग्रहे ॥ गंजनं वा
रनालं च कोद्रवान्नं मसूरिका ॥ कौसुम पात्रं च तैलं च अन्न
वीर्यहराणि षट् ॥ गणान्नं गणिकान्नं च तथान्नं ग्रामया ॥१३२॥
चकात् ॥ सूतकान्नं तथा भुक्त्वा द्विजश्चान्द्रायणं चरेत् ॥ शूद्र

अ०आ०

स्पृष्ट्वा च दृष्ट्वा च तदन्नं तन्निमंत्रणं ॥ प्रेषितान्नं च पक्वान्नं शूद्रा
न्नं षड्विधं स्मृतं ॥ भुंजानेषु तु विप्रेषु प्रमादात्स्रवते गुदं
उच्छिष्टमशुचित्वं च तस्य शौचं कथं भवेत् ॥ पूर्वं कृत्वा तु
तच्छौचं पश्चात्स्नानं समाचरेत् ॥ अहोरात्रोषितः स्नात्वा
पंचगव्येन शुध्यति ॥ बृहस्पराशरे ॥ ब्राह्मणान्नं ददच्छू
द्रः शूद्रान्नं ब्राह्मणो ददत् ॥ द्वावप्येतावभोज्यान्नौ चरे
तां तौ प्राशिवृत्तं विप्रेणामंत्रितो विप्रः शूद्रागृहृतस्तु यो भु
ते ॥ आमंत्रपित्तभोक्तारौ शुध्येतामैंदवेन तु ॥ वार्त्तिक
गंजनं जग्ध्वाड्डहोरात्रोपोषणं [illegible]चि: ॥ गणिकागण
योरन्नं पदन्नं बहुयाजके ॥ सीमंतोन्नयने भुक्त्वा द्विजश्चां

द्रायणंचरेत्॥ भुक्ते शय्यासनस्थोयः पिबेद्वापिद्वि
जोत्तमः॥ अशुच्येताहितत्तुल्यंचरेच्चांद्रायणंव्रतं आ
सनारूढपादः सन्वस्त्रस्यार्धपटेहृतं॥ मुखेनधमि
तं भुक्त्वा द्विजश्चांद्रायणंचरेत्॥ उच्छिष्टवामहस्तेनय
त्किंचित्पिबतेनरः॥ सुरापानेनतत्तुल्यंपीत्वाचांद्राय
णंचरेत्॥ चांद्रायणंनवश्राद्धे पाराकोमासिकेतथा
आब्दिकेपादकृच्छ्रः स्यादेकाहमपराब्दिके॥ स्नानमासे
षुकुर्वीतप्राणायामंजपंतथा॥ उच्छिष्टोच्छिष्टसंस्पृ
ष्टोब्राह्मणस्तुकदाचन। कुर्वीततत्क्षणेस्नानमाचामे ॥१३३॥
न्नविशुध्यति॥ इदंतुक्षत्रियादिस्पृष्टब्राह्मणविषयं॥

अ०आ०

ब्राह्मणस्पर्शेतु॥ उच्छिष्टोब्राह्मणःस्पृष्टउच्छिष्टेवाश्वजन्म
ना॥ आचम्यैवतुशुद्धःस्याद्विष्णुनामानुकीर्तनात्॥ भुक्त्वा
नाचम्यकुर्याद्विविण्मूत्रेकेहनिष्कृतिः॥ नक्तोपवासीस्वो
घेत्तुद्वितीयेद्विगुणंचरेत्॥ आद्येमूत्रे॥ तत्रैव॥ यज्ञोपवी
तेनविनाभोजनंकुरुतेद्विजः॥ अथमूत्रपुरीषेवारेतःसे
वनमेवच॥ त्रिरात्रोपोषितोविप्रःपादकृच्छ्रेणभूमिपः
॥ अहोरात्रोषितोवैश्यःशुद्धिरेषाप्रकीर्तिता॥ विप्रःक्षु
हसनिष्ठीव्यहूत्वायानृतभाषणं॥ वचनंपतितैःकृत्वा
दक्षिणंश्रवणंस्पृशेत्॥ इति पुराणसमुच्चये॥ आज्यपा
त्रेस्थितंतक्रंमधुमिश्रंतुयत्कृतं॥ ताम्रपात्रेस्थितंगव्यंत्रि

धुसर्पिःसुरासमं ॥ पारिजातेभृगुः ॥ गव्यंताम्रेणसंयुक्तं
कांस्येचैवेक्षुगोरसः ॥ सकांस्यंनारिकेलंबुमद्यतुल्यघृ
तंविना ॥ आर्द्रकंसगुडंमद्यंदधिसंमिश्रितोगुडः ॥ नारिके
लंबुसंमिश्रमैक्षवंबदरंतथा ॥ मनुः ॥ ताम्रेगव्यंभूजोम
घंसमंचपरिवेषणे ॥ दोहेपाकेतथाहोमेताम्रेगव्यंनदुष्य
ति ॥ गर्गः ॥ मूलापूपफलेक्षुचादिदंतच्छेदंनभक्षयेत् ॥ ग्रा
सशेषंनचाश्नीयात्पीतशेषंपिबेन्नच ॥ अन्यथाकुरुतेय
स्तुजपेद्देवीन्रातंततः ॥ यद्यन्नंयतिपात्रस्थंयतिनाशेषि
तंचयत् ॥ दंपत्योभुंक्तशेषंचभुक्त्वाचांद्रायणंचरेत् ॥ अ ॥१२४॥
र्कपर्वद्वयेरात्रौचतुर्दश्यष्टमीदिवा ॥ एकादश्यामहोरा

अ०आ०

त्रंभुक्त्वाचांद्रा० ॥ अत्रसर्वत्रचांद्रायणप्रायश्चित्तकथनमभ्या
सविषयं ॥ अनभ्यासेतु अहोरात्रमभोजनं ॥ एषुसर्वेषुजा
तेषुअहोरात्रमभोजनमितिविशेषोक्तेः ॥ ऋग्विधानेतु
पर्वणोरर्कवारेचरात्रौभुंक्तेद्विजोयदि ॥ ससुमंत्रंजपेद्भोक्ता
दशवारंविशुध्यति ॥ अष्टम्यांचचतुर्दश्यांयदिभुंक्तेद्विवा
द्विजः ॥ दशवारंजपेन्मंत्रमभिस्वस्तिमेवच ॥ एकादश्यां
यदाभुंक्तेस्वेच्छयाव्याधिवर्जितः ॥ त्वंसोमासीतिवैसूक्तं
जपेत्पापात्प्रमुच्यते ॥ इदंप्रायश्चित्तमवैष्णवविषयंवैष्ण
वस्यैकादशीभोजनेप्रायश्चित्तविशेषश्रवणादिति ॥ दे
कः ॥ यद्यपत्रकूष्मांडंतरुणीचैवमूलकंबृहतीनयेनिब

हस्पतिना॥ तिथिविशेषे मूलकभक्षणनिषेध उक्तस्त
थापि ब्राह्मणस्य सर्वदा मूलकनिषेध उक्तो वृहस्पतौ
अंतिमाध्याये॥ पितॄणां देवतानां च मूलकं नैव दापये
त्॥ ददन्नरकमाप्नोति भोक्ता च ब्राह्मणस्तथा॥ ब्राह्मणो
मूलकं भक्षंश्चरेच्चांद्रायणं व्रतं॥ अन्यथा नरकं याति पा
तित्यं चैव विंदति॥ वरं भुक्तममेध्यं च पिबेद्वा गर्हितं क्व
चित्॥ वर्जनीयं सदा विप्रैर्मूलकं मदिरासमं॥ पितॄणां
वल्लभाये च अन्ये ते च न मूलकाः॥ स्वयंजाताः पवित्रा
श्च भक्ष्यंति वनवासिनः॥ लोहितं वा सितं वापि मूलकं
मदिरासमं॥ देवानां वल्लभाये स्युरन्ये ते च न मूलकाः ॥१२३५॥

अ०आ०

मूलकं तु नरो भुक्ते दुष्टोद्गारं दिने दिने॥ न तस्य नरकोत्तारो या
वदाभूतसंप्लवमिति॥ उशनाः॥ क्षुरकर्मणि वाते च स्नानमा
त्रेण शुध्यतीति॥ चंद्रिकायां जीवत्पितृकादेर्विशेष उक्तः॥
कनीयान्सपिताचैव च भुक्त्वा श्राद्धिकभोजनं॥ प्राणाग्निहोत्रा
दन्यत्र न सम्मौनं समाचरेदिति॥ भोजनं तु न निःशेषं कुर्या
त्प्राज्ञः कथंचन॥ अन्यत्र दुग्धाक्षीराद्वा घृतात्सक्तुभ्य एव
वा॥ भुक्त्वापीत्वा तु यः कश्चिच्छून्यं पात्रं विमुंचति॥ क्षुधार्त्तः
सपिपासार्त्तो भवेज्जन्मनि जन्मनि॥ देवलः॥ भुक्त्वोच्छिष्टा
न्समादाय सर्वस्मात्किंचिदेव तु॥ उच्छिष्टभागधेयेभ्यः सो
दकं निर्वपेद्भुवि॥ मंत्रस्तु॥ यत्र क्वचन संस्थानां क्षुत्तृष्णो

पहृतात्मनां॥दुर्गतीनांभयादत्तमक्षय्यमुपतिष्ठतुरौरवे॥
पुण्यनिलयेपद्मार्बुदनिवासिनां॥अर्थिनामुदकंदत्तमक्ष
य्यमुपतिष्ठतु॥व्यास॥अर्द्धंपीत्वातुगंडूषमर्द्धंसाज्यंमही
तले रसातलगतानागास्तेनप्रीणन्तिनित्यशः॥यश्चुतिष्ठे
दनाचांतोभुक्त्वाचासनोनाद्द्विजः॥सद्यःस्नानंप्रकुर्वीतना
न्यथाप्रयतोभवेत्॥उपोष्यरजनीमेकांपंचगव्येनशुध्य
ति॥गंडूषकरणात्पूर्वंहस्तंप्रक्षालयेद्द्विजः॥हतंदैवंचापि संय
घात्मान्वैचोपपातकैः॥योवैगंडूषसंभयेत्तर्जन्यावकृणे
घनंकुर्वीतयदिमूढात्मारौरवंनरकंव्रजेत्॥आचम्यच ॥१२६॥
[illegible] ततःकुर्याद्दंतकाष्ठस्यभक्षणं॥भोजनेदंतलग्नानि

अ०आ०

निर्हृत्याचमनंचरेत्॥अर्धपंचतथासप्तत्रीणित्रीणितथैव
च॥आचमेच्चुलकान्प्राज्ञोमुखशुद्धिंयदीच्छति॥गोतमः॥आ
चांतोप्यशुचिस्तावद्यावत्पात्रंनचोद्धरेत्॥उद्धृतेप्यशुचिस्ता
वद्यावद्भूर्नप्रमार्जितेति॥ब्रह्मपुराणे॥भोजनांतेद्विराच
म्यतज्जलैर्नेत्रमार्जनं॥कार्यंचक्षुर्विवृध्यर्थंभार्गवादींश्च
संस्मरेत्॥तदुक्तंभारतेआरण्यकेपर्वणि॥शर्यातिंचसु
कन्यांचभार्गवंचाश्विनौस्मरः॥भोजनांतेस्मरेद्यस्तुतस्य
चक्षुर्ननश्यति आहारपरिणामार्थमन्यास्मरेत्॥अगा
स्त्यंकुंभकर्णंचशनिंचवडवानलं भोक्तस्यपरिणामार्थंस्म
न११म रेद्भीमं[illegible]मार्कंडेयः॥भू[illegible]चेन्यकर्तव्यंमूलस्यंत
ता

भक्षणं॥श्रवणंचेतिहासस्यतथारामायणस्यचेति॥ तांबूल
भक्षणेविशेषमाहगर्गः॥प्रातःकालेफलाधिकंचूर्णा
धिकंचेतुमध्यतः॥निशिपर्णाधिकंखादेत्तस्यलक्ष्मीर्विव
र्द्धते॥ फलंपूगीफलं॥पर्णमूलेभवेद्व्याधिःपर्णाग्रेपापसं
भवः॥चूर्णपर्णंहरेत्आयुःशिराबुद्धिंविनाशयेत्॥तस्मा
देतान्परित्यज्यतांबूलंभक्षयेत्सदा॥अनिधायमुखेपर्णंपू
गंखादतियोनरः॥सप्तजन्मदरिद्रस्यादंतेनैवस्मरेद्धरिं
॥पंचसप्ताष्टपत्राणिदद्याद्दशावापिवा॥दद्यात्स्वयंच
गृह्णीयाद्भक्षणेवीटकस्यतु॥तर्जन्यांचूर्णमादायतांबूलं
नतुभक्षयेत॥यदिवाभक्षयेन्मूढोनरकंप्रतिपद्यते॥म ॥१२७॥

अ०३गा०
२

ध्यमांगुलिनादायचूर्णपर्णंविलेपयेत्॥अंगुष्ठाग्रेणवात
द्वदन्यथादोषमाप्नुयात्॥मृताहेचतथाश्राद्धेमातापित्रो
र्मृतेहनि॥उपवासेचतांबूलंदिवारात्रौविवर्जयेत्॥यति
श्चब्रह्मचारीचविधवाश्चविवर्जयेत्॥तांबूलचर्वणंते
षांतुल्यंगोमांसभक्षणैरिति॥आयुर्वेदे॥भुक्त्वावह्निमु
पस्थाय्यशनानैःसप्तपदीव्रजेत्॥शयीतवामभागेनयत्तो
रोगैर्नपीड्यते॥भुक्त्वोपविशतःस्थौल्यंबलमुत्तानशा
यिनः॥आरोग्यंवामकुक्षौतुमृत्युर्धावतिधावत इति॥
इत्याह्निकेभोजनविधौपंचमभागेहूम॥५॥अथभोज
नानंतरकृत्यमाहदक्षः॥ ॥इतिहासपुराणाभ्यांषष्ठः

एसद्धामकोनयेत्॥ अष्टमेलोकयात्रानुबहिःसंध्यात्त
तःपुनः॥ अहश्चैषसमासीतत्रिष्टेरिष्टेश्चबंधुभिरिति
इसनंतान्हिकचिंद्योषष्टमसप्तमभागाद्र्यं॥ ६॥ ७॥ अ
थसायंसंध्यानिरूप्यते॥ भविष्योत्तरे॥ नोचंद्रत्वायथा
न्यायमर्धास्तमितभास्करे॥ बहिःसंध्यामुपासीतआ
सीनस्त्वथवागृहे॥ शातातपः॥ अनत्तंमघगंधंचदि
वामैथुनमेवच॥ पुनातिवृषलस्यान्नंबहिःसंध्यामु
पासिता॥ यमः॥ रवेरस्तमयासूर्वंघटिकैकायदाभ
वेत्॥ सायंसंध्यामुपास्याथकुर्यांद्धोमंचपूर्ववत्॥ अ ॥१३८॥
यमेवदीपदानसमयः॥ रवेरस्तसमारभ्ययावत्सूर्योद

अ०आ०

योभवेत्॥ यस्यतिष्ठेद्गृहेदीपस्तस्यनास्तिदरिद्रता॥ आयु
र्दःप्राङ्मुखोदीपोधनदस्यादुदङ्मुखः॥ प्रत्यङ्मुखोदुःख
दोसौहानिदोदक्षिणामुखइतिसंग्रहे॥ संध्याध्यानादि
पूर्वमेवोक्तं॥ अथसायंसंध्यांगतर्पणमुच्यते॥ सरस्वत्या पु
वसिष्ठऋषिः॥ विष्णुर्देवताजगतीछंदः॥ सायंसंध्यातर्प
णेविनियोगः॥ ॐ स्वःपुरुषंतर्पयामि॥ सामवेदंत०॥ मंड
लंत०॥ विष्णुरूपिणींत०॥ परमात्मानंत०॥ सरस्वतीत०॥ वे
दमातरंत०॥ सांकृतीत०॥ वृद्धांत०॥ वैष्णवीत०॥ उषसंत०॥
निम्नजीत०॥ सर्वार्थसिद्धिकरींत०॥ सर्वमंत्राधिपतिं
त०॥ ॐ भूर्भुवःस्वःपुरुषंतर्पयामि॥ ततःसूर्योपस्था

नादिकार्यं॥ अत्र विशेषमाह व्यासः॥ जपेद्वारुणमंत्रांस्तु उ
ममेवरुणादिकान्॥ चतुर्मंत्रान्विशेषज्ञः संध्याफलम
वाप्नुयात्॥ गौतमः॥ दर्भहीनातु यासंध्यामानहीनश्च
योजपः॥ जलहीनंतु यद्दानं तत्सर्वं निष्फलं भवेत्॥ जप
मध्ये गुरुर्याति यतिर्वा ब्राह्मणोत्तमः॥ तस्य पूजां समा
प्याध जपशेषं समापयेत्॥ यथाकाले संध्याऽकरणे पा
रिजाते विशेषमाह गौतमः॥ संध्याकाले व्यतिक्रांते स्ना
त्वाचम्य यथाविधि॥ जपेदष्टशतं देवीं ततः संध्यां समा
चरेत्॥ यमस्तु॥ प्राणायामत्रयं प्रातः संगवे द्विगुणं च ॥१३९॥
रेत्॥ मध्याह्ने त्रिगुणं प्रोक्तमपराह्णे चतुर्गुणं॥ सायाह्ने

अ०आ०

पंचगुणकं संध्यातिक्रमणे भवेत्॥ वसिष्ठस्तु॥ कालाति
क्रमणे चैव त्रिसंध्यमपि सर्वदा॥ चतुर्थार्घ्यं प्रकुर्वीत भा
नोर्व्याहृतिसंपुटं॥ सर्वथातिक्रमे जमदग्निः॥ एकाहं चा
प्यतिक्रम्य संध्यावंदनकर्म च॥ अहोरात्रोषितो भूत्वा गा
यत्र्यावायुतं जपेत्॥ द्विरात्रे द्विगुणं प्रोक्तं त्रिरात्रे त्रिगुणं स्मृ
तं॥ त्रिरात्रात्परतश्चेत्स्याच्छूद्र एव न संशयः॥ यः संध्याका
लतः प्राप्तामालस्यादतिवर्तते सूर्यहत्यामवाप्नोति मंदे
हेषु स जायते॥ मंदेहाः राक्षसाः॥ राष्ट्रक्षोभे नृपक्षोभे
रोगार्त्ते भय आगते॥ देवाग्निद्विजवेदानां कार्ये महति
संस्थिते॥ संध्याहानौ न दोषोस्ति यतस्तत्पुण्यसाधन

मिसादि।तथा।द्विवोदितानिकर्माणिप्राग्भुवंस्कृत्तराणिच
द्विवोदितानिहस्तैवविदध्यादुत्तराणितु।अन्योपिविशेषः
प्रातःसंध्याप्रकरणेदृष्टव्यइतिदिक्।ऋग्विधानेतु।प्र
दादीध्येतिमंत्रेणसप्तवारंजपेयदि।अकालेकुर्वतःक
र्मकालेकालेकृतानितु।भवंतीतिशेषः।श्राद्धभोजि
नांतुगार्ग्यः।दत्वाहस्तःपिबेदापोगायत्र्याश्राद्धभुग्द्विजः
ततःसंध्यामुपासीतशुध्यतेतदनंतरं।ततःसंध्यादि
हूभ्वेदितिक्कचिसारः।भारतेतु।जलाभावेमहामार्गे
बंध्यनेत्वशुचावपि।उभयोःसंध्ययोःकालेरजसावा ॥१४०॥
र्घ्यमुक्षिपेत्।तेतथेवमहाराजदंशितारणमूर्धनिसं

अ०आ०

ध्यागतसहस्रांशुमादिसमुपतस्थिरे।अथसायंहोमवि
धानंतस्यकालादिकंपूर्वमेवोक्तं।उपस्थानेविशेषउच्य
ते।जपेदाग्नेयमंत्रांस्तुसायंहोमादनंतरं।स्वयंहोमःप्र
कर्तव्यःपत्न्यापुत्रादिकैरपि।स्वयंहोमस्यनियमोयज्ञनी
येहिकीर्तितो।इदमपियजमानस्यसंनिधाने।देशांतर
गतस्यातेतिज्ञेयं।सदासमस्यहोमंतुकुर्यात्सायंविचक्ष
णः।पथक्कर्तुमशक्तिश्चेद्धताहस्यविसर्जनादित्यादि।गा
लव।भस्मानिधारणंकार्यंबहत्सामेसच्चीदि।ललाटे गः
हृदयेबाह्वोर्यद्वासर्वांगलेपनं।अत्रावसरेरात्रिभोज
नंकार्यं।तद्विधिस्तुपूर्वमेवोक्तः।श्राद्धादिदिनेनिषि

ढुं भोजनं श्राद्धाहे पर्वकाले चरविवारे तथैव च ॥ रात्रिर्भुक्तिर्न
कर्त्तव्या सर्वदा द्विजसत्तमैरिति स्मृतेः ॥ इत्यनंताह्निके
अष्टमभागकृत्यं ॥ अथ शयनविधानं तत्र याज्ञवल्क्यः
उ॥ स्यपश्चिमां संध्यां कृत्वाग्निंस्तनुपास्य च ॥ भृत्यैः परि
वृतो भुक्त्वा नातितृप्याथ संविशेत् ॥ संविशे स्वपेत् ॥ वका
रेण वैश्वदेवादिकं समुच्चिनोति ॥ अत्र च पाकोत्तरमुक्तं
विष्णुपुराणे ॥ पुनः पाकमुपादाय सायमप्यवनीपते ॥ वै
श्वदेवनिमित्तं वै पत्न्या सायं बलिं हरेत् ॥ पत्न्या च स्त्रीभि
र्भर्तृवचः कार्यमेष धर्मः परः स्त्रियाः इति स्मृतेराज्ञाकारि ॥१४१॥
ण्याऽदुष्टया भवितव्यं ॥ यदि भर्तुराज्ञां न संपादयति तदा धि

अ०आ०

चेतव्या ॥ तदुक्तं याज्ञवल्क्येन ॥ सुरापी व्याधिता धूर्त्ता वंध्यार्थघ्नी
प्रियंवदा ॥ स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषणी तथेति ॥ अत्रा
वधिमाह मनुः ॥ वंध्याष्टमेऽधिवेत्तव्याब्दे नवमे तु मृत
प्रजा एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनीति ॥ व्यासः
शुचौ देशे विविक्ते तु गोमयेनोपलेपिते ॥ प्रागुदक्प्रवणे
चैव संविशेत्तु सदा बुधः ॥ संग्रहे ॥ जलं देवगृहं चैव शयनं
वृद्धिआलयं ॥ निर्णिक्तपादः प्रविशेत् निर्णिक्तः कथं च
न ॥ भविष्ये ॥ उपानहौ वेणुदंडमंबुपात्रं तथैव च तांबूला
दीनि सर्वाणि समीपे स्थापयेद्गृही ॥ यानि कानि च पुष्पा
णि यत्किंचिदनुलेपनं ॥ अलक्ष्मीपरिहारार्थं नित्यं कुर्यु

धिष्ठिर। मांगल्यंपूर्णकुंभंतु शिरस्थाने निधापयेत्। वैदि
कैर्गारुडैर्मंत्रैः रक्षांकृत्वा स्वपेत्ततः। गरुडमंत्रः। हारीतेन प्र
दर्शिताः॥ नर्मदायै नमः प्रातर्नर्मदायै नमो निशि। नमो
स्तु नर्मदे तुभ्यं त्राहि मां विषसर्पतः॥ सर्पापसर्प भद्रं ते दू
रं गच्छ महाविष। जन्मेजयस्य यज्ञांते आस्तीकवचनं स्म
र। आस्तीकवचनं स्मृत्वा यः सर्पो न निवर्तते। शतधा
भिद्यते मूर्ध्नि शिंशावृक्षफलं यथा॥ शून्यालये श्मशा
ने च एकवृक्षे चतुष्पथे। महादेवगृहे वापि मृतवेश्मनि
न स्वपेत्। पराशरः। प्राच्यां दिशि शिरः शस्तं याम्या ॥१४२॥
यामथ वा नृप। सदैव स्वपतः पुंसो विपरीतं तु रोगदं॥ स

उ०आ०

ग्रहे तु स्वगृहे प्राक्शिरः कुर्याच्छ्वसुरे दक्षिणामुखः। प्रत्यङ्मुखः
प्रवासे च न कदाचिदुदङ्मुखः॥ माता वा भगिनी वापि तथा चान्य
स्त्रियोपि वा। एतासां सन्निधौ चैव न स्वपेत्तु कदाचन। इंद्रियाणि
प्रमाथीनि हरंति प्रसभं मनः। स्मृत्यंतरे। निद्रासमयमासाद्य
तांबूलं वदने नासजेत्। शिरसः पुष्पमालां च भार्यां चैव शयना
सजेत्॥ प्रज्ञा हरति तांबूलं आयुर्हरति पुंड्रकं। सर्पाद्भयं च पु
ष्पेभ्यः प्रमदा बलनाशिनीति। रतिरहस्ये पर्यंकसुविशा
ले च अभग्ने पुष्पमंडिते। आस्तृते शयनं कुर्यान्न खट्वायां
कदाचन। दीपे जाज्वल्यमाने तु स्त्रिया संगं समाचरेत्॥ दी
गं पे नष्टे तु यः संकरोति मनुजो यदि। सप्तजन्म दरिद्रत्वं लभ

त्तेनात्रसंशयः॥दीर्घशय्यासनछायाकार्पासाद्दंतधावनं
॥अजारजः ससंस्पर्शः शक्रस्यापि श्रियंहरेत्॥ संग्रहेपिः
अजारजः खररजस्तथासंमार्जनीरजः॥दीपमंचकयो
श्छायाशक्रस्यापि०॥अन्यस्यपर्यंकेनस्वपेत्॥आत्मनश्श
य्यासनंवस्त्रजायापत्यंकमंडलुं॥आत्मनःशुचिरेतानि
परेषामशुचिर्भवेत्॥पादौप्रक्षालयेत्पूर्वंपश्चात्स्वापंस
माचरेत्॥अनार्द्रहस्तचरणोदीर्घमायुरवाप्नुयात्॥माहे
त्रविशेषोक्तः रात्रिसूक्तंजपेत्सम्यग्देवांश्चसुखशायि
नः॥नमस्कृत्वाव्ययंविष्णुंसमाधिस्थःस्वपेन्निशि॥रात्रि
सूक्तंशतपथब्राह्मणेभिहितं॥चित्रावसोःस्वस्तितेति

त्रिरेतज्जपन्तिरात्रिर्वैचित्रावसुरित्यादि॥ऋग्वेदेपिरात्रीव्यख्य
त्॥इत्यादि॥सुखशायिनस्तु॥अगस्तिर्माधवश्चैवमुचुकुंदोम
हामुनिः॥कपिलोमुनिरास्तीकःपंचैतेसुखशायिनइति गो
भिलोक्ताः॥दृष्टः॥प्रदोषपश्चिमौयामौवेदाभ्यासेनतौन
येत्॥यामद्वयंशयानस्तुब्रह्मभूयायकल्पतेति॥अत्रप्रदो
षशब्दोरात्रेःप्रथमयामवाचकः॥स्मृत्यर्थसारोक्तेः॥ ॥
अथस्त्र्यभिगमनविधिः॥तत्रयस्मात्तस्मात्स्त्रियःसेव्या
इतियाज्ञवल्क्यस्मरणात्पुत्रोत्पत्त्यर्थंस्त्रियःसेव्याः॥तद्वि
शेषमाहसएव॥षोडशर्तुनिशाःस्त्रीणांतासुयुग्मासु
संविशेत्॥ब्रह्मचार्येवपर्वाण्याद्याश्चतस्रस्तुवर्जयेत्॥र

मो दर्शनमारभ्य षोडशरात्रयो ऋतुर्गर्भाधानयोग्यः का
लः ॥ तत्र स्त्रियं गच्छन् ब्रह्मचार्य्येव ॥ तत्राप्याद्याश्चतस्रो
रात्रीः पर्वाणि च वर्जयित्वेत्यस्यार्थः ॥ पर्वकालमाह गर्गः
चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा ॥ चत्वार्येतानि
पुण्यानि मनुः स्वायंभुवोऽब्रवीत् ॥ मनुस्तु ॥ तासामाद्याश्च
तस्रस्तु निंदितैकादशी तथा ॥ त्रयोदशीच शेषास्तु ॥ प्रश
स्ता दशरात्रय इति ॥ याज्ञवल्क्यः ॥ एवं गच्छन् स्त्रियं क्षामां
मघां मूलं च वर्जयेत् ॥ सुस्थ इंदौ सकृत्पुत्रं लक्षण्यं जनये
त्पुमान् ॥ सकृदित्युक्तेरेकस्यां रात्रावेकवारमेव गमनमि
ति नियम्यते ॥ क्षामामिति विशेषणं पुमान्पुंसोऽधिके शु ॥१२४॥

अ०आ०

क्रे स्त्री भवत्यधिके स्त्रिया इत्यादिवचनाच्छोणिताधिक्ये पुरुषा
कारास्त्र्येव भवतीति हेतोरल्पभोजनादिना स्त्रियाः क्षामत्वं
संपाद्यमित्यर्थः ॥ पुंसः शुक्राधिके पुमान् ॥ शुक्रशोणितयोः
समत्वेन पुंसकं ॥ द्विधा बीजोत्सर्गे युगलमित्येतदर्थं चेति ज्ञेयं
अत्र तु संविशेदित्यस्य नियमविधित्वेपि ॥ ऋतुस्नातां तु यो भा
र्यां सन्निधौ नोपगच्छति ॥ घोरायां भ्रूणहत्यायां युज्यते नात्र
संशयः ॥ तथा ॥ ऋतुस्नातां तु यो भार्यां स्वस्थः सन्नोपगच्छ
ति ॥ घोरायामित्यादि पूर्ववत् ॥ अत्र सन्निधौ स्वस्थ इत्यादि
विशेषणात्समर्थः सन्निहितः सन् यदि ऋतौ नोपगच्छति
तदा दोषो न त्वसन्निधानादिति ज्ञेयं ॥ अजातपुत्रस्यैवायम्

तुगमननियम इति मदनपारिजातहृत् ॥ ऋतौ स्त्री विषयेय
मोपि ॥ ऋतुस्नाता तु या नारी भर्त्तारं नोपगछति ॥ सां ग्राम
मध्ये विख्याप्य भ्रूणघ्नीं च विवासयेदिति ॥ अनृतावपि
स्त्रीकामनायां प्रतिषिद्धवर्ज्यमुपेयादेव सर्वत्र प्रतिषि
द्धवर्ज्यमिति गौतमोक्तेः ॥ यथाकामी भवेद्वापि स्त्रीणां वर
नुस्मरंन्निति याज्ञवल्क्योक्तेः ॥ यथाकामी वा काममावि
जनितोः संभवामेति वचनादिति कात्यायनोक्तेश्च ॥ ऋतौ
गछेदिति नियमस्यैवं नियमांतरमिदमिति वाञ्छार्थः
अत्र ऋतुस्नातां स्त्रियं गछेन्नातुरां नरजस्वलां ॥ नातिबा ॥१३५॥
लानकुपितां नाप्रशस्तां न गर्भिणीमित्यादि विशेषो द्रष्ट

अ०आ०

व्यः ॥ गर्भिण्यां विशेषमाहाश्वलायनः ॥ वपनं मैथुनं तीर्थं वर्ज्ज
येद्गर्भिणीपतिः ॥ श्राद्धं च सप्तमान्मासादूर्ध्वं चान्यत्र वेदविदि
ति ॥ अत्रान्यो विशेषः प्रथमस्तबके गर्भाधानप्रकरे द्रष्टव्यः
॥ अत्र गर्भाधानप्रसंगाद्दश चत्वारिंशत् संस्काराल्लिख्यंते
गर्भाधानमथो हि पुंसवनकं सीमंतजातक्रियानामान्ना
दनचौलकोपनयनं वेदव्रतान्यप्लुतं ॥ चत्वारि स्नपनं विवा
हकरणं पंचापि यज्ञा अथो संस्थाः सप्त च सप्त सप्त गदि
ताश्चत्वारिंशद्दशाप्यत्र तु ॥ ४० ॥ एवं चानशनेन नवेदपठनं क
र्णे जपः स्वाम्यमिति प्राणोत्क्रांतिरथोर्ध्वदैहिकमतः संव्यूहनं
भस्मनः ॥ अस्थ्नां संचयनं ततः परमपि श्राद्धानि सापिंड

कंचत्वारिंशादितिस्मृतौनिगदिताः संस्कारकाश्चषट्चेतीति
मामकौसंग्रहश्लोकौ ॥ एकविंशतिसंस्थास्तु ॥ अष्टकापा
र्वणश्राद्धंश्रावण्याग्रहायणी प्रौष्ठपदी चैत्र्याश्वयुजीतिस
प्तपाकसंस्थाः ॥ अग्न्याधेयाग्निहोत्रदर्शपूर्णिमासाग्रय
णचातुर्मास्यनिरूढपशुबंधसौत्रामणीतिसप्तहविर्य
ज्ञसंस्थाः ॥ अग्निष्टोमात्यग्निष्टोमोक्थ्यषोडशीवाजपेया
तिरात्राप्तोर्यामेतिसप्तसोमसंस्थाः ॥ यमः ॥ अष्टाचत्वा
रिंशदेते संस्कारा विहिता द्विजे ॥ यएतैः संस्कृतोनिब्रोब्र
ह्मलोकंसगच्छतीति ॥ मनुः ॥ वैदिकैः कर्मभिः पुण्यैर्निषे
कादिर्द्विजन्मनां ॥ कार्यः शरीरसंस्कारः पावनः प्रेत्यचेह ॥१४६॥

अ०३पा०

चेति ॥ एतेषु कृतिपयसंस्कारामंत्रवर्ज्यं शूद्रस्यापि यथायोग्यं
भवंति ॥ श्रौतंद्विजातयः कुर्युः स्मार्तं शूद्रः समाचरेत् इति
पाद्मोक्तेः ॥ प्रहूतमनुस्मरामः ॥ द्वावेतावशुचीस्यातांदंपती
शयनंगतौ शयनादुत्थितानारी शुचिः स्यादशुचिः पुमा
निसापस्तंबोक्ताशुचित्वनिरासार्थं ॥ एकालिंगेकरेसव्येति
स्रोद्वहस्तयोर्द्वयोः ॥ मूत्रशौचंसमाख्यातं शुक्रे तु द्विगु
णं भवेदिति शातातपोक्तं शौचंकर्तव्यं ॥ इदमृतुकालवि
षयं ॥ दुःस्वप्नेमैथुनेवांते विरेके क्षुरकर्मणि ॥ चितियूपश्म
शानास्थांस्पर्शे नेस्नानमाचरेदिति पराशरोक्तं स्नानंका
र्यमृतुकालगमने ॥ क्वचिदन्तावपि स्नानमाह स्मृतिः ॥ अ

ष्टम्यांचचतुर्द्दश्यांदिवापर्वणिमैथुनं॥कृत्वासचैलंस्नात्वा
तुवारुणीभिश्चमार्जयेदित्यादि॥शयनसमयेदुःस्वप्नद
र्शनेजपमाहगर्गः॥रामंस्कंदंहनूमंतंवैनतेयंवृकोदरं॥श
यनेयःस्मरेन्नित्यंदुःस्वप्नंतस्यनश्यति॥इत्यनंतान्हिकेश
यनविधानं॥अथयमादिकमुच्यते॥॥ऋणानित्रीण्यपा
कृत्यमनोमोक्षेनिवेशयेत्॥अनपाकृत्यतान्येवमोक्षमिच्छ
न्व्रजत्यधइतिमनूक्तेर्मुक्तिप्राप्तयेआत्मोपासनंकुर्या
त्॥स्कांदे॥यमैश्चनियमैश्चैवआसनैःप्राणसंयमैः॥प्र
त्याहारेणध्यानेनधारणाभिःसमाधिना॥अष्टांगेनप्रयो ॥९७॥
गेणउपास्यात्माविमुच्यते॥ज्ञानेनैसर्वहेतानिनित्यसकःसा

उ०आ०

तिकुर्वतः॥निवृत्तफलसंगस्यमुक्तिस्तस्यकरेस्थिता॥अ
हिंसासत्यमस्तेयंब्रह्मचर्यंक्षमाधृतिः॥दयार्जवंमिताहा
रःशौचंचेतियमादश॥शौचमिज्यातपःससंस्वाध्यायोप
स्थनिग्रहः॥व्रतोपवासमौनंचस्नानंचनियमादशेतिव्या
सोक्तायमादयः॥जान्वोरंतरेसम्यक्कृत्वापादतलेउभे
ऋजुकायःसुखासीनःस्वस्तिकंतत्प्रचक्षतइत्याद्यासनं
प्राणायामःप्रागुक्तः॥इंद्रियाणांविचरतांविषयेषुस्वभा
वतः॥बलादाहरणंतेषांप्रत्याहारःसउच्यतइतिप्रत्याहार
उक्तः॥ध्यानंतु॥ध्यानमात्मस्वरूपस्यवेदनंमनसाभवे
त्॥तदेवद्विगुणंप्रोक्तंसगुणंनिर्गुणंतथा॥भ्रुवोरुपरि

मनःकृत्वाहृन्मध्येचिंतयेच्छिवं॥पंचवक्त्रंदशभुजंत्रिनेत्रं
स्मितसुंदरं॥कर्पूरगौरंचंद्रार्द्धशेखरंसुविभूषितं॥नील
ग्रीवंनागहारंव्याघ्रचर्मांबरंविभुं॥कमंडल्वक्षसूत्रादिपा
शशूलधरंहरं॥इत्यादिसगुणं॥निर्गुणंतु॥अहमेवपरं
ब्रह्मपरमात्माहमव्ययः॥एवंतद्धृदनात्तब्रनिर्गुणंध्यान
मुच्यतइति॥निर्गुणोपासनात्तुज्ञानिनएव॥कामक्रोधा
दियुक्तस्यविषयासक्तचेतसः॥अहंब्रह्मेतियत्ज्ञानमा
त्मनाशस्यकारणमितिब्रह्मवैवर्त्तोक्तेः॥धारणातु॥यमा
दिगुणयुक्तस्यमनसस्थितिरात्मनि॥धारणाप्रोच्यतेस ॥१४८॥
द्भिर्योगशास्त्रार्थवेदिभिरिति॥समाधिस्तु॥समाधिःस

अ०आ०

मतातावज्जीवात्मपरमात्मनोः॥परमात्मनिस्थितिःप्रोक्तःस
माधिःप्रसगात्मनइति॥॥इत्यनंतान्हिकेयमादिलक्षणवि
धानं॥ ॥अथरुद्रजपविधानं॥ ॥सर्वेष्वेवहिधर्मेषुरु
द्राध्यायजपःपरः॥रुद्राध्यायीविमुच्येतजन्मसंसारसागरा
त् लिंगार्चनंरुद्रजपस्तथान्निावत्तिथित्रयं॥वाराणस्यांचम
रणंमुक्तिरेषाचतुर्विधा॥रुद्रजापीशिवःसाक्षाद्रुद्रएवनसं
शयः॥तस्मात्सर्वंपरित्यज्यरुद्रजापीभवेत्सदा॥ब्रह्मचारी
गृहस्थश्चवानप्रस्थोयतिस्तथा॥रुद्रजाप्येनपरमांगतिं
गच्छतिनान्यथा॥रोगाद्युपशमार्थायपरमाभ्युदयाप्तये॥म
नोरथफलप्राप्त्योरुद्रजापीभवेन्नरइतिस्कांदे॥जाबालोप

निषदि॥ यःशतरुद्रियमधीतेसोग्निपूतोभवतिब्रह्महत्या
त्पूतोभवतीति॥ तत्रैव॥ किंजप्येनामृतत्वंब्रूहीतिशतरु
द्रियेणेति॥ शतरुद्रियंचरुद्राध्यायएव॥ चरमायामिष्टि
कायांशतरुद्रियंजुहोतीत्यादिब्राह्मणवाक्येतस्यैवविनि
योगात्॥ शतपथब्राह्मणेपि॥ अथातःशतरुद्रियंजुहोती
त्ययनेतस्यैवविनियोगाच्च॥ रुद्राध्यायस्तुसाक्षाद्भगवद्वाच
कः॥ अमृतस्यैवनामधेयान्येतानीतिजाबालोपनिषदुक्तेः
यावज्जीवश्रवणमथवावर्तयेद्रौद्रियंवायाजुर्वेद्यमितिया
वज्जीवंतज्जपविधानादवरूपंजपादिकार्यं॥ मदनमहार्ण
वेपि॥ यद्यपिचरमेष्टिकायांएकादशगभीरुद्रानुवाकेहोमो ॥१५९॥

अ० आ०

विहितस्तथापिरुद्राध्यायीमुच्यतेसर्वपापैरिति॥ तथारुद्राणांज
पहोमार्चनविधिंव्याख्यास्यामइतिबौधायनादिवाक्येजपहोमा
र्चनादिकर्मण्यविनियोगाद्रुद्राध्यायस्यजपादिषंगत्वमस्तीति
शिवगीतायांच॥ यस्तुरुद्रंजपेन्नित्यंध्यायमानोममाकृतिं॥ ष
डक्षरंवाप्रणवंनिष्कामोविजितेंद्रियः॥ सचतेनैवदेहेनशिवः
संजायतेध्रुवमिति॥ याज्ञवल्क्योपि॥ सुरापःस्वर्णहारीचरुद्र
जापीजलेस्थितः॥ सहस्रशीर्षापीचमुच्यतेसर्वकिल्बिषैरि जी
ति॥ अंगिराः॥ नमकंचमकंचैवपुरुषसूक्तंतथैवच॥ नित्यंत्र
यंप्रयुंजानोब्रह्मलोकेमहीयते॥ रुद्राध्यायीवसेद्यत्रग्रामे
वानगरेपिवा॥ नतत्रक्षुत्पिपासाद्यादुर्भिक्षंव्याधयोपिवा॥ ब्र

श्राघास्तु सुराः सर्वे साध्याश्चैव विशेषतः ॥ सततं हि समायां
तिवीक्षितुं रुद्रजापिनं ॥ वायुपुराणे ॥ अनपत्यादिदोषेषु शा
किन्यादिग्रहेषु च ॥ सर्वज्वरविनाशार्थं रुद्रजाप्यो न संशयः
स्पृष्ट्वाश्च बहुं जपेद्यस्तु रुद्रैकादशिनीं शुचिः ॥ सांगमादौ जपे
द्रुद्रं केवलानि वै च तु ॥ सांगं सशीर्षकं चांते निरंगमिति केचन ॥
तथा संतानगोपालविद्यां चैव जपेन्नरः ॥ अनपत्यत्वनाशा
र्थं स्वस्य स्वलाभार्थसिद्धये ॥ सर्ववर्णैश्च कर्तव्यो रुद्रजापः प्र
यत्नत इति ॥ बहुसारासारे ॥ रुद्राः पंचविधाः प्रोक्ता देशिकै
रुत्तरोत्तरं ॥ सांगस्त्वाद्यो रूपकाख्यः प्रथमो रुद्र उच्यते ॥ ए
कादशगुणैस्तद्वद्रुद्रीसंज्ञो द्वितीयकः ॥ एकादशाभिरेता ॥१५०॥

अ०आ०

भिस्तृतीयो लघुरुद्रकः ॥ लघ्वेकादशाभिः प्रोक्तो महारुद्रश्च
तुर्थकः ॥ पंचमः स्यान्महारुद्रैरेकादशभिरंतिमः ॥ अतिरुद्रः स
माख्यातः सर्वेभ्योऽप्युत्तमोत्तम इति ॥ अंगान्युक्तानि जाबालेन
शिवसंकल्पकं हृद पसूक्तं स्याच्छिरो मंशिरः ॥ प्राकुनीरायणं दै
वा शिखां तस्योत्तराभिधं ॥ आशुः शिशानः कवचं नेत्रं विभ्राड्बृ
हत्स्मृतं ॥ शतरुद्रियमस्त्रं स्यात्सषडंगाक्रम ईरितः ॥ पूर्वमंगानि
संजप्य रुद्राध्यायं ततो जपेत् ॥ तदंते सप्त मंत्रांश्च वयं सोमं म
हश्छिरः ॥ उग्रश्चेति यजुर्मंत्रं जपमाकुर्जपेदिति ॥ अत्र शतरु
द्रियं नाम त्वमग्ने रुद्रो असुर इत्यादि वयं स्याम पतयो रयीणा
मित्यंतं मंत्रजातमिति महार्णवकारः ॥ वाजसनेयिनां तु षोड
शर्चो रुद्रप्रथमानुवाकः शतरुद्रियं ॥ शिवसंकल्पमिसाधनु

वाकपाठसामानाधिकरण्यात्॥शातरुद्रियत्वधर्मस्यवेद
त्वादिवद्याप्पवृत्तित्वाच्छिष्टसमाचाराच्च॥अत्रनेत्रजपादि
र्वाजसनेयिविषयः॥आपस्तंबादीनामनुक्तत्वात्॥चमकपा
ठप्रकारमाहबोधायनः॥नमस्तेरुद्रमन्यवइत्याद्येकादशा
नुवाकानामंतेएकमेकंचमकानुवाकंपठेद्यावदेकादशावृ
त्तीति॥अयंप्रकारस्तैत्तिरीयाणामेव॥वाजसनेयिनांतुचम
काध्यायोनवानुवाकइतित्वाद्यथासंख्याभावात्॥अतस्तैः
एकादशवाररुद्राध्यायंजपित्वांतेचमकाध्यायःपठनीयइ
तिगम्यते॥यद्वा॥शाखांतराधिकरणन्यायेनतेषामपियथा
संख्यासंभवःसंपादनीयः॥तद्यथा॥आद्याअष्टावनुवाकाः ॥१५१॥
नवमेनुवाकेअथनामयाहजुहोतिवाजायस्वाहेतिसुपक्र

अ०आ०

म्यप्रजानांत्वाधिपत्यायेतिशतपथेमंत्रद्वयस्यैकहोमांगत्वमु
क्तं॥तथा॥अथकल्यांजुहोत्यायुर्यज्ञेनेत्यस्यमंत्रस्यमंत्रस्यद्विती
यहोमांगत्वमुक्तं॥तथा॥अथाह॥स्तोमश्चयजुश्चेतिमंत्रस्यतृती
यहोमांगत्वमुक्तं॥तेनैवंज्ञायतेअंत्यानुवाकेत्रयोविभागाइति
येवंयथासंभवेति॥यद्वाअंत्यानुवाकस्त्रिरावर्त्तनीयः॥अत्रन्या
सादिकमथातःपंचांगरुद्राणांन्यासपूर्वकमित्यापस्तंबाद्यु
क्तमनुसंधेयं॥ग्रंथगौरवभीत्यानलिखितं॥एवमुक्तप्रकारेण
यथाभिलषितंरुद्रजपंकृत्वाहोमःकार्यइत्युक्तं॥शातातपेन
एवंरुद्रजपंकृत्वापश्चाद्धोमंसमाचरेत्॥तिलैःसबिल्वपत्रैश्च
दशांशेनहोमइष्यते॥तत्रमंत्रविभागोबहुधादृश्यते॥तैत्तिरी
येतत्रत्रेधाविभक्तंजुहोतित्रयइमेलोकाइतित्रेधाविभागउ

क्तः॥ तथा॥ तत्र उत्तरा आहुतीर्जुहोति षंपर्यंत इति बोढाविभा
गेऽपि वाजसनेयकेपि॥ सर्वेजानुदध्ये प्रथमे स्वाहाकारोस्य थना
भिदध्येऽथमुखदध्न इति॥ अस्मिन्पक्षे मंत्रविभागप्रकारस्तु॥ न
मस्ते रुद्र मन्यव इत्सारभ्य सभाभ्यः सभापतिभ्यश्च वो नम इत्यंत
एको मंत्रः॥ सवा आन्नीसांच स्वाहाकरोति प्रथमे चानुवाक इति
श्रुते॥ तथा॥ नमो श्वभ्य इत्सारभ्याचार्याय चेत्यंतो द्वितीयो मंत्रः
तथा॥ नमः प्रत्तरणाय चेत्सारभ्य जंभेदभ्य इत्यंतस्तृतीयो मंत्रः
अत्रा विच्छिन्नानामनुवाकानां मंत्रत्वं ज्ञेयं॥ एवं शतंदाक्षिण
त्तिवत्॥ यद्वा प्रत्यनुवाकत्रयमेकैको मंत्रः॥ तथा बोढापक्षेपि
त्रिसूत्त्व: प्रसवरोहतीस्कन्ना त्रिरितउर्ध्वा रोहति तत्प्रहृत
स्योक्तो बंधुरिति शतपथे उक्तः॥ अत्र पक्षे पूर्वोक्तास्त्रयो मं ॥१५२॥

उत्र०उग्रा०

त्राः नमोस्तु रुद्रेभ्यो ये दिवीत्यादि प्रत्यवरोहसंज्ञकास्त्रयो मंत्राः इत्ये
वं षट् भवंति॥ तैत्तिरीयाणां प्रकारस्तु महार्णवादौ ज्ञेयः॥ तथा बो
उक्ताधापक्षेपि बोधायनोक्तः॥ नमस्ते रुद्र मन्यव इत्येताननुवा
कांस्त्रेधा विभज्यापि॥ प्राप्रथमादुपक्रम्यानुवाकत्रयमेको मं
त्रः॥ चतुर्थमारभ्य षष्ठांतो द्वितीयः॥ सप्तममारभ्याऽवतन्वा
धिस्तृतीयः॥ ततो दन्नणवतानादशा मंत्राः॥ प्रसवरोहणित्री
णीत्येवं षोडश भवंतीति॥ तथा सप्तदशधापक्षेपि॥ तत्र प्रथ
मानुवाक एको मंत्रः॥ तदुत्तरमनुवाकद्वयं द्वितीयः॥ शेषं पू
र्ववत्॥ अथाष्टचत्वारिंशत्पक्षो बोधायनोक्तः॥ यथा॥ प्रथ
मानुवाके षोडश मंत्राः द्वितीयतृतीयचतुर्थपंचमानुवाका

२

श्चत्वारोमंत्राः॥ततःषष्ठानुवाकेनमःस्रुत्यायेत्यारभ्यनमो
वृक्षेभ्योहरिकेशेभ्यइत्यंतोएकोमंत्रः॥ततोनमस्तारायेत्ये
तावानेकोमंत्रः॥ततोनमःशंभवायचेत्यादिशिवतरायचे
त्यंतएकोमंत्रः॥ततोनमःपार्यायेत्यारभ्यधनु[illegible]भ्यश्चवोन ष्कृ
मइतिएकोमंत्रः॥ततोनमोवःकिरिकेभ्योदेवानांहृदयेभ्यः
इत्यादिचत्वारोमंत्राः॥अत्रदेवानांहृदयेभ्यइत्यस्यविच्छोभ
णस्योत्तरेषुयजुःष्वनुषंगःकर्त्तव्यः॥ततोद्रापेअंधसस्प
त्यारभ्यय्ऽएतावंतश्चेत्यंतासप्तदशमंत्राः॥ततोअस्यवरो
हाणित्रीणियजूंषीत्येवमष्टाचत्वारिंशन्मंत्रविभागोज्ञे ॥१५२॥
यः॥अथषष्ठ्युत्तरशतात्मकोविभागःप्रदर्श्यतेतत्रप्रथमा

अ०आ०
नुवाकेषोडश॥१६॥ततोनमोहिरण्यबाहवेइत्यारभ्यनमःश्वभ्यः
श्वपतिभ्यश्चवोनमइत्यंताउभयतोनमस्काराःपंचचत्वारिंश
त्॥४५॥ततोनमोभवायचरुद्रायचेत्यारभ्यआनिर्हतेभ्यइत्यंता
अन्यतरतोनमस्कारानवसप्ततिः॥७९॥ततोद्रापेइत्यादिःपू
र्ववद्विंशति॥२०॥रित्ययंप्रतिमंत्रविभागः॥एवंषष्टिश्चहवैत्री
णिचशतान्यथत्रिंशदथपंचत्रिंशदित्यादिशतपथश्रुति
प्रमाणकाःसपादचतुःशतान्नीसाधिकशतद्वयादिपक्षाअ
प्यवगंतव्याः॥तेचास्माभिःशतरुद्रियाध्यायभाष्येप्रपंचि
ताः॥ग्रंथगौरवादिहनोक्ताः॥एतेत्रेधाविभागादिपक्षाःश
क्तिफलतारतम्येनयोज्याः॥ग्रहाणांग्रहपावत्॥तैत्तिरीया

णंप्रतिमंत्रविभागेएकोनसप्तसुत्तरशतविभागः॥ प्रसिद्धए
षेष्ठुपरम्यते॥ एभिः प्रकारैर्यदिहोममेवचिकीर्षतितदाहोमए
वप्रधानभूतः कर्तव्यः॥ जपाद्यंगत्वेनहोमंचिकीर्षाचेत्तर्हिद
शांशशतांशादिभेदेनहोमःकार्यः॥ तत्रत्रेधाविभागपक्ष
माश्रित्यएकादशावसात्मकजपरुद्रहोमेतिस्रआहुतयो
भवंति॥ चमकाध्यायनांतेवसोर्द्धाराकार्या॥ संपूर्णहोम
पक्षेतुप्रतिरूपकंतिस्रस्तिस्रआहुतयइतिमीलितास्त्रया
स्त्रिंशत्॥ प्रतिरूपकंचमकानुवाकानामेकादशाहुतीः॥ अ
यंचमकहोमोहोमद्रव्येणैव॥ वसोर्धारात्वाज्येनैवांतेसर्व
त्रचमकाध्यायेनकार्या॥ वसोर्धारायाज्येनोदुंबर्यास्रुचे

दा·

॥१५४॥

अ०आ०

त्यादिश्रुतेः॥ एवंबोधाविभागादिपक्षेप्याहुतिसंख्याज्ञेया॥ ग्रंथ
गौरवभयान्नोच्यते॥ शतांशपक्षस्तुलघुरुद्रएव॥ तत्रैवसं
भवात्॥ तथाहि॥ लघुरुद्रेएकविंशत्युत्तरशतंरूपकाभवं
ति तेनशतांशाहोमपक्षःसंभवति॥ तत्रशतरूपाणामेक
रूपहोमः॥ तत्रापित्रेधादिपक्षाःसंयोज्याः॥ अवशिष्टेकवि
शतिरूपाणामर्थेनमस्तेरुद्रेणमंत्रेणैकाहुतिः॥ एवंमहा
रुद्रादौयोज्यं॥ अन्येतुयथाभिलषितरुद्रजपानंतरंनमःशं
भवायचेतिमूलमंत्रेणैवहोममिच्छंति॥ तदाहबौधायनः॥ मू
लमंत्रेणवाहोमंकुर्यादिति॥ नमस्कारस्तु॥ हेमाद्रौमूलागमे
भिहितः॥ ततोहोमंप्रकुर्वीतनमःशंभवेमंत्रतः॥ रुद्रैकाद

ति

शीतीलाप्येत्रयस्त्रिंशत्तथाकृतिः॥ रुद्रे शतत्रयं प्रोक्तं षष्ट्या
न्यधिकयाधिकं॥ रुद्रे लघुरुद्रे इत्यर्थः॥ चत्वारश्च महारुद्रे
१ साहस्त्रीसमर्जिताः॥ चत्वारिंशत्सहस्त्राश्च कर्तव्याश्चतु
सम्प रुत्तराः॥ ऊनाश्च सप्तशैला वतिरुद्रे इति स्थितिरिति मूल
मंत्रन्यासादिकं अथ मस्तके रुद्रस्नानविधाने दृष्टव्यं
अथापरश्चतुःषष्टिविभागः॥ स च हेमाद्रौ शांतिकांडे रुद्र
स्नानेभिहितः॥ अवरुद्धत्वाद्धोमेपि भवति॥ तथाह॥ सुखास
नोपविष्टांतामाचार्यो रुद्रजापकः॥ अभिषिंचेत्ततश्चैनाम
र्कपत्रपुटांबुना॥ अच्छिद्रां प्लाव्यमानां तिरस्तानार्थनात्सुपा ॥१५५॥
हरेत्॥ चतुःषष्टिकं चेनैव रुद्रैकादशेनतु॥ शतानिस

अथ संपूर्णरुद्राध्यायेनैकादशिति पद्धत्योप्यभिहितः॥
परशुरामपद्धतौ॥ रुद्रयामले॥ प्रस्तुतिरु विषापूर्वर

४ षष्टिकंडिकापाठोपलक्षे सहस्रशीर्षायमन्त्रवचनमिति द्रष्टव्यं॥ त
त्रकार सूक्त अनुवाकाध्याये समाम्नातः॥४ उ॰आनि
सवर्णानां चतुर्भिरधिका नितु वर्णिकामंत्राणामित्यर्थः॥
तेषां चतुःषष्टिसंख्यानामिकादशसूक्त १ परितान्नामियं सं
ख्या निष्पद्यते॥ यद्यपि प्रायो रुद्राध्यायस्य पसुद्धाद्दलं
नास्ति तथापि कण्वशाखायां चतुः॥ अथानमस्ते षोडश १६
नमो हिरण्यबाहवे उष्णीषिणे॥ तस्येभ्यः अश्वाय सुसा
य पार्यायेति पंचपंच २० द्रापे अंधसो॥ ब्रारह १८ अष्टानु
वाकेषु चतुः॥ षष्टिरिति॥ अथ संपूर्णरुद्राध्यायमधीयच
जुहुयाद्वा कुर्वीत चैकां सर्वकामसमृद्धये॥ हविरत्राति
लादिकठिनद्रव्यं प्रस्तुति पूरणव्यपदेशात्॥ एतेषु मंत्रावि सर्वे
भागपक्षेषु न्याक्तितारतम्यनं [illegible] जिनेयपिषस्पुचरत्तेत शा
क्षाध्यायपथी सच्च

ष्येवंरूपानुनयतोनमस्काराः पंचचत्वारिंशत्॥ ततोनमोभवायच्चेत्यारभ्या
न्यलरतोनमस्कारानवसमाप्तिः॥ अथ दुंदुभ्योजुहोतिनमोऽमुष्णेन्चेत्युपक्र

विभागपक्षोऽस्तिश्रेष्ठइतिगम्यते॥ ऋ॥ स्कं कत्वात् तिर्यगि
प्रथमानुवाकेषोडशमंत्राणांहोमोभागस्तत्प्रथमेनुवाके॥ ऋ॥ सु
क्तं॰ नमोहिरण्यबाहवइत्यारभ्यनमआविर्हतेभ्यइत्यंतेषु
प्रतिकंडिकंचत्वारश्चत्वारोमंत्रान्नमोहिरण्यबाहवेसे
नान्येदिशांचपतयेनमइति॥ ऋ॥ सैवंमंत्रविभागस्यद
निर्दिष्टत्वात् द्वंद्वत्वंवात्रवाच्याभिप्रायेणमुख्यानांपरमा
गातिरितिचेत्॥ ननुवाचकाभिप्रायेण नेपां बहुत्वद
र्शनात्॥ तथाचहिरण्यबाहवेसेनान्येकत्वेकंनाम॥ न
मस्कारान्नेति द्वितीयं ततोयानुवाके विंशतिमंत्राः॥
अथोत्तराणिजपतिद्रापेअंधसस्पतइत्युपक्रम्यस

म्यनमोहिरण्यबाहवेसेनान्येदिशांचपतयेनमइ

पानु
तेतो

त
दिशांचपतयेइतिद्वितीयं एवमुत
रुद्रेष्ट्वंतथमभाष्ये

इति

अथो हरिकेशेभ्य इति
केनामरे

॥१५६॥

३ग०३ग।०

येतानियज्ञंविभवंतीत्युक्त्वादशैतानवतानं॥ जुहोतीत्युक्त्वात्री
णियज्ञं॰ विभवंतीति॥ ऋ॥ सैवंमंत्रविभागकथनादिसर्वलंप्र
पंचेन॥ अथरुद्राध्यायस्यप्रतिमंत्रप्रयोगःकथ्यते॥ सच्चम
हार्णवे॥ नमकाश्रितमंत्राणांप्रयोगः फलगोचर॥ नमस्ते
रुद्रस्यपुरश्चरणसिद्धये॥ प्राजापत्यंचरित्वैकंजपेन्मंत्रम
नुत्तमं॥ एकादशसहस्राणिशुद्धकालेनिरंतरं॥ प्रदक्षिण
नमस्कारौकुर्यादीशस्यमंत्रतः॥ मंत्रतः अनेनमंत्रेणप्रदक्षि
णनमस्कारौयथाशक्तिकार्यौ॥ हविष्यमन्नंभुंजीतब्रह्म
चारीह्यधःस्वपेत्॥ पुरश्चरणसिद्धस्यदक्षिणामूर्तिसन्निधौ
एकादशसहस्राणांजपात्सर्वाधिनाशनं॥ अथलक्षजपात्

ग्रजन्मपापंप्रणश्यति॥ ततः स्वगृह्यविधिनास्थापयित्वा
कृताग्निं॥ पायसं श्रपयित्वाज्ययुक्तं तेनजुहुयाद्बुधः॥ द्वत्रिं
शासंख्ययापश्चात्साक्षाद्देवंसपनृपति॥ अथयातद्रूसस्या
दिनानिद्वादशैवाक्तुंचरुभोजीजपेन्मनुं॥ विनियोक्तुं भवेद्यो
ग्यः सर्वकामार्थसिद्धये॥ जपसंख्यापूर्ववत्॥ अनेनासिद्ध
मंत्रेणयद्यत्कामयतेद्विजः॥ तंतंकाममवाप्नोतिजपादयु
तसंख्यकादिति॥ अथयातेरुद्रइत्यस्यास्यावासरत्रितयंयाव
त्निरंतरजपान्नरः॥ नित्यकर्माविरोधेनपुरश्चरणवान्भ
वेत्॥ ततः प्रयोगयोग्यः स्याद्दशगोनांतिकामना॥ जपेद्धो
मादिपूर्ववत्॥ अथयाभिषुमिसस्यत्रिदिनवन्वसेसस्य॥

ऋग्द्वयमेकोमंत्रः॥ निरंतरंजपेन्मंत्रंदिनानामेकविंशतिं॥ पु
रश्चरणमेवंस्यात्प्रयोगार्हस्ततोभवेत्॥ अकालमरणाद्राद्धुं
नाशमायातिवैयदा॥ महीपतिः शांतिकर्मकारयेदग्रजन्मना॥
ऋग्भ्यामाभ्यांतिलव्रीहिगोधूमयवकल्पितं॥ हविः प्रजुहुया
त्तत्संवासरेष्वेकविंशतौ॥ अकालमरणाज्जातंसाध्वसंना
शमृच्छतीति॥ अथाध्यवोचदिसस्य॥ अर्द्धहद्धंचरित्वाथवा
सरान्यंचसंयतः॥ शाकमूलयवान्नानिदिवातिष्ठेन्निरंतरं
जपन्नुपुरश्चरणवान्स्यात्प्रयोगार्हस्ततोभवेत्॥ रक्षापुरःस
रंराजाकामयन्नाचिरंजीवितंकारयेद्विधिनाकर्मवक्ष्यमा
णंद्विजन्मना॥ श्वेतसर्षपदूर्वाग्र्ययवैस्तंदुलमिश्रितैः॥ हो

मंत्राष्टसहस्रं स्यात्तं चाह्नः सुनिरंतरं॥ अथान्यो भगरोगस्य
नाशनाय प्रोच्यते विधिः॥ सहस्रं तु होममनुना शतं हुत्वाथवा
पुनः॥ अभिमंत्र्य फलं सम्यक् खारं गं पयसी क्षीपेत्॥ क्वाथयि
त्वा ततः स्वाग्नौ होमः कार्यो विधानतः॥ तत्र संख्या भवेदष्टौ स
हस्राणि शतानि च॥ शेषं पिबेत्स योग भगरोग एव प्रणश्यती
ति॥ अथ असौ यस्ताम्र इति मंत्रद्वयस्य प्रयोगः॥ हविष्यमेकं
चरेत्सुर्यं ततः षोडशवासरान्॥ निरंतरं जपेन्मंत्रं नित्यकर्मा
विरोधितः॥ अनावृष्टिभवे घोरे समुत्पन्ने समंततः॥ पंचवि
धानथाकृत्य कारयेद्वृष्टिसाधनं॥ हविषि पायसं तत्र तंडुला म१५८॥
श्च तिलाश्च यवाः॥ वेतस्यः समिधाश्चापि जुहुयाल्लक्षसंख्य

अ०आ०

या॥ एकादशादिनैः साध्यं अखिलं कर्म चेप्सितं॥ पंचाननं तु जपे
देकलक्षं शतं जुहुयुर्द्विजाः॥ अथ नमोस्तु नीलग्रीवायेति प्रयो
गः॥ आलये सशिवे मद्वारे महेशस्य समीपतः॥ पित्वा दिवसा प्र
न्सप्त संततं संयतस्ततः॥ संहृज्जुहुयादर्कपुष्पैर्दशादिनाविधि
पुरश्चरणमेवं स्यात्प्रयुंजीत ततो मनुं॥ पुत्रकामः पुरो हंतुरा
लये वाथ गोष्ठके शमीसमिभिरक्ताभिर्दध्याज्यमधुनाभ्य
शं॥ एकादशसहस्राणि त्रीण्यहान्यथ पंच वा॥ अष्टौ सहस्रा
ण्यर्द्धं वा शतान्यष्टौ पिबेच्छिशुः॥ पंकेरुहाणि शिरसि विन्यसे
त्तद्भावतः॥ शमीपत्राणि तावंति पुत्रकामः शिवेर्पयेत्
शतं द्विजान् भोजयित्वा पुत्रं प्राप्नोत्यसंशयं॥ अथ प्रमुंचध

त्वनद्दसादितिस्तांप्रयोगकृच्छ्रमेकंचरित्वादौजपेच्चनव
वासरान्॥एवहृत्तेभवेत्सिद्धिःपुरश्चरणकर्मणः॥महीप
तेतरायुधानिमंत्रयित्वात्त्वचेनतु॥कुशाकंटकहोमस्तुल
क्षसंख्यायथाशक्तितः॥विद्विषोविलयंयांतिनृपवस्यैवप्रसा
दतः॥अथयात्तेहेतिरितित्तचप्रयोगः॥पुरश्चरणमासं
स्यात्सूर्योक्तानाम्नचामिव॥एकादशसहस्त्राणिदीपानांदा
नमीश्वरे॥ह्रत्वासत्त्रोरिपोर्गच्छेत्सेनानीःपार्थिवंचिना॥द
द्धृज्वालाप्रदीपानांशत्रुसेनांविनश्यति॥यद्वाशंकुसह
स्त्राणिअभिमंत्र्यरिपोःपुरे॥दृवालयेधवादेवारामेवापि ॥१५६॥
चतुष्पथे॥खातिनगलासुवान्येषुनगरांगेषुनिक्षिपेत्॥न

अ०आ०

श्येद्दर्षत्त्रयात्सानुव्याध्यादिभिरुपद्रवैः॥इतिप्रथमानुवाक
प्रयोगः॥१॥अथद्वितीयानुवाकस्य॥२॥अथश्रीकामनाय
स्पसश्वेतकमलैःशुभैः॥अयुतंजुहुयाद्वन्हौश्रीमान्भवतिमा
नवः॥३॥अथतृतीयस्य॥अथानेनानुवाकेनवक्ष्येकर्माभिचा
नरा रिकंपरराष्ट्रेरोगमिच्छेंज्जावैकार्य्येष्टिकिय्यं॥नरमहिषमांसा
निजुहुयाल्लक्षसंख्यया॥अथचतुर्थस्यचतुर्थेनानुवाके
नमेहशांतिरथोच्यते॥मेहवान्स्यात्तलेहोमंकुर्यात्क्षौद्रेण
सर्पिषा॥प्रतिमंत्रनमस्कारंमत्रविच्छेदईरितः॥संख्यानव
सहस्त्राणांहोमान्मेहोविनश्यति॥मेहःप्रमेहरोगः॥अन्ये
षामपिकुष्ठादिरोगादेःशांतयेपिचेति॥अथपंचमषष्ठयोः॥

अनुवाकद्वयस्यास्य पुरश्चरणसिद्धये ॥ त्रिरात्रं चरुभोजी स्या
ज्जपेदथ निरंतरं ॥ एकादशादिनान्येवं पुरश्चरणभाग्भवेत्।
अथ राज्यरमावृद्धिकामो राजा तु कारयेत्। मंत्रसिद्धैर्द्विजः
कर्म वक्ष्यमाणवदन्वितं ॥ यावदेकादशावृत्तिरनयो
रनुवाकयोः ॥ तावद्देवसपर्या स्यात्सूर्योक्ता तु दिने दिने ॥ ए
कादश प्रतिदिनं भोजयेच्च द्विजानपि ॥ पूर्वोक्ता कमलादी
ना लिंगपूजेत्यर्थः ॥ एवं कृते राज्यलक्ष्मीर्निःप्रसह्य विवर्द्ध
ते ॥ अथ सप्तमस्य ॥ एकोपवासं कुर्वीत ततश्चाष्टशतं ज
पेत्। पुरश्चरणमेवं स्यात्प्रयोगार्हस्ततो भवेत्। चातुर्वर्ण्य
स्य वशं यः कामयेतात्मनो द्विजः ॥ उदुंबरवल्कसत्र न्यग्रोध ॥१९६०॥

ध्ये पाकाय स्तु जुहुयात्सहस्त्राणां तु पंचकं ॥ कपिलाज्यं हविः
३न०३ना० प्रोक्तमेवं मेधा समश्नुते ॥
प्लक्षभूरुहां ॥ वल्कसत्रोश्वत्थः ॥ समिधो दधिमध्वाज्यसंयु
८ क्ताञ्जुहुयात्सो ॥ अयुतं होमसंख्या स्यादृश्यमेवं समश्नुते ॥
अथ द्वापेदस्य ॥ ह्रस्वोपवासमेकाहं जपेन्मन्त्रमथायुतं ॥ पु
रश्चरणमेकाहं जपेन्मन्त्रमथायुतं ॥ पुरश्चरणमेवं स्यादथ
वेद्धनकामनः ॥ आर्द्रायां जुहुयादाज्यं कापिलं प्रयतोयुतं
धनं बहु भवेत्तस्य महेश्वरस्य प्रसादतः ॥ ज्वरे जातेस्य शांत्य
र्थं सिरसो भुविरोगिणः ॥ जुहुयात्संचसाहस्त्रीर्दूर्वाणां ज्व
रशांतये ॥ दूर्वाहोमे दूर्वात्रयं होतव्यमिति परिभाषायामु
क्तं ॥ अभिचारस्य शांत्यर्थं बैकंकतरुद्भवं ॥ समिधो जुहु
याद्धोमसंख्या तत्रायुतं भवेत् ॥ महाजनकृतद्रोहशंगस्यर्थं

होममाचरेत्॥ तुषामाज्येनसंमिश्रहविःसंख्यापिचायु
तं॥ अथयात्तेरुद्रशिवातनूःशिवेसस्य॥ अष्टौस्नानानि
कुर्वीतप्राणायामास्ततःपरं॥ सहस्राणिजपेसंचपुरश्च
रणसिद्धये॥ कन्यार्थीलभतेकंन्यांकुत्वाहलाजाज्यवायुतान्
अपामा समिद्धोमैरलक्ष्मीनाशायेद्बुधः॥ सर्वकल्मषनाशायजुहुया
च्चतिलाहुतीः॥ अहोरात्रमुपोष्यैवपुंकामःशुचिव्रतः॥ पा त्र
यसंजुहुयादग्नौअष्टोत्तरशताहुतीः॥ ऋतुस्नातांततोभा
र्यांशुचिवस्त्रामलंकृतां भोजयेद्धुतशेषंतुजपन्नाष्टशतंबु श
धः॥ ब्राह्मणान्भोजयित्वातुपुत्रंप्राप्नोतिमानवः॥ अथमानो ॥१६१॥
महांतइत्यस्यउपवासत्रयंकृत्वाजपेयंचसहस्रकं॥ पुरश्च

अ०आ०

रणसिद्धःस्यात्प्रयुंजीताथकर्मणि॥ स्वीयस्त्रीबालवृद्धानांशांति
मिच्छन्निदंचरेत्॥ प्रतिसंवत्सरंत्वार्द्रानक्षत्रेस्यादुपक्रमः॥ यवा
नांतिलमिश्राणांजुहुयादयुताहुतीः॥ अथमानस्तोकइत्यस्य
कृच्छ्रमेकंचरित्वादौपात्रऔदुंबरेघृतं॥ निधायकापिलंतस्यकु
र्याद्धेवाभिमंत्रणं॥ सहस्रसंख्यंतिनस्याग्नेयावामथितेपिवा पा
जुहुयादष्टसाहस्रीतथाव्याहृतिभिःशतं॥ एवंकृतेसर्वकाम
माप्नोत्येवनसंशयः॥ अथारात्तइत्यस्य॥ लक्ष्म्यायुष्कामनायस्य
जुहुयात्सोयुताहुतीः॥ मध्वक्तैस्तंडुलैःशुक्लैर्वर्द्धतेतस्यमा
युश्री॥ दिनत्रयमुपोष्यप्राक्सिद्धमंत्रस्यचोच्यतेइति॥ अ
थमीढुष्टमेत्यस्य॥ एकरात्रेजपेसंचसहस्राणिसुसंयतः

पुरश्चरणसिद्धःस्यात्प्रयोगार्हस्ततोभवेत्॥अर्थनाशभयेप्रा
प्तेतथैवप्राणसंशये॥तस्करादिभयेचैवजुहुयात्सर्पिषाहु
तीः॥पंचैवतुसहस्राणिभयेभ्योमुच्यतेध्रुवं॥अथसहस्रा
णीयस्य॥कृच्छ्रमेकंचरित्वादौजपेत्पंचसहस्रकं॥सचिवादि
प्रधानानांपुरुषाणामुपद्रवे॥तच्छांतयेमहीपालःकारयेद
युताहुतीः समिधस्तत्रशाल्मल्योविकंकतभवाअपि॥व्रीह
यश्चयवाश्चापिहोमद्रव्यंतिलाअपि॥यदिमारणकामश्च
जपेच्छतसहस्रकं॥ततोवल्मीकसंभूतमृदालिंगंप्रकल्पच
मंत्रेणानेनाभिषिंचेद्यावच्छीर्णंभवेद्धितत्॥एवंकृतेभवेन्मृ
त्युर्विद्विषोनात्रसंशयः॥अयंप्रकारोवाजसनेयिनामपिस ॥१६२॥

अ०३ग्रा०

धारणेयजुर्मंजर्यामुक्तः॥गौरवभीतेर्नलिखितः॥अत्रस
र्वत्रदक्षिणेयत्तानिरूप्यते॥सापिमहार्णवे॥दक्षिणाह्युत्तमा
मध्याधमाचेतित्रिधामता॥तत्रसौवर्णनिष्काणांदशसा
हस्रिकोत्तमा॥तदर्द्धंमध्यमाप्रोक्तात्रितीयात्रिसहस्रिका
उत्तमात्रिशतीसास्याद्द्विशतीमध्यमामता॥शतमात्राधमा
ज्ञेयाप्रकारोन्यश्चकथ्यते॥उत्तमातुचतुःषष्टीतदर्धंमध्यमा
मता॥शतमात्राधमाज्ञेयाप्रकारोन्यश्चकथ्यते॥उत्तमातुच
तुःषष्टीतदर्धंमध्यमास्मृता॥चतुर्विंशतिरंसास्यादधात्यो
विधिरुच्यते॥सहस्रंदक्षिणादेयादशपूरुषकर्तके॥शता
निपंचदेयानिकक्षिकंचककर्तके॥अथैककर्तकेदेयंशत

त्रयमितिस्थितिः॥सर्वत्रद्विगुणंदद्यादाचार्यायतुदक्षिणां
बहुपूरुषनिष्पाद्यउत्तमाप्रतिपूरुषं॥अथैकर्त्तृकेकर्त्तुरे
कस्यैवोत्तमामता॥राष्ट्रांतःसदनानांचदक्षिणाकथितोत्तमा
अन्येषांमध्यमासीवादक्षिणादाननिर्णयः॥अनुक्तदक्षिण
केषुप्रयोगेष्वयमीरिता॥विभवेसतियोमोहान्नकुर्याद्विधि
विस्तरं॥नैवतत्फलमाप्नोतिप्रलोभाक्रांतमानसः॥इतिदक्षि
णायत्ता॥अथशिवस्तुतिः॥तत्रैव॥अनन्यूनातिरिक्तोतिप्रस
वायजहीर्षया॥स्तोमिस्तंबेरमाधीशाचर्मनिर्मितवाससं
जयजयमहाभैरवमहाभीमभूतभूषितमूलकुंडलिकुंडला ॥१६३॥
लंकृत॥अतिघनविलसिततडिदुपमितलघुतरकरवाल

अ०आ०

निखिलनिगमोपगीयमानसुरवरकरपरिचयविचरितचतुरच
रणशृंगारकमलकलितकपालसरसिजासनविस्तारितसम
स्तव्यस्तजगद्विस्तारसंहारसंभारसन्नद्धगुणनिरवधिकपरि
माणनीहारपरिवारमरीचीविरंचिव्यापारपात्रीजलललितजटा
जूटाभिरामहरदुरितहरअपरदिगंगनासंभोगसरागपतंग
भंग्यालिंगितोत्तमांगभूमध्यनयन।मदनदमनमत्तमधुक
रंकारसंकारामत्तभंगसंरावकिंकिणीकलितललितपदा
हति।क्लिन्नमहीमंडलाधारांडजपतिप्रस्तूयमानतांडवाडंबे
रफूत्कारोत्कर्षध्वस्तदैसदानवसंघा तांतरांतरितरागोतांतः
करणअनवरतधाराधरध्वानगंभीरवर्बरगलगवयफूत्का

रनिरस्तगह्वरगुहाराजीविराजमानधराधीशकन्यका
कांतिसंक्रांतनिजकलेवरैकदेश अखिलजगदधीशानम
स्तेनमस्तु ॥ एवमन्यदपिस्तोत्रं स्तोतव्यं अत्ररुद्रहोमादौये
न्येविशेषाआगमोक्ताग्रंथांतरतोविज्ञेयाः ॥ इत्युपरम्यते
इतिविधानपारिजातेरुद्राध्यायविधानंसमाप्तं ॥ उपक्रां
तमुपसंह्रियते ॥ आचारः प्रथमो धर्मः श्रुत्युक्तः स्मार्तएव
च ॥ तस्मादस्मिन्समायुक्तो नित्यस्यादात्मवान्द्विजः ॥ विहिता
करणं यत्र निषिद्धाचरणं तथा ॥ नानानरकदंपुंसांहीनयोनौ
चजन्मदं ॥ आचाराद्विच्युतो विप्रोनवेदफलमश्नुते ॥ आचारे
णतुसंयुक्तः संपूर्णफलभाक्भवेत् ॥ सर्वलक्षणहीनोपिसमु ॥१६४॥

अ०आ०

अह-पद

द्विक

दाचारवान्नरः ॥ श्रद्दधानोनसूयश्चशतंवर्षाणिजीवति अक्रो
धनः सत्यवादी भूतानामप्यहिंसकः ॥ अनिन्द्यश्चवदान्यश्चश
तंवर्षाणिजीवति ॥ अंतर्गृहे निविष्टानांकर्मनित्यमिहोदितं ॥ अ
न्हानिवर्त्ततेयस्मादान्हिकंतद्विदुर्बुधाः ॥ अनंतमान्हिकनामेदम
नंतार्थप्रकाशकं ॥ अनंतेनहृतंयस्मादनंतस्यप्रसादतः ॥ नाग
देवतनूजोयंभट्टोनंतोमहामतिः ॥ आन्हिकामृतसेकेनद्विज
वृक्षानवर्द्धयेत् संतिग्रंथसहस्राणि आन्हिकस्यविधौबुधाः
कोप्यस्यमहिमावेद्योभिज्ञैर्जयतिसर्वतः ॥ नपांडित्याभिमा
नेननचवित्तस्यलिप्सया ॥ रचितंचान्हिकंकिंतुविदुषांपरितु
ष्टये ॥ अनेनग्रंथदीपेनस्वसंदेहात्मकंतमः ॥ अपास्यकर्मकुर्व

तुतिर्भूयाज्ज्ञानिसंसदि ॥ वचनप्रसूनमालावासुदेवेसमर्पिता ॥
भट्टानंतेनविदुषानानानिर्णयचित्रिता ॥ इतिश्रीमद्देवरिको
त्तमश्रीमन्नागदेवभट्टसूनुनाप्रथमशाखिनाश्रीमदनंतभ
ट्टेनविरचितेविधानपारिजातेसमासेपेनिबंधेतृतीयस्तब
केआन्हिकसमाप्तं ॥ अनंतान्हिकनामेदंसार्द्धद्वयसहस्रकं ।
अनुष्टुप्छंदश्लोकानांसंततुंपरमार्थतः २५०० ॥ यस्यनस्रु
स्रुयःपुत्रालक्ष्मलक्ष्माद्धमेयवा सकथंमत्तमातंगमग्निहोत्र
मुपासते १ आत्माकृत्विकृधनंजायाशुद्धंयस्यनतुस्थयं
तस्याग्निहोत्रंस्वर्गापिनरकायेतरस्यच २ कात्यायनीय ॥१६५॥
वाक्येनविकल्पःप्रतिभातिहि श्राद्धंवापितृयज्ञस्यासिद्धो

अ०आ० को
चाग्निरथापिवा ॥१॥ साग्निकःपितृयज्ञांतंबलिकर्मसमाचरे
त् ॥ अनग्निकृत्तच्छेषंतुकोदद्यादितिस्मृतिः ॥२॥ पितृविप्रकरेहो
मःसाग्नेरपिभवेदिह ॥ अग्नौकरणशेषंहि अब्राह्मभोजने ॥ पि
१ ॥ साग्निकेनतुविप्रेणयदन्नंहूयतेकरे ॥ तदन्नंनिक्षिपेदग्नौमु
क्त्वांद्रायणंचरेत् ॥२॥ कात्यायनोपि ॥ सपिंडीकरणंयावदृजु
पी दर्भैपितृक्रिया ॥ सपिंडीकरणादूर्ध्वंद्विगुणैर्विधिवद्भवेत् ॥१॥
देवानामृजवोदर्भाःपितृणांद्विगुणाःस्मृताः ॥ ॥ इदंआन्हिक
श्वे स्यपुस्तकंमोरेश्वरभट्टेनलिखितंस्वार्थंपरोपकारार्थंच ॥ श्री
काशीविश्वेश्वरार्पणमस्तु ॥ शुभंभवतु ॥ श्रीकासिविश्वेश्व
रार्पणमस्तु ॥ ॥ ५ ॥ ५ ॥ ५ ॥

बर्षे प्रमोदनाम संवत्सरे दक्षिणायने हेमंतऋतौ मार्ग
शीर्षमासे कृष्णपक्षे सप्तम्यां इंदुवासरे सायंकाले
इदं मान्हिक पुस्तकं समाप्तं ॥ इदं पुस्तकं चवरची
कारोपनाम्ना बगाजीपंतस्य ॥ छ ॥ श्रीशंकरार्प
णमस्तु ॥ ॥ छ ॥ छ ॥ ≡ ॥ छ ॥ ≡ ॥ छ ॥

॥१५६॥

```
[OrderDescription]
,CREATED=24.07.19 10:34
,TRANSFERRED=2019/07/24 at 11:18:23
,PAGES=163
,TYPE=STD
,NAME=S0001094
,Book Name=M-1947-AAHINAKAM VIDHANPARIJATE
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
```

```
FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
```

```
FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
```

```
FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
```

```
FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,
```